२६८ । चतुर्लकार परे रहनेसे, कर्त्तृवाच्यमें, ष्ठिव्—ष्ठीव्, गुह—गूह्, आ+चम्—आचाम्, सञ्ज्—सज्, स्वञ्ज्—स्वज्, दंश्—दश्, सद्—सीद्, और परस्मैपदमें क्रम्—क्राम् होता है ।

२६९ । चतुर्लकारमें भ्वादिगणीय धातुके उत्तर विहित 'अ' परे रहनेसे, धातुके अन्त्यस्वर और उपधा लघुस्वरका गुण होता है ; यथा—(अन्त्यस्वर) जि+ति=जि+अ+ति=जे+अ+ति=जयति ; (उपधा लघुस्वर) शुच्+ति=शुच्+अ+ति=शोच्+अ+ति=शोचति ।

२७० । चतुर्लकार परे रहनेसे, कर्त्तृवाच्यमें, स्रंस्—स्रंस्, भ्रंश्—भ्रंश्, कृप्—कल्प्, और शंस्—शंस् होता है ।

भ्वादि ।

अकर्मक परस्मैपदी धातु ।

पत् (पतॢ) पतने*—गिरना To fall.

(पतति पत्रं वृक्षात् ।—(२) धर्मभ्रंशे ; "पलाण्डुं गृञ्जनञ्चैव मत्या जग्ध्वा पतेद्द्विजः" मनु० ५. १९. ।)

लट् ।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	पतति	पततः	पतन्ति
मध्यमपुरुष	पतसि	पतथः	पतथ
उत्तमपुरुष	पतामि	पतावः	पतामः

लोट् ।

प्रथमपुरुष	पततु	पतताम्	पतन्तु
मध्यमपुरुष	पत	पततम्	पतत
उत्तमपुरुष	पतानि	पताव	पताम

लङ् ।

प्रथमपुरुष	अपतत्	अपतताम्	अपतन्
मध्यमपुरुष	अपतः	अपततम्	अपतत
उत्तमपुरुष	अपतम्	अपताव	अपताम

---

* 'पतॢ गतौ' इति धातुपाठः ; पत्—जाना To go—सकर्मक ; यथा—[सः] पपात पथः" भा० ४. १८. (सः अर्जुनः पथः मार्गान् पपात जगाम इत्यर्थः) ।

विधिलिङ्।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	पतेत्	पतेताम्	पतेयुः
मध्यमपुरुष	पतेः	पतेतम्	पतेत
उत्तमपुरुष	पतेयम्	पतेव	पतेम

लृट्।

प्रथमपुरुष	पतिष्यति	पतिष्यतः	पतिष्यन्ति
मध्यमपुरुष	पतिष्यसि	पतिष्यथः	पतिष्यथ
उत्तमपुरुष	पतिष्यामि	पतिष्यावः	पतिष्यामः

❀ अनु + पत्—अनुसरणे। अभि + पत्—अभिधावने; आक्रमणे च। आ + पत्—आगमने; उपस्थितौ च। उत् + पत्—उड्डयने (उड़ना)। नि + पत्—अधःपतने; उपस्थितौ च। प्र + नि + पत्—प्रणामे; प्रणिपतति। सम् + नि + पत्—मिलने। निर् + पत्—निर्गमे (निकलना); निष्पतति। ❀

हस् (हसे) हसने—हसना To laugh.

(मधुरं हसति शिशुः। उपहासे—दोषदर्शनपूर्वकहासे—ठट्ठा करना—तु सकर्मकः; हसन्ति साधवश्चौरम्।)

लट्।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	हसति	हसतः	हसन्ति
मध्यमपुरुष	हससि	हसथः	हसथ
उत्तमपुरुष	हसामि	हसावः	हसामः

लोट् ।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	हसतु	हसताम्	हसन्तु
मध्यमपुरुष	हस	हसतम्	हसत
उत्तमपुरुष	हसानि	हसाव	हसाम

लङ् ।

प्रथमपुरुष	अहसत्	अहसताम्	अहसन्
मध्यमपुरुष	अहसः	अहसतम्	अहसत
उत्तमपुरुष	अहसम्	अहसाव	अहसाम

विधिलिङ् ।

प्रथमपुरुष	हसेत्	हसेताम्	हसेयुः
मध्यमपुरुष	हसेः	हसेतम्	हसेत
उत्तमपुरुष	हसेयम्	हसेव	हसेम

लृट् ।

प्रथमपुरुष	हसिष्यति	हसिष्यतः	हसिष्यन्ति
मध्यमपुरुष	हसिष्यसि	हसिष्यथः	हसिष्यथ
उत्तमपुरुष	हसिष्यामि	हसिष्यावः	हसिष्यामः

अव + हस्, उप + हस्--उपहासे । परि + हस्--परिहासे ।

भू सत्तायाम्—होना To be, become.

("सत्सङ्गाद्भवति हि साधुता खलानाम्" चाणक्यः ।)

लट् ।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	भवति	भवतः	भवन्ति
मध्यमपुरुष	भवसि	भवथः	भवथ
उत्तमपुरुष	भवामि	भवावः	भवामः

लोट् ।

प्रथमपुरुष	भवतु	भवताम्	भवन्तु
मध्यमपुरुष	भव	भवतम्	भवत
उत्तमपुरुष	भवानि	भवाव	भवाम

लङ् ।

प्रथमपुरुष	अभवत्	अभवताम्	अभवन्
मध्यमपुरुष	अभवः	अभवतम्	अभवत
उत्तमपुरुष	अभवम्	अभवाव	अभवाम

विधिलिङ् ।

प्रथमपुरुष	भवेत्	भवेताम्	भवेयुः
मध्यमपुरुष	भवेः	भवेतम्	भवेत
उत्तमपुरुष	भवेयम्	भवेव	भवेम

लृट् ।

प्रथमपुरुष	भविष्यति	भविष्यतः	भविष्यन्ति
मध्यमपुरुष	भविष्यसि	भविष्यथः	भविष्यथ
उत्तमपुरुष	भविष्यामि	भविष्यावः	भविष्यामः

*। अनु+भू—बोधे । अभि+भू—पराजये । उत्+भू—उत्पत्तौ ।

परा + भू—पराभवे । परि + भू—अनादरे । प्र + भू—उत्पत्तौ ; सामर्थ्ये च (सकना)। वि + भू + णिच्—चिन्तायाम् ; ज्ञाने ; प्रकाशने च ; विभावयति । सम् + भू—सम्भावनायाम् (मुमकिन होना) ; उत्पत्तौ ; मिलने च । सम् + भू + णिच्—सम्मानने ; चिन्तने, विवेचने च ; "विलोचनं दक्षिण-मञ्जनेन सम्भाव्य" र० ७. ८. इत्यत्र 'सम्भाव्य अलङ्कृत्य' इत्यर्थः ।

स्था (ष्ठा) गतिनिवृत्तौ (अवस्थाने)—रहना, ठहरना To stay.

(तिष्ठति साधुर्धर्मे ।)

लट् ।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	तिष्ठति	तिष्ठतः	तिष्ठन्ति
मध्यमपुरुष	तिष्ठसि	तिष्ठथः	तिष्ठथ
उत्तमपुरुष	तिष्ठामि	तिष्ठावः	तिष्ठामः

लोट् ।

प्रथमपुरुष	तिष्ठतु	तिष्ठताम्	तिष्ठन्तु
मध्यमपुरुष	तिष्ठ	तिष्ठतम्	तिष्ठत
उत्तमपुरुष	तिष्ठानि	तिष्ठाव	तिष्ठाम

लङ् ।

प्रथमपुरुष	अतिष्ठत्	अतिष्ठताम्	अतिष्ठन्
मध्यमपुरुष	अतिष्ठः	अतिष्ठतम्	अतिष्ठत
उत्तमपुरुष	अतिष्ठम्	अतिष्ठाव	अतिष्ठाम

विधिलिङ् ।

प्रथमपुरुष	तिष्ठेत्	तिष्ठेताम्	तिष्ठेयुः

	एकवचन	द्विवचन	बहुवचन
मध्यमपुरुष	तिष्ठेः	तिष्ठेतम्	तिष्ठेत
उत्तमपुरुष	तिष्ठेयम्	तिष्ठेव	तिष्ठेम

लृट् ।

प्रथमपुरुष	स्थास्यति	स्थास्यतः	स्थास्यन्ति
मध्यमपुरुष	स्थास्यसि	स्थास्यथः	स्थास्यथ
उत्तमपुरुष	स्थास्यामि	स्थास्यावः	स्थास्यामः

❁ अधि + स्था—स्थितौ; पराभवे; प्रभुत्वे च—(सकर्मक); "आश्रमबहिर्वृक्षमूलमधितिष्ठति" उत्तर० ४.। अनु + स्था—करणे। अव + स्था—अवस्थितौ; आत्मनेपदी; अवतिष्ठते। प्रति + अव + स्था—विरोधे, आक्षेपे, शङ्कायाम्, प्रातिकूल्ये। आ + स्था—आश्रये; "संयमे यत्नमातिष्ठेत्" मनु० २.८८.। उत् + स्था—उत्थाने (उठना)। उप + स्था—उपस्थितौ (हाज़िर होना); आत्मनेपदी; उपतिष्ठते। प्र + स्था—प्रस्थाने (चले जाना); आत्मनेपदी; प्रतिष्ठते। सम् + स्था—अवस्थाने; आत्मनेपदी; सन्तिष्ठते। ❁

अनुवाद करो—आपकी पत्रिका प्राप्त होकर (अवाप्य) मैं सुखी हुआ। अब यदि वृष्टि हो, तो प्रचुर शस्य होगा। इनका मङ्गल हो। तुमलोग चिरजीवी हो। तुम दोनों भाई यहाँ रहो। वे क्या घरमें थे? जो लोग सर्वदा गुरुके पास रहते हैं, उनका कभी अमङ्गल नहीं होता। यहाँ और अधिक दिन नहीं रहूँगा। तू मिथ्यावादी होगा, तो नरकमें गिरेगा। आँधीमें (वात्या) वृक्षसे आम गिरते हैं। ऐसी आँधीसे सब फल गिर जायँगे। उसकी बात सुनकर (श्रुत्वा) सब हँस पड़े। नहुष

ऋषियोंके शापसे स्वर्गसे गिरा। अविश्वासी नहीं होना चाहिये। वह यदि चार दिन वहां रहे, तो उसका सब कार्य्य सफल होगा। दूसरेका दुःख देखकर (दृष्ट्वा) कभी हसना नहीं चाहिये। अन्धे और लङ्गड़ेका (द्वितीया) उपहास न करना। नारदको दूरसे देखकर अच्युत (कृष्ण) आसनसे उठे।

सकर्मक परस्मैपदी धातु।

गम् (गम्लृ) गतौ—जाना To go.

लट्।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	गच्छति	गच्छतः	गच्छन्ति
मध्यमपुरुष	गच्छसि	गच्छथः	गच्छथ
उत्तमपुरुष	गच्छामि	गच्छावः	गच्छामः

लोट्।

प्रथमपुरुष	गच्छतु	गच्छताम्	गच्छन्तु
मध्यमपुरुष	गच्छ	गच्छतम्	गच्छत
उत्तमपुरुष	गच्छानि	गच्छाव	गच्छाम

लङ्।

प्रथमपुरुष	अगच्छत्	अगच्छताम्	अगच्छन्
मध्यमपुरुष	अगच्छः	अगच्छतम्	अगच्छत
उत्तमपुरुष	अगच्छम्	अगच्छाव	अगच्छाम

विधिलिङ्।

प्रथमपुरुष	गच्छेत्	गच्छेताम्	गच्छेयुः

	एकवचन	द्विवचन	बहुवचन
मध्यमपुरुष	गच्छेः	गच्छेतम्	गच्छेत
उत्तमपुरुष	गच्छेयम्	गच्छेव	गच्छेम

लृट्।

प्रथमपुरुष	गमिष्यति	गमिष्यतः	गमिष्यन्ति
मध्यमपुरुष	गमिष्यसि	गमिष्यथः	गमिष्यथ
उत्तमपुरुष	गमिष्यामि	गमिष्यावः	गमिष्यामः

❀ गम् + णिच्—अवबोधने (समझाना); गमयति; "द्वौ नञौ प्रकृतार्थं गमयत." (Two negatives make one affirmative)। अति + गम्—अतिक्रमे। अधि + गम्—प्राप्तौ; ज्ञाने च। अनु + गम्—अनुसरणे। अप + गम्—अपसरणे, दूरीभावे। अव + गम्—ज्ञाने। आ + गम्—आगमने; प्राप्तौ च। उप + आ + गम्—मिलने। उत् + गम्—उद्गमे। प्रति + उत् + गम्—प्रत्युद्गतौ, सम्मानार्थं पुरोगमने। उप + गम्—प्राप्तौ। अभि + उप + गम्—स्वीकारे। निर् + गम्—बहिर्गमने। परि + गम्—प्राप्तौ; ज्ञाने; वेष्टने च। सम् + गम्—मिलने; साधुः साधुभिः सह सङ्गच्छते; (२) योग्यतायाञ्च; तत्र सङ्गच्छते। ❀

पा पाने—पीना To drink.

(पिबति पयः पान्थः।)

लट्।

प्रथमपुरुष	पिबति	पिबतः	पिबन्ति
मध्यमपुरुष	पिबसि	पिबथः	पिबथ

	एकवचन	द्विवचन	बहुवचन
उत्तमपुरुष	पिबामि	पिबावः	पिबामः

लोट्।

प्रथमपुरुष	पिबतु	पिबताम्	पिबन्तु
मध्यमपुरुष	पिब	पिबतम्	पिबत
उत्तमपुरुष	पिबानि	पिबाव	पिबाम

लङ्।

प्रथमपुरुष	अपिबत्	अपिबताम्	अपिबन्
मध्यमपुरुष	अपिबः	अपिबतम्	अपिबत
उत्तमपुरुष	अपिबम्	अपिबाव	अपिबाम

विधिलिङ्।

प्रथमपुरुष	पिबेत्	पिबेताम्	पिबेयुः
मध्यमपुरुष	पिबेः	पिबेतम्	पिबेत
उत्तमपुरुष	पिबेयम्	पिबेव	पिबेम

लृट्।

प्रथमपुरुष	पास्यति	पास्यतः	पास्यन्ति
मध्यमपुरुष	पास्यसि	पास्यथः	पास्यथ
उत्तमपुरुष	पास्यामि	पास्यावः	पास्यामः

दृश् (दृशिर्) प्रेक्षणे (ज्ञाने ; साक्षात्कारे)—देखना To see.

(पश्यति चन्द्रं लोकः ; "आत्मवत् सर्वभूतेषु यः पश्यति स पण्डितः" चाणक्यः। "पशुः पश्यति गन्धेन, बुद्ध्या पश्यन्ति पण्डिताः।
राजा पश्यति कर्णाभ्यां, भूते पश्यन्ति बर्बराः॥")

१८

लट् ।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	पश्यति	पश्यतः	पश्यन्ति
मध्यमपुरुष	पश्यसि	पश्यथः	पश्यथ
उत्तमपुरुष	पश्यामि	पश्यावः	पश्यामः

लोट् ।

प्रथमपुरुष	पश्यतु	पश्यताम्	पश्यन्तु
मध्यमपुरुष	पश्य	पश्यतम्	पश्यत
उत्तमपुरुष	पश्यानि	पश्याव	पश्याम

लङ् ।

प्रथमपुरुष	अपश्यत्	अपश्यताम्	अपश्यन्
मध्यमपुरुष	अपश्यः	अपश्यतम्	अपश्यत
उत्तमपुरुष	अपश्यम्	अपश्याव	अपश्याम

विधिलिङ् ।

प्रथमपुरुष	पश्येत्	पश्येताम्	पश्येयुः
मध्यमपुरुष	पश्येः	पश्येतम्	पश्येत
उत्तमपुरुष	पश्येयम्	पश्येव	पश्येम

लृट् ।

प्रथमपुरुष	द्रक्ष्यति	द्रक्ष्यतः	द्रक्ष्यन्ति
मध्यमपुरुष	द्रक्ष्यसि	द्रक्ष्यथः	द्रक्ष्यथ
उत्तमपुरुष	द्रक्ष्यामि	द्रक्ष्यावः	द्रक्ष्यामः

* अनु + दृश्—आलोकने (देखना); आलोचनायाञ्च । उप,

परि, प्र, सम् + दृश् + णिच्—प्रदर्शने (दिखलाना) ; उपदर्शयति &c. ❧

अनुवाद करो—बच्चा, तू जा, वहभी जाय, परन्तु मै नहीं जाऊंगा । वे कल पढ़नेको (पठितुम्) गये थे ; तू गया था क्या ? यदि श्याम आवे, तो मैभी जाऊंगा । पहले इसे देखो, पीछे जल पीना । शरीरपुष्टिके लिये घृत पान करना चाहिये । कभी मद्य नहीं पीना । प्रणिधानसे क्या देखते हो ? मै शीघ्र उस देशको देखूंगा । तू जल पीयेगा क्या ?

* * * *

भ्वादि सकर्मक परस्मैपदी धातु ।

अञ्च् (अनूचु) गतौ ; पूजने च—(१) जाना ; (२) पूजा (सम्मान) करना To go ; to worship (honour)—अञ्चति ; अञ्चिष्यति । (१) "स्वतन्त्रा कथमञ्चसि ?" भ० ४. २२ ; (२) "भीमोऽयं शिरसाऽञ्चति" वेणी० ९. २७. ।

अट् भ्रमणे—घूमना To wander—अटति ; अटिष्यति ।

महीमटति परिव्राट् ।

❧ परि + अट्—पर्य्यटने ; "तीर्थानि पर्य्यटस्व" महाभा० । ❧

अर्च् पूजायाम्—पूजा करना To adore—अर्चति ; अर्चिष्यति ।

"रत्नपुष्पोपहारेण च्छायामानर्च पादयोः" र० ४. ८४. ।

अर्ज् अर्जने—कमाना To earn—अर्जति ; अर्जिष्यति । "यदघमर्जति दाता" नै० ९. ८४. ।

अर्द् गतौ ; याचने ; पीडने च—(१)जाना ; (२)माङ्गना ; (३) सताना, मारना To move ; to beg ; to afflict—अर्दति ; अर्दिष्यति । (२) "शरद्घनं नार्दति चातकोऽपि" र० ९. १७. ।

-अर्ह् योग्यत्वे ; पूजने च—(१) योग्य होना To deserve, merit; (२) पूजा करना—अर्हति ; अर्हिष्यति । (१) दण्डमर्हति दुर्वृत्तः ; (अक०) अर्हति विप्रो वेदं पठितुम् ।

'तुमुनन्त'-पदके साथ मध्यमपुरुषमें और कभी प्रथमपुरुषमें प्रयुक्त होनेसे, 'अर्ह्'-धातु—लट् अनुज्ञा, उपदेश, वा विनीत प्रार्थना सूचित करता है ; और अङ्गरेज़ीमें उसका अनुवाद 'Pray', 'deign', 'be pleased to', 'will be pleased to' द्वारा करना होता है : यथा—"क्षिणाण्वदान्यर्हसि सोढुमर्हन् !" र० ५. २५ (Pray wait &c) ; "नार्हति मे प्रणयं विहन्तुम्" र० २. ५८ ; "तं सन्तः श्रोतुमर्हन्ति" र० १. १०. (Will be pleased or be good enough to listen to it) ।

अव् रक्षणे ; प्रीणने च—(१) रक्षा करना ; (२) प्रीत करना (खुश करना) To protect ; to satisfy—अवति ; अविष्यति । (१) "अवतु वो गिरिसुता" ; (२) "न मामवति सद्वीपा रत्नसूरपि मेदिनी" र० १. ६५. ।

-इ गतौ—अयति ; एष्यति ।

** उत् + इ—उदये ; "उदयति विततोर्द्ध्वरश्मिरज्जावहिमरुचौ हिमधाम्नि याति चास्तम् । वहति गिरिरयं विलम्बिघण्टाद्वयपरिवारितवारणेन्द्रलीलाम् ॥" माघ० ४. २० (अनेनैव श्लोकेन कविना 'घण्टामाघः' इति नाम लब्धमिति केचिद्वर्णयन्ति) ; "अप्युदयति मुञ्चामसनः पद्मिनीनाम्" ; "उदयति यदि भानुः पश्चिमे दिग्विभागे" उद्भटः । **

उक्ष् सेचने—सींचना To wet, moisten—उक्षति ; उक्षिष्यति ।
उक्षति वृक्षं मेघः ।

⚜ अभि + उक्ष्, प्र + उक्ष्—समन्तात् वारिबिन्दुप्रक्षेपे (छिड़कना) ; "प्रोक्षितं भक्षयेन्मांसम्" (यज्ञार्थं मन्त्रैः संस्कृतम् इत्यर्थः) मनु० ५. २७. । ⚜

ऋ गतौ ; प्राप्तौ च—(१) जाना ; (२) पाना To go; to obtain—
ऋच्छति ; अरिष्यति । (२) ऋच्छति धनं कृती ; "चण्डालपुक्कसानाञ्च ब्रह्महा योनिमृच्छति" मनु० १२. ५५. ।

⚜ ऋ + णिच्—(१) दाने ; (२) स्थापने च ; अर्पयति । (२) "अपथे पदमर्पयन्ति हि श्रुतवन्तोऽपि रजोनिमीलिताः" र० ९. ७४. । ⚜

कष् हिंसायाम् To injure ; (२) घर्षणे To rub, scratch ; (३) परीक्षणे (निकषोपरि घर्षणेन स्वर्णस्य)—कसौटीमें घिसकर सुवर्णकी परीक्षा करना To test, rub on a touchstone (as gold) ;
"छद्हेम कषन्निवालसत् कषपाषाणनिभे नभस्तले" नै० २. ६९. ।

कस् गतौ—कसति ; कसिष्यति ।

⚜ वि + कस्—विकासे (खिलना और विस्तृत होना—अक०) ;
"विकसति हि पतङ्गस्योदये पुण्डरीकम्" मालती० १. २८. । वि + कस् + णिच्—To cause to expand—विकासयति ; "कोपकुसुमं व्यचीकसत्" माघ० १५. १२ ; "चन्द्रो विकासयति कैरवचक्रवालम्" भर्तृ० । प्र + वि + कस्—प्रकाशे । निर् + कस् + णिच्—निःसारणे ; निष्कासयति । ⚜

काङ्क्ष् (काक्षि) वाञ्छायाम्—आकाङ्क्षा करना, चाहना To wish—

काङ्क्षति ; काङ्क्षिष्यति । मधुमतः काङ्क्षति वल्गीन् ।

⚜ आ + काङ्क्ष्—आकाङ्क्षायाम् । ⚜

कित् रोगापनयने (व्याधिप्रतीकारे)—इलाज करना To heal, cure—चिकित्सति ; चिकित्सिष्यति ।

⚜ वि + कित्—संशये । ⚜

कृष् आकर्षणे ; विलेखने च—(१) खींचना ; (२) जोतना To pull; to till—कर्षति, कर्क्ष्यति, क्रक्ष्यति । (१) कर्षन्ति तुरगा रथम् ; (२) इक्षुक्षेत्रं कर्षति कृषीवलः ।—(३) प्रापणे (ले जाना); द्विकर्मक ; कर्षति शाखां ग्रामम् ।

⚜ आ + कृष्, वि + कृष्—आकर्षणे । अप + कृष्—अपसारणे (हटाना), नाशने ; "धैर्यं शोकोऽपकर्षति" रामा० ; (२) न्यूनीकरणे च (घटाना) । उत् + कृष्—उत्तोलने ; उद्धरणे (निकाल लेना, छुड़ाना) ; आकर्षणे ; वर्द्धने च (बढ़ाना) । निर् + कृष्—बलाद्ग्रहणे, आहरणे । प्र + कृष्, उत् + कृष्—कर्मकर्त्तरि—आधिक्ये, वृद्धौ, श्रेष्ठतायाम् (अधिक होना, बढ़ना, श्रेष्ठ होना) ; प्रकृष्यते, उत्कृष्यते । वि + प्र + कृष्—दूरीकरणे । ⚜

क्रम् (क्रमु) पादविक्षेपे (गतौ)—कदम रखना, चलना To step, walk—क्रामति, क्राम्यति, क्रमते ; क्रमिष्यति ।—आक्रमणे च ; "कृष्णोरगो पदा क्रामसि पुच्छदेशे" महाभा० ।

⚜ अति + क्रम्—(१) उल्लङ्घने (पार होना) ; (२) अतिवाहने (काटना) ; (३) अत्यये च (गुज़रना—अक०) ; यथा—(२) आहारवेलां नातिक्रामेत् ; (३) "अतिक्रामति देवार्चन-

विधिवेला" काद०। वि+अति+क्रम्—उल्लङ्घने, भङ्गे (तोड़ना); "कृच्छ्रेष्वपि न मर्य्यादां व्यतिक्रमेत्" पञ्च० १.९१.। अप+क्रम्—अपसरणे (हटना)। आ+क्रम्—आक्रमणे। उत्+क्रम्—उद्गमने; अतिक्रमे च। उप+क्रम्, प्र+क्रम्—आरम्भे; आत्मनेपदी; उपक्रमते, प्रक्रमते। निर्+क्रम्—निर्गमने; निष्क्रामति। परा+क्रम्, वि+क्रम्—शौर्य्याविष्कारे (बहादुरी या हिम्मत दिखाना); "बकवच्चिन्तयेदर्थान् सिंहवच्च पराक्रमेत्" मनु० ७.१०६.। परि+क्रम्—इतस्ततः पादचारे (चलना फिरना)। सम्+क्रम्—प्रवेशे। ⚜

खाद् भक्षणे—खाना To eat—खादति; खादिष्यति। "खादति पृष्टमांसम्" (चुगली खाता है) हितो० १.८२.।

गद् भाषणे—कहना To say—गदति; गदिष्यति। "वेदान् गदति विस्पष्टम्"।

⚜ नि+गद्—कथने। ⚜

गुप् (गुपू) रक्षणे—रक्षा करना, बचाना To protect—गोपायति; गोप्स्यति, गोपिष्यति, गोपायिष्यति। "गोपायन्ति कुलस्त्रिय आत्मानम् आत्मना" महाभा०।

गै गाने (कीर्त्तने)—गाना To sing—गायति; गास्यति। गीतं गायति गायनः। "प्राणरक्षणाच्च न परं पुण्यजातं जगति गीयते जनेन" श्रीहर्षचरितम्।

⚜ उत्+गै—उच्चैर्गाने। परि+गै—कीर्त्तने। वि+गै—निन्दायाम्। ⚜

घृष् (घृषु) घर्षणे—घिसना To rub—घर्षति; घर्षिष्यति। घर्षति

चन्द्रनं लोकः।

घ्रा गन्धग्रहणे (आघ्राणे)—सूँघना To smell—जिघ्रति; घ्रास्यति। जिघ्रति पुष्पं लोकः। "दीपनिर्वाणगन्धञ्च न जिघ्रन्ति गतायुषः"।

☞ अव, आ, उप+घ्रा—आघ्राणे। ☞

चम् (चमु) भक्षणे—खाना; पीना To eat; to drink—चमति; चमिष्यति। "चचाम मधु माध्वीकम्" भ० १४. ९४.।

☞ आ+चम्—आचमने; आचामति। पाने—"मण्डम् आचामति मृगः" उत्तर० ४. १.। ☞

चर् गतौ (भ्रमणे); भक्षणे च—(१) विचरना; (२) खाना To travel; to eat, graze—चरति; चरिष्यति। (१) "नष्टाशङ्का हरिणशिशवो मन्दमन्दं चरन्ति"; (२) तृणानि चरति।—(३) आचरणे; "शम्बूको नाम तपश्चरति" उत्तर०।

☞ अति+चर्—लङ्घने। अनु+चर्—अनुगमने; सेवायाञ्च। अभि+चर्—(१) अतिक्रमे; "पतिं या नाभिचरति" मनु० ९. १६६; (२) मारणे च; "श्येनेनाभिचरन्"। वि+अभि+चर्—अतिक्रमे; अन्यथाभावे च। आ+चर्—व्यवहारे; "जानन्नपि हि मेधावी जडवल्लोक आचरेत्" मनु० २. ११०.। सम्+आ+चर्—अनुष्ठाने, करणे। उत्+चर्—उदये (उठना); मूत्रपुरीषोत्सर्गे; उच्चारणे च। उत्+चर्+णिच्—उच्चारणे; उच्चारयति। उप+चर्—पूजायाम्, सेवायाम्। परि+चर्—सेवायाम्। वि+चर्—भ्रमणे (डोलना)। वि+चर्+णिच्—मीमांसायाम्, निर्णये; विचारयति। सम्+चर्—गमने; करणकारकका प्रयोग रहनेसे

आत्मनेपदी—अश्वेन सञ्चरते । ⚜

चुम्ब् (चुबि) वक्त्रसंयोगे (चुम्बने)—चूमना To kiss—चुम्बति; चुम्बिष्यति । चुम्बति बालं माता ।

चूष् पाने—चूसना To suck up or out—चूषति । चूषत्याम्रं लोकः ।

जप् मानसे (हृदुच्चारे)—जप करना To repeat internally or mutter—जपति ; जपिष्यति । मन्त्रं जपति साधकः ।

⚜ उप + जप्—भेदे । ⚜

जल्प् कथने—कहना, बात करना To speak, talk—जल्पति ; जल्पिष्यति । "एकेन जल्पन्त्यनल्पाक्षरम्" पञ्च० १. १४७. ।

जि अभिभवे ; उत्कर्षप्राप्तौ च—(१) जीतना ; (२) जययुक्त होना (अक०) To conquer ; to be supreme or pre-eminent—जयति ; जेष्यति । (१) जयति शत्रुं बली ; (२) "जयति रघुवंशतिलकः" महाना० १. ३. ।*

⚜ निर् + जि—अभिभवे । परा + जि—पराजये ; आत्मनेपदी ; पराजयते । वि + जि—(१) पराभवे (सक०) ; (२) उत्कर्षप्राप्तौ च (अक०) ; आत्मनेपदी ; विजयते ; यथा—(१) "चक्षुर्मेचकमम्बुजं विजयते" विद्ध० १. ३३ ; (२) "भो राजन् ! विजयतां भवान्" शकु० ९. । ⚜

---

* "अनभिधानादस्मात् तुबन्त्वोः प्रयोगाभावः, किन्तु तयोः स्थाने तिबन्तौ इति । किञ्च तुपः स्थाने तातङ् दृश्यते, तथा—'भावगम्यलयः कोऽपि जयताद्वागगोचरः' इति ।" इति कविकल्पद्रुमटीकाकृद्दुर्गादासः ।

तक्ष् (तक्षू) तनूकरणे (कृशीकरणे)—छीलना, कतरना To pare, chop, cut off—तक्षति, तक्ष्णोति; तक्षिष्यति, तक्ष्यति। तक्षति तक्ष्णोति काष्ठं तक्षा।

तप् सन्तापे (दाहे; शोके)—सन्तापित करना (दुखाना—सक०); सन्तप्त होना (दुःख पाना—अक०) To burn, to afflict; to suffer pain—तपति; तप्स्यति। "तपति तनुगात्रि! मदनस्त्वाम्" शकु० ३. १७; "तपति न सा किसलयशयनेन" गीतगो० ७.। प्रकाशेऽपि—रविस्तपति ॥ "अर्जनार्थे आत्मनेपदं यक् च—तप्यते तपस्तापसः"—संक्षिप्तसारम्।

❀ अनु+तप्—कर्मकर्त्तरि—पश्चात्तापे (अक०); अनुतप्यते। परि+तप्—परितापे, व्यथायाम् (कर्मकर्त्तरि); "परितप्यते नोत्तमः परवृद्धिभिः" माघ० १६. २३.। सम्+तप्—सन्तापे (कर्मकर्त्तरि); "दिवाऽपि मयि निष्क्रान्ते सन्तप्येते गुरू मम" महाभा०। ❀

तॄ तरणे (अतिक्रमणे); प्लवने (जलोपरिस्थितौ) च—(१) पार होना; (२) तैरना (अक०) To cross; to float—तरति; तरिष्यति। (१) तरति नदीं भेलकेन पान्थः; "तरति सकलदुःखं वामनं भावयेद्यः"; (२) तरति शुष्ककाष्ठं जले।

❀ अति+तॄ—अतिक्रमे। अव+तॄ—अवरोहणे (उतरना)। उत्+तॄ, निर्+तॄ—अतिक्रमे; निस्तरति। प्र+तॄ+णिच्—वञ्चने (ठगना); प्रतारयति। वि+तॄ—दाने। सम्+तॄ—सन्तरणे (पैरना); अतिक्रमे च; "सर्वं ज्ञानप्लवेनैव वृजिनं सन्तरिष्यसि" गीता. ४. ३६.। ❀

त्यज् त्यागे—छोड़ना To leave—त्यजति; त्यक्ष्यति। त्यजति दुष्टलोकं जनः।

⚜ परि+त्यज्, सम्+त्यज्—वर्जने। ⚜

दंश् (दन्श्) दंशने (दन्तव्यापारे)—डसना To bit—दशति; दङ्क्ष्यति। "पदा स्पृशन्तं दशति द्विजिह्वः" र० १४. ४; दशति बिम्बफलं शुकशावकः।

दह् भस्मीकरणे (दाहे; सन्तापे)—(१) जलाना; (२) दुःख देना To burn; to torment—दहति; धक्ष्यति। (१) दहत्यग्निः काष्ठम्; (२) "आत्मकृतमप्रतिहतं चापलं दहति" शकु० ५.।

⚜ निर्+दह्—दाहे; प्रणाशे च; "एनो निर्दहन्त्याशु तपसा" मनु० ११. २४१.। ⚜

दा (दाण्) दाने—देना To give—यच्छति; दास्यति।

⚜ प्र+दा—प्रदाने। ⚜

द्रु गतौ (पलायने); द्रवीभावे च—(१) जाना, भागना; (२) पिघलना (अक०) To run, flow, fly; to melt—द्रवति; द्रोष्यति। (१) "नद्यः समुद्रं द्रवन्ति" गीता. ११. २८; "रक्षांसि भीतानि दिशो द्रवन्ति" गीता. ११. ३६; (२) "द्रवति च हिमरश्मावुद्गते चन्द्रकान्तः" उत्तर० ६. १२.।

⚜ अनु+द्रु—अनुसरणे। उप+द्रु—अभिमुखधावने, आक्रमणे। प्र+द्रु, वि+द्रु—पलायने। ⚜

धे (धेट्) पाने—पीना To drink—धयति; धास्यति। "न वारयेद्गां धयन्तीम्" मनु० ४. ५९.।

ध्मा शब्दे (शङ्खादिवादने) ; अग्निसंयोगे (अग्नेरुज्ज्वलीकरणे, अग्निफुत्कृतौ) च—फूँकना, धौंकना To blow (as a wind-instrument or a fire)—धमति ; ध्मास्यति । धमति शङ्खं जनः (सशब्दं करोति) ; "धमति स्वर्णं वणिक् (अग्निसंयुक्तं करोति); "को धमेच्छान्तञ्च पावकम् ?" महाभा० ।

❀ आ + ध्मा—स्फीतौ (फूलना) ; दर्पाध्मातः ; "आध्मातमुदरं भृशम्" सुश्रुत० । ❀

ध्यै चिन्तने—ध्यान करना To contemplate, meditate upon—ध्यायति ; ध्यास्यति । ध्यायति विष्णुं वैष्णवः ; "ध्यायत्यनिष्टं चेतसा" मनु० ९. २१. ।

❀ अनु + ध्यै—चिन्तायाम् ; अनुग्रहे च । नि + ध्यै—स्मरणे ; दर्शने च ; "चिरं निदध्यौ दुहतः स गोदुहः" माघ० १२. ४०. । ❀

नम् (णम्) नतौ (नमस्करणे ; नम्रीभावे च)—(१) नमस्कार करना (सक०) ; (२) झुकना(अक०) To salute; to bend—नमति ; नंस्यति । (१) नमति गुरुं लोकः ; (२) "नमन्ति फलिनो वृक्षाः" ।

❀ अव, आ + नम्—अवनतौ । उत् + नम्—उन्नतौ । उप + नम्—उपस्थितौ । परि + नम्—परिपाके, जीर्णीभावे—"शाखाभृतां परिणमन्ति न पल्लवानि" भा० ९. ३७ ; रूपान्तरीभावे च (तृतीयाके साथ)—"क्षीरं जलं वा स्वयमेव दधिहिमभावेन परिणमते" शारीरकभाष्यम् । वि + परि + नम्—विरूपावस्थायाम् । प्र + नम्—प्रणामे । ❀

निन्द् कुत्सायाम्—निन्दा करना To blame—निन्दति ; निन्दिष्यति ।

निन्दति दुष्टं लोकः ।

पठ् पाठे (कथने)—पढ़ना To read—पठति ; पठिष्यति । पठति श्लोकं धीरः ।

भण् कथने—कहना To say, speak—भणति ; भणिष्यति । "छिन्न-बन्धे मत्स्ये पलायिते, निर्विण्णो धीवरो भणति—धर्मो मे भविष्य-तीति" विक्रमो० ।

म्ना अभ्यासे (पौनःपुन्येनानुशीलने)—आवृत्ति करना, दुहराना To repeat (in the mind)—मनति ; म्नास्यति । मनति सन्ध्यां ब्राह्मणः ।

आ + म्ना—आवृत्तौ ; उक्तौ च ; "प्रायश्चित्त इव राजदण्डेऽप्ये-नसो निष्क्रयमामनन्ति धर्माचार्याः" महावीर० ४. ।

रक्ष् पालने (रक्षणे)—बचाना, हिफ़ाज़त करना To protect, take care of—रक्षति ; रक्षिष्यति । "आत्मानं सततं रक्षेत्" मनु० ७. २१७. ।

लप् कथने—कहना To speak—लपति ; लपिष्यति । "लपति स्निग्धया वाचा" ।

अप + लप्—अपह्नवे, अस्वीकारे (इनकार करना) । अभि + लप्—कथने । आ + लप्—आलापे (बातचीत करना) । प्र + लप्—प्रलापे, अनर्थकवाक्ये (बकना) । वि + लप्—विलापे (अफ़सोस करना) । सम् + लप्—मिथोभाषणे ।

लिङ्ग् (लिगि) गतौ—लिङ्गति ; लिङ्गिष्यति ।

आ + लिङ्ग्—आलिङ्गने (गले लगाना) To clasp.

वद् कथने—बोलना To say—वदति; वदिष्यति। "सत्यं वदति सर्वत्र"; "वद, प्रदोषे स्फुटचन्द्रतारका विभावरी यद्यरुणाय कल्पते" कु० ९. ४४.।

ॐ वद्+णिच्—वादने (बजाना); वादयति; "वादयते मृदु वेणुम्" गीतगो० ६. ९.। अनु+वद्—अनुकरणे; पुनः कथने च। अप+वद्—निन्दायाम्। अभि+वद्+णिच्—अभिवादने, प्रणामे; "भगवन्! अभिवादये" विक्रमो० ९; "तात! प्राचेतसान्तेवासी लवोऽभिवादयते" उत्तर० ६.। परि+वद्—निन्दायाम्। प्रति+वद्—प्रतिवचने (जवाब देना)। वि+वद्—कलहे; आत्मनेपदी; विवदते। सम्+वद्—सादृश्ये। वि+सम्+वद्—वैलक्षण्ये, विरोधे। ॐ

वम् (टुवम्) उद्गिरणे (वमने)—उगलना To vomit—वमति, वमिष्यति। "फणी पीत्वा क्षीरं वमति गरलम्"।

ॐ उत्+वम्—निःसारणे, प्रकटने। ॐ

वाञ्छ् (वाछि) कामे—इच्छा करना To wish—वाञ्छति; वाञ्छिष्यति। "(धनुर्भृतस्तस्य) प्रियाणि वाञ्छन्त्यसुभिः समीहितुम्" भा० १. १९.।

वृष् (वृषु) सेचने (वर्षणे)—बरसाना To rain or pour down—वर्षति; वर्षिष्यति। "वर्षतीवाञ्जनं नभः" मृच्छ० १. ३४; "काले वर्षन्तु मेघाः" (शक०)।

व्रज् गतौ—(१) जाना; (२) पाना To go; to attain—व्रजति; व्रजिष्यति। (१) "नाविनीतैर्व्रजेद्धुर्यैः" मनु० ४. ६७;

"इयं व्रजति यामिनी, त्यज नरेन्द्र ! निद्रारसम्" विक्रमाङ्कदेवचरितम् ११. ७४ ; (२) "व्रजति शुचिपदं त्वयि प्रीतिमान्" भा० १८. २६ ; "मामेकं शरणं व्रज" गीता. १८. ६६. ।

⚜ अनु + व्रज्—अनुगमने ; समीपगतौ, आश्रये, सहवासे—"मृगा मृगैः सङ्गमनुव्रजन्ति" पञ्च० १. । परि + व्रज्—सन्न्यासपूर्वक-भ्रमणे । प्र + व्रज्—सर्वसङ्गत्याग-पूर्वक-चतुर्थाश्रमग्रहणे । प्र + व्रज् + णिच्—प्रवासने, निर्वासने ; "चतुर्दश समा रामं प्राव्राजयत" र० १२. ६. । ⚜

शंस् (शन्स) कथने ; स्तुतौ च—(१) कहना ; (२) प्रशंसा करना To tell ; to praise—शंसति ; शंसिष्यति । (१) "न मे ह्रिया शंसति किञ्चिदीप्सितम्" र० ३. ५ ; (२) "साधु साध्विति भूतानि शशंसुर्मारुतात्मजम्" रामा० ।

⚜ आ + शंस्—कथने । प्र + शंस्—प्रशंसायाम् । ⚜

शुच् शोके (पुत्रादेरदर्शनाद्दुःखानुभवे)—शोक करना, ग़म खाना To mourn—शोचति ; शोचिष्यति । "न शोचति सदाचारो यो मृतानपि बान्धवान्" ।

⚜ अनु + शुच्—अनुशोचने (अफ़सोस करना) ; "नष्टं मृतमतिक्रान्तं नानुशोचन्ति पण्डिताः" पञ्च० १. ३६३. । ⚜

ष्ठिव् (ष्ठिवु) निरासे (मुखेन श्लेष्मादेर्वमने)—थूकना, उगालना To spit , throw out—ष्ठीवति ; ष्ठेविष्यति । "पोतमिन्दुं ष्ठीवाम" भ० १२. १८. । दिवादिगणीय परस्मैपदीभी होता है ; ष्ठीव्यति ।

⚜ नि + ष्ठिव्—निष्ठीवने (थूकना) ; निक्षेपे च । ⚜

सिध् (षिधु) गत्याम्—जाना—सेधति ; सेधिष्यति ।

सिध् (षिधू) शासने ; माङ्गल्ये च—सेधति ; सेत्स्यति, सेधिष्यति ।

❀ नि + सिध्, प्रति + सिध्—निवारणे (रोकना) ; निषेधति, प्रतिषेधति । ❀

सृ गतौ—चलना To go, move—सरति (वेगगमने—धावति); सरिष्यति ।

❀ अनु + सृ—अनुगमने । अप + सृ—पलायने (हटना, सरकना) । अभि + सृ—सङ्केतस्थानगमने ; 'णिच्'-भी होता है । उत् + सृ + णिच्—दूरीकरणे ; उत्सारयति । उप + सृ—समीपगमने । निर् + सृ—निष्क्रमणे (निकलना) ; निःसरति । प्र + सृ, वि + सृ—व्याप्तौ । सम् + सृ—देहधारणे । ❀

सृप् (सृप्लृ) गतौ—सर्पति ; सर्प्स्यति, स्रप्स्यति ।

❀ अप + सृप्—अपसरणे । उत् + सृप्—उर्द्धगमने ; उल्लङ्घने च । उप + सृप्—समीपगमने । प्र + सृप्, वि + सृप्—गमने ; विस्तारे च (फैलना) । सम् + सृप्—सङ्क्रमणे, सञ्चारे । ❀

स्कन्द् (स्कन्दिर्) गतौ ; शोषणे च ।

❀ अव + स्कन्द्, आ + स्कन्द्—आक्रमणे । प्र + स्कन्द्—लम्फप्रदाने (कूदना) ; पतने च—"तस्य रेतः प्रचस्कन्द" महाभा० । स्कन्द् + णिच्—निःसारणे, विमोचने, पातने ; "एकः शयीत सर्वत्र न रेतः स्कन्दयेत् क्वचित्" मनु० २. १८०. । ❀

स्मृ चिन्तायाम् (स्मरणे)--याद करना To remember, call to mind--स्मरति ; स्मरिष्यति । हरिं स्मरति मुमूर्षुः ।

❀ वि+स्मृ—विस्मरणे (भूलना) । ❀

अनुवाद करो—नमस्यको नमस्कार करना। किसीको कटु वाक्य नहीं कहना। साधुलोग तीर्थ पर्य्यटन करते हैं। जो धर्मका (द्वितीया) आचरण करता है, छोटे बड़े सब उसका (द्वितीया) आदर करते हैं। पुत्र-शोकसे कौशल्यादेवीने विलाप किया था। शरणागतका (द्वितीया) परित्याग करना नहीं चाहिये। प्रातःकालमे प्रतिदिन (अनुदिनम्) अपना पाठ पढ़ना। ईश्वर हमारी (द्वितीया) रक्षा करेंगे। जननी पुत्रका मुख चुम्बन करती है। कभी किसीकी (द्वितीया) निन्दा करनी नहीं चाहिये। सज्जन सर्वदा गुणियोंकी (द्वितीया) प्रशंसा करते हैं। राजा दशरथने रामके लिये अत्यन्त शोक किया और अन्तमे वह मर गया।

भ्वादि अकर्मक परस्मैपदी धातु।

इङ्ग् (इगि) गतौ (चलने, कम्पने)—चलना, हिलना To move, shake—इङ्गति ; इङ्गिष्यति। "त्वया सृष्टमिदं विश्वं यच्चेङ्गं यच्च नेङ्गति" महाभा०। "यथा दीपो निवातस्थो नेङ्गते" गीता. ६. १९. इत्यत्र आत्मनेपदम् आर्षम्।

एज् (एजृ) कम्पने—काँपना, विचलित होना To tremble, stir—एजति ; एजिष्यति। "धृतराष्ट्रोऽयमेजति" महाभा०।

कूज् अव्यक्तशब्दे (कूजने)—चहचहाना To make an inarticulate sound, coo, warble—कूजति ; कूजिष्यति। कूजति कोकिलः ; "चुकूज कूले कलहंसमण्डली" नै० १. २७.।

क्रन्द् (क्रदि) रोदने—रोना To cry, weep—क्रन्दति ; क्रन्दिष्यति। "मा पितः क्रन्द मा तात" महाभा०।—(२) सकरुणाह्वाने च

(रोकर पुकारना—सक०) To call out piteously to any-one ; "क्रन्दत्यविरतं सोऽथ भ्रातृमातृसुतान्" मार्कण्डेयपुराणम् ।

☙ आ + क्रन्द्—रोदने ; आह्वाने च । ❧

क्रीड् विहारे (खेलने)—खेलना To play—क्रीडति ; क्रीडिष्यति । क्रीडति बालः शिशुभिः ।

क्रुश् रोदने ; आह्वाने (चीत्कारे) च—(१) रोना ; (२) चिल्लाना To weep ; to cry out, yell, scream—क्रोशति ; क्रोक्ष्यति । (२) "एष क्रोशति दात्यूहः" रामा० ।

☙ आ + क्रुश्—(१) चीत्कारे ; (२) भर्त्सने च ; "शतं ब्राह्मण-माक्रुश्य क्षत्रियो दण्डमर्हति" मनु० ८. २६७. । वि + क्रुश्—ची-त्कारे ; "आक्रोश विक्रोश लपाधिचण्डम्" मृच्छ० १. ४१. । ❧

क्वण् शब्दे (वीणादिरवे)—झङ्कारना To sound (indistinctly), jingle, tinkle—क्वणति ; क्वणिष्यति । "क्वणन्मणिनूपुरौ" ।

क्षर् सरणे ; मोचने च—(१) बहना, झरना, टपकना ; (२) बहाना, निकालना (सक०) To flow, trickle ; to emit—क्षरति ; क्षरिष्यति । (१) क्षरति क्षतजं क्षतात् ; (२) "स्रोतोभिस्त्रिदश-गजा मदं क्षरन्तः" मा० ७. ८. ।

खेल् (खेट्) क्रीडायाम्—खेलना To play—खेलति ; खेलिष्यति ।

"भास्वत्कन्या सैका धन्या
यस्याः कूले कृष्णोऽखेलत् ॥" छन्दोमञ्जरी ।

गर्ज् शब्दे (गर्जने)—गरजना, गाजना To roar, growl ; to emit a deep and thundering sound, thunder—

गर्जति ; गर्जिष्यति। गर्जति सिंहः ; गर्जति वारिदपटली ; "गर्जति शरदि न वर्षति, वर्षति वर्षासु निःस्वनो मेघः" ; "रणे न गर्जन्ति वृथा हि शूराः" रामा०।

गल् क्षरणे ; पतने च—(१) झरना ; (२) गिरना To ooze ; to drop or fall down—गलति ; गलिष्यति। (१) "स्वयं हाराकारा गलति जलधारा कुवलयात्" (२) "प्रतोदा जगलुः" भ० १४. ९९।—(३) नाशे To vanish ; "किं शास्त्रं ? श्रवणेन यस्य गलति द्वैतान्धकारोदयः" भामिनी० १. ८४।

❦ निर् + गल्—निःसरणे ; निष्कर्षे च—इति निर्गलितोऽर्थः। वि + गल्—भ्रंशे। ❦

गुञ्ज् (गुजि) अव्यक्तशब्दे (गुञ्जने)—गुनगुनाना, भिनभिनाना To hum, buzz—गुञ्जति ; गुञ्जिष्यति। "अयि दलदरविन्द ! स्यन्दमानं मरन्दं तव किमपि लिहन्तो मञ्जु गुञ्जन्तु भृङ्गाः" भामिनी० १. ४।

ग्लै विषादे ; क्लमे च—उदास होना ; थकना To be dejected ; to be fatigued—ग्लायति ; ग्लास्यति। ग्लायति लोकः शोकात्।

चञ्च् (चञ्चु) चलने—चलना, हिलना To move, shake—चञ्चति। "चण्डि चञ्चन्ति वाताः" छन्दोमञ्जरी।

चल् कम्पने (अस्थैर्ये) ; गतौ च—(१) काँपना (अस्थिर होना), हिलना ; (२) जाना (सक०) To shake ; to go—चलति ; चलिष्यति। (१) "न चलति खलु वाक्यं सज्जनानां कदाचित्" ;

(२) "चल सखि ! कुञ्जम्" गीतगो० ६. ११.।

❧ उत्+चल्—प्रस्थाने। प्र+चल्—गमने; कम्पे; प्रसिद्धौ च। वि+चल्—कम्पे; क्षोभे; भ्रंशे च। ❧

च्युत् (च्युतिर्) क्षरणे (स्खलने च)—चूना; गिरना To trickle; to slip—च्योतति; च्योतिष्यति।

जीव् प्राणधारणे (जीवने)—जीता रहना To live—जीवति; जीविष्यति। "त्वयि जीवति जीवामि"।—(२) जीविकानिर्वाहे (गुज़रान करना To subsist on); "स्वाहाराद् किञ्चिदुद्धृत्य ददाति, तेनासौ जीवति" हितो०।

"चौराः प्रमत्ते जीवन्ति, व्याधितेषु चिकित्सकाः।
प्रमदाः कामयानेषु, यजमानेषु याचकाः।
राजा विवदमानेषु, नित्यं मूर्खेषु पण्डिताः॥" महाभा०।

❧ अनु+जीव्, उप+जीव्—आश्रये। उत्+जीव्—पुनर्जीवने। सम्+जीव्—जीवने। ❧

ज्वर् रोगे—रोगग्रस्त होना, बीमार होना; ज्वरयुक्त होना To be diseased; to be feverish—ज्वरति; ज्वरिष्यति। "एतस्मिन् भ्रान्तिकालेऽयं शरीरेषु ज्वरत्स्वयं। स्वयमेव ज्वरामीति मन्यते हि कुटुम्बिवत्॥" पञ्चदशी. ७. ३२.।

ज्वल् दीप्तौ (ज्वलने)—जलना To shine, blaze—ज्वलति; ज्वलिष्यति। ज्वलति वह्निः।—दाहे; "धिगिदमंशुकं ज्वलति" रत्ना० ४. १७.।

❧ उत्+ज्वल्, प्र+ज्वल्—दीप्तौ। ❧

दल् भेदे—फटना To crack—दलति; दलिष्यति। "दलति न सा हृदि विरहभरेण" गीतगो० ७. ३९. ।—(२) विकासे (खिलना) To bloom; "दलन्नवनीलोत्पलश्यामलं देहसौभाग्यम्" उत्तर० १.।

ध्वन् रवे—ध्वनि करना; बजना To sound—ध्वनति; ध्वनिष्यति। "अयं धीरं धीरं ध्वनति नवनीलो जलधरः" भामिनी० १. ९९; ध्वनति मृदङ्गः।

नट् नर्त्तने—नाचना To dance—नटति।

❀ नट्+णिच्—नटयति; "तत् त्वां पुनः पलितवर्णकभाजमेनं नाट्येन केन नटयिष्यति दीर्घमायुः" (इत्यात्मानं प्रति कञ्चुकी-वाक्यम्) अनर्घ० ३. १८।

नद् (णद्) शब्दे—नाद करना To sound—नदति। नदति घण्टा। "नवाम्बुमत्ताः शिखिनो नदन्ति" घटकर्परः २.।

नन्द् (टुनदि) हर्षे—खुश होना To be glad—नन्दति; नन्दिष्यति। "ननन्द पश्यन्नुपसीम स स्थलीः" भा० ४. २.।

❀ अभि+नन्द्—सत्कारे; प्रशंसायाम्; अनुमोदने; कामनायाञ्च। आ+नन्द्—आनन्दे। प्रति+नन्द्—संवर्द्धने, सम्मानने। ❀

फल् निष्पत्तौ (पूर्त्तौ)—फलना, सफल होना To be fruitful—फलति; फलिष्यति। "भाग्यं फलति सर्वत्र"।—(२) निष्पादने (सक०) To accomplish; "फलन्ति विविधश्रेयांसि मन्त्रा-तयः" मुद्रा० २. १६; "वाल्मीकिः फलति स्म दिव्या गिरः" अनर्घ० १. ८.।

प्रति + फल्—प्रतिबिम्बने ।

फुल्ल् विकासे—फूलना To bloom, expand—फुल्लति । फुल्लति मल्लीकलिका ।

भ्रम् चलने (भ्रमणे)—घूमना To rove, ramble—भ्रमति ; भ्रमिष्यति । "भ्रमति भुवने कन्दर्पाज्ञा" मालती० १. २०. । क्वचित् सकर्मकोऽपि ; "दिङ्मण्डलं भ्रमसि मानस ! चापलेन" भर्तृ०; भिक्षां भ्रमति ।

उत् + भ्रम्—परिभ्रमणे ।

मील् निमेषे (सङ्कोचे)—मूँद जाना, सकुड़ना To be closed or shut (as eyes or flowers)—मीलति ; मीलिष्यति । मीलति चक्षुः (पक्ष्मभिरावृतं स्यात्) ; "मीलन्ति रिपुनारीणां मुखपद्मवनानि च" ।

उत् + मील्—उन्मेषे, विकासे । नि + मील्—मुद्रणे ।

मूर्च्छ् (मूर्च्छा) मोहे (ज्ञानरहितीभावे) ; वृद्धौ च—(१) बेहोश होना; (२) बढ़ना To faint or swoon ; to increase—मूर्च्छति ; मूर्च्छिष्यति । (१) मूर्च्छति रोगी ; (२) "मुमूर्च्छ सख्यं रामस्य" र० १२. ५७. ।

म्लै कान्तिक्षये—मलिन होना To fade—म्लायति ; म्लास्यति । म्लायति चन्द्रो दिवसे । "धनोष्मणा म्लायत्यलं लतेव मनस्विता" श्रीहर्षचरितम् ।

यम् उपरमे (निवृत्तौ)—परहेज़ करना To abstain from—यच्छति ; यंस्यति । यच्छति पापात् साधुः ।—(२) निग्रहे च

(सक०) To control; "धियं यच्छ च बुद्धिसाक्षिणि" विवेकचूडामणिः ३७०.।

❀ आ + यम्—दीर्घीकरणे। उत् + यम्—उत्तोलने; उद्योगे च। उप + यम्—विवाहे; स्वीकारे च। सब आत्मनेपदी, यथा—आयच्छते, उद्यच्छते, उपयच्छते। नि + यम्—दमने, निवारणे, शासने, व्यवस्थापने। प्र + यम्—दाने। सम् + यम्—नियमने; बन्धने च।❀

रस् शब्दे—आवाज़ करना To roar; to sound—रसति; रसिष्यति। "करीव वन्यः परुषं ररास" र० १६. ७८; "राजन्योपनिमन्त्रणाय रसति स्फीतं यशोदुन्दुभिः" वेणी० १. २९; "रसतु रसना" गीतगो० १०. ६.।

रुह् उद्भवे—उत्पन्न होना To grow—रोहति; रोक्ष्यति। "छिन्नोऽपि रोहति तरुः" भर्तृ०।

❀ रुह् + णिच्—रोपणे (रोपना, बोना); रोपयति। अधि + रुह्, आ + रुह्—आरोहणे (चढ़ना—सक०); "मूर्द्धानमधिरोहति" माघ० २. ४६; "सिंहासनमारुरोह" काद०। अव + रुह्—अवतरणे (उतरना)। प्र + रुह्, वि + रुह्, सम् + रुह्—उत्पत्तौ; "न पर्वताग्रे नलिनी प्ररोहति" मृच्छ० ४. १७.। वि + रुह् + णिच्—व्रणप्रशमने (घाव आराम करना) To heal (as a wound); व्रणं विरोपयति।❀

लग् (लगे) सङ्गे—लगना To adhere or stick to—लगति; लगिष्यति। ओष्ठेऽधरो लगति; "हंसस्य पश्चाल्लगति स्म" नै० ३. ८.।

लड् विलासे (क्रीडायाम्)—खेलना To play, sport—लडति। ड-लयोरेकत्वस्मरणात्—ललति। "पनसफलानीव वानरा ललन्ति" मृच्छ० ८.८, "गजकलभा इव बन्धुला ललाम." मृच्छ० ४. २८.।

लस् दीप्तौ—चमकना To shine, glitter—लसति ; लसिष्यति। "मुक्ताहारेण लसता हसतीव स्तनद्वयम्" काव्यप्रकाशः १० ; "मण मसृणवाणि! करवाणि चरणद्वय सरसलसदलक्तकरागम्" गीतगो० १०. ७ ; "रौप्य लसद्विम्बमिवेन्दुबिम्बम्" नै० २२. ६३.।

❀ उत्+लस्—स्फुरणे। वि+लस्—प्रकाशे ; क्रीडायाञ्च। ❀

वल्ग् गतौ (चलने ; प्लुतगतौ)—(१) हिलना ; (२) कूदना, झपटना, सरपट जाना To move, shake ; to bounce, go by leaps, gallop—वल्गति ; वल्गिष्यति। (१) "वल्गद्गरीयः-स्तनकम्प्रकञ्चुकम्" माघ० १२. २० ; (२) "ववल्गुश्च पदातयः" भ० १४. ९ ; "वल्गु वल्गन्ति सूक्तयः" पञ्च० १. ६६ ; "विद्या-सद्मविनिर्गलत्कणमुषो वल्गन्ति चेत् पामराः" (सगर्व विचरन्ति इत्यर्थः) भामिनी० १ ७१.।—(३) नर्त्तने (नाचना) To dance, prance ; "द्वारे हेमविभूषणाश्च तुरगा वल्गन्ति यद् दर्पिताः" भर्तृ० ; "कबन्धाद्भूयो बिभ्ये वल्गतः सामिपाणेः" माघ० १८. ५३.।

वस् निवासे—बसना, रहना To reside, stay—वसति ; वत्स्यति। "वसति वने वनमाली" गीतगो० ५. ८ ; "वसन्ति हि प्रेम्णि गुणा न वस्तुनि" मा० ८. ३७.।

❀ अधि+वस्, आ+वस्—वासे (सक०)। उप+वस्—

उपवासे, भोजननिवृत्तौ ; "एकादशीमुपवसन्ति निरम्बुभक्षाः" । नि+वस्—निवासे । निर्+वस्+णिच्—निर्वासने, नगराद्बहिष्करणे (निकाल देना) ; निर्वासयति । प्र+वस्—विदेशावस्थाने । प्र+वस्+णिच्, वि+वस्+णिच्—निर्वासने । प्रति+वस्—निवासे । ❦

वेल्ल् कम्पने—हिलना, चलना To shake, move about—वेल्लति ; वेल्लिष्यति । "उद्वेल्लन्ति पुराणचन्दनतरुस्कन्धेषु कुम्भीनसाः" उत्तर० २. २९. ।

श्च्युत् (श्च्युतिर्) क्षरणे—टपकना To trickle—श्च्योतति ; श्च्योतिष्यति । "मधुनो धाराः श्च्योतन्ति" उत्तर० ३. ३४. ।

सञ्ज् (षञ्ज्) सङ्गे (संश्लेषे)—चिपटना To stick or adhere to—सजति ; सङ्क्ष्यति । "सजति वपुषि वासः" ।

❦ अनु+सञ्ज्—सम्बन्धे ; आसक्तौ (कर्मकर्त्तरि) ; अनुषज्यते ; "धर्मपूते च मनसि नभसीव न जातु रजोऽनुषज्यते" दशकु० । अव+सञ्ज्, आ+सञ्ज्—योजने, स्थापने । प्र+सञ्ज्—आसक्तौ ; "प्रसजन्निन्द्रियार्थेषु नरः पतनमृच्छति"; कर्मकर्त्तरि—प्रसङ्गे, सम्बन्धे—प्रसज्यते । ❦

सद् (षद्लृ) विषादे (आकुलीभावे)—उदास होना To be dejected or low-spirited—सीदति ; सत्स्यति । "सीदति राधा वासगृहे" गीतगो० ६. २. ।—उपवेशने ; नाशे ; क्लेशे ; क्लान्तौ च ।

❦ अव+सद्—श्रान्तौ ; विनाशे च । आ+सद्—सन्निकर्षे

(नजदीक आना)। उत्+सद्—नाशे। उत्+सद्+णिच्—उन्मूलने; उत्सादयति। उप+सद्—समीपगतौ। नि+सद्—उपवेशने; "उष्णालुः शिशिरे निषीदति तरोर्मूलालवाले शिखी" विक्रमो० २.२३.। प्र+सद्—अनुग्रहे; प्रसन्नतायाम् (खुश होना); निर्मलीभावे च (साफ होना)। वि+सद्—विषादे; विषीदति। शुः

स्खल् सञ्चलने (स्खलने, भ्रंशे)—खिसलना, फिसलना, रपटना To stumble, slip—स्खलति; स्खलिष्यति। "स्खलति चरणं भूमौ" मृच्छ० ९ १३; स्खलति पत्रं वृक्षस्य।

स्रु क्षरणे—बहना, झरना To flow, ooze—स्रवति; स्रोष्यति। "न हि निम्बात् स्रवेत् क्षौद्रम्" रामा०।

स्वन् शब्दे—शब्द करना To sound; to hum (as a bee)—स्वनति। "पेचरः कीचकास्ते स्युर्ये स्वनन्त्यनिलोद्धताः" अमरकोषः।

ह्रस् अल्पीभावे—घटना To become small or diminished or lessened—ह्रसति; ह्रसिष्यति। "आयुर्ह्रसति पादशः" मनु० १. ८३.।

अनुवाद करो—राजा दशरथ कैकेयीके उस कठोर वाक्यसे मूर्च्छित हुआ। इस वर्ष दुर्भिक्षके कारण हम अतिकष्टसे जीते हैं। सर्वदा साधुके सङ्गमें वास करना चाहिये। इस स्थानमें प्रतिदिन लड़के खेलते हैं। तुम्हारे व्यवहारसे वे सर्वदा सन्तप्त होते हैं। यहाँ बहुत आमके पेड़ उगे थे। मेरी बातसे वे हसेंगे, परन्तु मेरा चित्त उससे कुछभी विचलित नहीं होगा। मैं इस गांवमें और नहीं बसूंगा।

भ्वादि सकर्मक आत्मनेपदी धातु ।

लभ् (डुलभष्) प्राप्तौ—पाना To gain.

(लभते धार्मिकः सुखम् ।)

लट् ।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	लभते	लभेते	लभन्ते
मध्यमपुरुष	लभसे	लभेथे	लभध्वे
उत्तमपुरुष	लभे	लभावहे	लभामहे

लोट् ।

प्रथमपुरुष	लभताम्	लभेताम्	लभन्ताम्
मध्यमपुरुष	लभस्व	लभेथाम्	लभध्वम्
उत्तमपुरुष	लभै	लभावहै	लभामहै

लङ् ।

प्रथमपुरुष	अलभत	अलभेताम्	अलभन्त
मध्यमपुरुष	अलभथाः	अलभेथाम्	अलभध्वम्
उत्तमपुरुष	अलभे	अलभावहि	अलभामहि

विधिलिङ् ।

प्रथमपुरुष	लभेत	लभेयाताम्	लभेरन्
मध्यमपुरुष	लभेथाः	लभेयाथाम्	लभेध्वम्
उत्तमपुरुष	लभेय	लभेवहि	लभेमहि

लृट् ।

प्रथमपुरुष	लप्स्यते	लप्स्येते	लप्स्यन्ते

	एकवचन	द्विवचन	बहुवचन
मध्यमपुरुष	लप्स्यसे	लप्स्येथे	लप्स्यध्वे
उत्तमपुरुष	लप्स्ये	लप्स्यावहे	लप्स्यामहे

❀ आ + लभ्—प्राप्तौ ; स्पर्शे ; हिंसायाञ्च । उप + आ + लभ्—भर्त्सने । उप + लभ्—प्राप्तौ ; अनुभवे ; ज्ञाने च । वि + प्र + लभ्—प्रतारणायाम् । ❀

* * * *

भ्वादि सकर्मक आत्मनेपदी धातु ।

अय् गतौ—अयते ; अयिष्यते ।

❀ प्र, परा + अय्—पलायने (भागना) ; प्लायते, पलायते । ❀

ईक्ष् दर्शने—देखना To see—ईक्षते ; ईक्षिष्यते । ईक्षते चन्द्रं लोकः ।

—(२) पर्य्यालोचने (सोचना, विचारना) To consider ; "न कामवृत्तिर्वचनीयमीक्षते" कु० ५. ८२. ।

❀ अप + ईक्ष्—अपेक्षायाम् (दहरना) । अव + ईक्ष्—परिदर्शने ; आलोचनायाञ्च । उप + ईक्ष्—अवज्ञायाम् । निर् + ईक्ष्—निरीक्षणे (देखना) । परि + ईक्ष्—परीक्षायाम् । प्र + ईक्ष्—दर्शने । उत् + प्र + ईक्ष्—उत्प्रेक्षणे, सम्भावने (क़ियास करना To guess) । प्रति + ईक्ष्—प्रतीक्षायाम् । वि + ईक्ष्—दर्शने । सम् + ईक्ष्—परिदर्शने ।

ऊह् वितर्के (अध्याहारे ; सम्भावने)—(सन्देहाद्विचारो वितर्कः)—विचार करना, अनुमान करना To conjecture, infer—ऊहते ; ऊहिष्यते । "ऊहते धर्मं धीरः" । "अनुक्तमप्यूहति

"पण्डितो जनः" पञ्च० १. ४४—इत्यत्र परस्मैपदं दृश्यते।

❀ अप + ऊह—अपनोदने; "हुङ्कारेणैव धनुषः स हि विघ्नानपोहति" शकु० ३. १.। ("उपसर्गादात्मनेपदं वेति वक्तव्यम्"—उपसर्गके योगसे विकल्पसे आत्मनेपदी होता है)। वि + अप + ऊह्—विनाशे; "आदित्यस्तमो व्यपोहति" महाभा०। प्रति + ऊह्—विघाते। वि + ऊह्—रचनायाम्, विन्यासे। सम् + ऊह्—समाहारे, एकत्रीकरणे। ❀

कत्थ् श्लाघायाम् (आत्मगुणाविष्करणे)—प्रशंसा करना; गर्व करना (अक०) To praise; to boast—कत्थते; कत्थिष्यते। "कत्थते गुणिनं गुणी"; "यः स्वप्नेनापि नात्मीयं गुणं कुत्रापि कत्थते"। "कृत्वा कत्थिष्यते न कः?" भ० १६. ४.।

❀ वि + कत्थ्—विकत्थने, श्लाघायाम्, निजगुणख्यापने (शेखी करना To vaunt)।

कम् (कमु) वाञ्छायाम्—कामना करना To long for, wish—कामयते; कामयिष्यते। "चेतोनलङ्कामयते मदीयम्" नै० ३. ६७.।

क्षम् (क्षमूष्) सहने (क्षमायाम्; शक्तौ च)—(१) सहना, क्षमा करना; (२) सकना (अक०) To forgive; to endure; to be competent or able (to do anything)—क्षमते; क्षमिष्यते, क्षंस्यते। (१) "क्षमस्व परमेश्वर!"; "नाज्ञाभङ्गकरान् राजा क्षमेत स्वसुतानपि" हितो० २. १०७; (२) "ऋते रवेः क्षालयितुं क्षमेत कः क्षपातमस्काण्डमलीमसं नभः?" माघ० १. ३८.।

गर्ह् कुत्सायाम्—निन्दा करना To blame, censure—गर्हते ; गर्हिष्यते ।

⁂ वि+गर्ह्—निन्दायाम् । ⁂

गाह् (गाहृ) विलोडने (प्रवेशे ; प्राप्तौ च)—(१) आलोडन करना ; (२) घुसना ; (३) प्राप्त होना To dive or plunge into ; to enter deeply into—गाहते ; गाहिष्यते, घाक्ष्यते । (१) "गाहन्तां महिषा निपानसलिलम्" शाकु० २. ४२ ; "गाहते शास्त्रमत्यर्थम्" ; (२) "कदाचित् काननं जगाहे" काद० ; (३) "मनस्तु मे संशयमेव गाहते" कु० ५. ४६. ।

⁂ अव+गाह्—निमज्जने, स्नाने ; प्रवेशे च ; "तमोऽपहन्त्रीं तमसां वगाह्य" र० १४. ७६. । वि+गाह्—निमज्जने ; प्रवेशे ; विलोडने च । ⁂

ग्रस् (ग्रसु) भक्षणे—खाना To swallow, devour—ग्रसते ; ग्रसिष्यते । "यावतो ग्रसते ग्रासान्" मनु० ३. १३३. ।—(२) आक्रमणे To seize ; to eclipse ; "हिमांशुमाशु ग्रसते तन्म्रदिम्नः स्फुटं फलम्" माघ० २. ४९. ।

ढौक् (ढौकृ) गतौ—जाना To go, approach ; "श्रान्तं वने रात्रिचरी डुढौके" भ० २. २३. ।

⁂ ढौक्+णिच्—प्रापणे (ले जाना) ; "तन्मांसञ्चैव गोमायोस्तैः क्षणाद्राशु ढौकितम्" महाभा० । उप+ढौक्—उपढौकने, उपहारे (वखशना, नज़र करना) ; "एकैकं पशुमुपढौकयामः" पञ्च० १. । ⁂

त्र* (त्रैङ्) पालने (रक्षणे)—त्राण करना To protect, defend from—त्रायते ; त्रास्यते । "क्षतात् किल त्रायत इत्युदग्रः क्षत्रस्य शब्दो भुवनेषु रूढः" र० २. ५३. ।

❦ परि+त्रै—परित्राणे (रक्षणे) । ❦

दय् अनुकम्पायाम्—दया करना To pity—दयते ; दयिष्यते । दयते दीनं दयालुः ; "तेषां दयसे न कस्मात्?" भ० २. ३३ (अत्र कर्मणि षष्ठी) ।

नाथ् (नाथृ) याचने—प्रार्थना करना To beg—नाथते ; नाथिष्यते । "मोक्षाय नाथते मुनिः" ; "नाथसे किमु पतिं न भूभृतः?" मा० १३. ५९. । "सन्तुष्टमिष्टानि तमिष्टदेवं नाथन्ति के नाम न लोकनाथम्?" नै० ३. २५—इत्यत्र परस्मैपदमपि ।

पण् व्यवहारे (क्रयविक्रयरूपे वाणिज्ये)—ख़रीद व फ़रोख़्त करना To buy and sell—पणते ; पणिष्यते ।—द्यूतक्रीडायां ग्लहस्थापने (बाज़ी लगाना To bet or stake at play) ; जिस वस्तुका पण रखा जाता है, उसमे षष्ठी, और कहीं द्वितीयाभी होती है ; "प्राणानामपणिष्टासौ" भ० ८. १२१ ; "पणस्व कृष्णां पाञ्चालीम्" महाभा० ।

❦ वि+पण्—विक्रये ; "आभीरदेशे किल चन्द्रकान्तं त्रिभिर्वराटैर्विपणन्ति गोपाः" सुभाषितम् । ❦

बाध् (बाधृ) पीडने ; प्रतिबन्धे च—(१) दुख देना ; (२) रोकना

---

* शिष्टप्रयोगमे अदादिगणीय 'त्रा'-धातुभी है ; यथा—"त्राहि मां मधुसूदन !" ।

To torment ; to obstruct—बाधते ; बाधिष्यते। (१) "मां बाधते न हि तथा विपिनेषु वासः" महाना० ३. ३७ ; "न तथा बाधते स्कन्धो यथा 'बाधति' बाधते" ; (२) "वीराणां समयः स्नेहकर्म बाधते" उत्तर० ६. ११.।

❀ आ+बाध्—दमने। प्र+बाध्—परिपीडने। ❀

भाष् कथने—भाषण करना To speak—भाषते ; भाषिष्यते। द्विकर्मक—"तं वाक्यमिदं बभाषे"।

❀ अप+भाष्—निन्दायाम् ; "न केवलं यो महतोऽपभाषते, शृणोति तस्मादपि यः स पापभाक्" कु० ५. ८३.। आ+भाष्—आलापे, कथने। प्रति+भाष्—प्रत्युक्तौ। सम्+भाष्—सम्भाषणे। ❀

भिक्ष् याचने—माङ्गना To beg—भिक्षते ; भिक्षिष्यते। द्विकर्मक—भिक्षते दातारं धनं भिक्षुः।

रभ्—आ+रभ्—आरम्भे To begin—आरभते ; आरप्स्यते। शास्त्रं पठितुम् आरभते शिष्यः।

❀ परि+रभ्—आलिङ्गने। सम्+रभ्—कोपे। ❀

लोक् (लोकृ) दर्शने—देखना To behold—लोकते ; लोकिष्यते।

❀ अव+लोक्, आ+लोक्, वि+लोक्—दर्शने। ❀

वन्द् (वदि) अभिवादने ; स्तुतौ च—नमस्कार करना ; स्तव करना To salute ; to extol—वन्दते ; वन्दिष्यते। वन्दते गुरुं लोकः।

वेष्ट् वेष्टने—वेरना ; लपेटना To surround, envelop; to wind or twist round—वेष्टते।—णिजन्तभी इसी अर्थमे प्रयुक्त

होता है ; वेष्टयति ; "ग्रीवायां वेष्टयित्वैनं स गजो हन्तुमैहत । कर-वेष्टं भीमसेनो भ्रमं दत्त्वा व्यमोचयत् ॥" महाभा० ।

❀ णिजन्त आ + वेष्ट् और परि + वेष्ट् भी एतदर्थक। सम् + वेष्ट् + णिच्—तह् करना To fold ; "संवेष्टितप्रसारितपटन्यायेनैवानन्यत् कारणात् कार्य्यम्" शारीरकभाष्यम् । ❀

शङ्क् (शकि) संशये ; त्रासे च—(१) शङ्का करना, सन्देह करना ; (२) डरना (अक०) To doubt; to fear—शङ्कते ; शङ्किष्यते । (१) शङ्कते पुरुषत्वं स्थाणौ (स्थाणुर्वा पुरुषो वा इति संशयमारोपयती-त्यर्थः) ; (२) शङ्कते व्याघ्राज्जनः ।

❀ आ + शङ्क्—सन्देह । ❀

शंस् (शसि) इच्छायाम् ; आशिषि (इष्टार्थशंसने) च—(१) चाहना; (२) आशीर्वाद करना To hope for ; to bless—नित्यम् 'आङ्'-योगः—आ + शंस्—आशंसते ; आशंसिष्यते । (१) "मनो-रथाय नाशंसे" शकु० ७. १३ ; (२) "इत्याशशंसे करणैरबाह्यैः" र० १४. ५०. ।

शिक्ष् विद्याग्रहणे (शिक्षणे)—सीखना To learn—शिक्षते ; शिक्षि-ष्यते । "अशिक्षतास्त्रं पितुरेव मन्त्रवित्" र० ३. ३१. ।

श्लाघ् (श्लाघृ) कत्थने (प्रशंसायाम्)—सराहना To commend—श्लाघते ; श्लाघिष्यते । "श्लाघते गुणिनं गुणी" ।

"गुण-दोषौ बुधो गृह्णन् , इन्दु-क्ष्वेडाविवेश्वरः ।
शिरसा श्लाघते पूर्वं, परं कण्ठे नियच्छति ॥"

सह् (षह्) सहने ; क्षमायाञ्च—(१) सहना ; (२) क्षमा करना

To endure; to forgive—सहते; सहिष्यते। (१) सहते दुःखं सुजनः; (२) "अपराधमिमं ततः सहिष्ये" शाकु० ३.।—(३) शक्तौ (सकना); "सहतां च शास्त्रगम्य उपायः तत् (दुःखत्रयम्) उच्छेत्तुम्" साङ्ख्यतत्त्वकौमुदी १.।

✤ उत्+सह्—उत्साहे, सामर्थ्यं (सकना) Expressed by 'can'—dare, venture; "तवानुवृत्तिं न च कर्तुमुत्सहे" कु० ६.६९.। ✤

सेव् आराधने; उपभोगे; आश्रये च—सेवा करना To worship; to enjoy; to resort to—सेवते; सेविष्यते। विष्णुं सेवते—सुखं सेवते—तीर्थं सेवते साधुः।

✤ आ+सेव्—उपभोगे। नि+सेव्—आश्रये; उपभोगे च; निषेवते। ✤

स्वञ्ज् (ष्वञ्ज्) आलिङ्गने—गले लगाना, बग़लगीरी करना To embrace—स्वजते; स्वङ्क्ष्यते। स्वजते तनयं माता।

✤ परि+स्वञ्ज्—आलिङ्गने; परिष्वजते। ✤

स्वद् (ष्वद्) आस्वादने (अनुभवे); रुचौ च—(१) चखना; (२) रुचना (अक०) To taste, relish; to be pleasant to the taste—स्वदते; स्वदिष्यते। (१) स्वदस्व हव्यानि; "स्वदते विविधं स्वादु"; (२) "अपां हि तृप्ताय न वारिधारा स्वादुः सुगन्धिः स्वदते तुषारा" नै० ३.९३.।

अनुवाद करो—कभी सत्कार्य्यमें बाधा मत डालो। सर्वान्तःकरणसे गुरुजनोंकी (द्वितीया) सेवा करूंगा। अपव्यवहारसे उनको पीड़ा देना उचित

नहीं । जो दुःखीपर दया करता है, ईश्वर उसका सहाय । सद्विषय बालकके पासभी सीखना । शिक्षक सर्वदा हमारा मङ्गल चाहते हैं । आज तुम्हारी परीक्षा करूंगा । दीनका (द्वितीया) त्राण करो, नहीं तो ईश्वर तुम्हारा (द्वितीया) त्राण नहीं करेंगे । साधुपुरुष जब जिस कार्य्यका (द्वितीया) आरम्भ करते हैं, प्राणान्तमेभी (प्राणात्ययेऽपि) उसे नहीं छोड़ते । मैं तेरे शत अपराध क्षमा करूंगा । पिता पुत्रका (द्वितीया) आलिङ्गन करता है । राम मेरी (द्वितीया) प्रतीक्षा कर रहा है ।

भ्वादि अकर्मक आत्मनेपदी धातु ।

ईह् वाञ्छायाम् ; चेष्टने च—(१) इच्छा करना ; सक० ; (२) यत्न करना, कोशिश करना To wish ; to endeavour—ईहते ; ईहिष्यते । (१) "ईहन्ते कामभोगार्थमन्यायेनार्थसञ्चयान्" गीता. १६. १२ ; (२) माधुर्य्यं मधुविन्दुना रचयितुं क्षाराम्बुधेरीहते" भर्तृ० ।

❦ सम् + ईह्—"सर्वः स्वार्थं समीहते" माघ० २. ६९. । ❦

एध् वृद्धौ—बढ़ना To increase ; to prosper—एधते ; एधिष्यते । "हिंसारतश्च यो नित्यं नेहासौ सुखमेधते" मनु० ४. १७० ; "अधर्मेणैधते तावत् ततो भद्राणि पश्यति । ततः सपत्नान् जयति, समूलस्तु विनश्यति ।।" मनु० ४. १७४. ।

कण्ठ् (कठि) शोके (उत्कण्ठायाम्, औत्सुक्ये)—शोक इह आध्यानम् (उत्कण्ठापूर्वकस्मरणम्)—उत्कण्ठित होना, उत्सुक होना To be anxious for, yearn, long for ; be eagerly desirous of, remember with regret—'उत्' उपसर्ग-

के साथ प्रयुक्त होता है—उत्कण्ठते ; उत्कण्ठिष्यते। "स्वगांय नोत्कण्ठते" विक्रमो० ३.४ ; "उत्कण्ठते च युष्मत्सन्निकर्षस्य" उत्तर० ६ ; "रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते"।

कम्प् (कपि) चलने (कम्पते)—काँपना To shake—कम्पते ; कम्पिष्यते। कम्पते वायुना वृक्षः।

अनु+कम्प्—दयायाम्। सम्+अनु+कम्प्—सानुग्रहे। उत्, प्र, वि+कम्प्—प्रकम्पते।

काश् (काशृ) दीप्तौ (प्रकाशे)—चमकना To shine—काशते ; काशिष्यते। काशते चन्द्रः।

प्र+काश्—प्रकाशे। प्र+काश्+णिच्—प्रकाशने (उजाला करना) ; प्रकाशयति ; "प्रकाशयति लोकं रविः" गीता. १३. ३३.। वि+काश्—विकाशे।

कृप् (कृपू) सामर्थ्य ; योग्यभावाद—(१) समर्थ होना ; (२) योग्य होना To serve, to be able; to be fit or adequate for—कल्पते ; कल्पिष्यते, कल्प्स्यते। (१) "सूर्ये तपत्यावरणाय दृष्टेः कल्पेत लोकस्य कथं तमिस्रा ?" र० ५. १३ ; (२) "प्रतिकारविधानमायुषः सति शेषे हि फलाय कल्पते" र० ८. ४१.।

अव+कृप्—औचित्ये। उप+कृप्—विन्यासे ; सम्पादनार्थाय। वि+कृप्—संशये।

गल्भ् धाष्ट्र्य (प्रगल्भतायाम्, औद्धत्ये, साहसे) उद्धत होना, साहसी होना To be bold or confident—गल्भते। प्रायः 'प्र' उपसर्ग के साथ प्रयुक्त होता है ; "न मौक्तिकच्छिद्रकरी शलाका

प्रगल्भते कर्मणि टङ्किकायाः" विक्रमाङ्कदेवचरितम् १. १६; "अति हि नाम प्रगल्भसे" उत्तर० ५. ।—सामर्थ्ये ('सकना' इस अर्थमे) 'तुमुनन्त'-पदके साथ व्यवहृत होता है ।

घट् चेष्टायाम् (यत्ने); आपतने, निष्पत्तौ; योग्यतायाञ्च—(१) व्यापृत होना ; (२) आ पड़ना, सिद्ध होना ; (३) सम्भव होना, योग्य होना To be busy with or strive after ; to happen ; to be possible—घटते ; घटिष्यते । (१) घटते पठितुं शिष्यः ; (२) "कृत्यं घटेत सुहृदो यदि" मालती० १. ९ ; (३) "तथाऽपि पुंविशेषत्वाद्घटतेऽस्य नियन्तृता" पञ्च-दशी. ६. १०६. ।

❀ घट् + णिच्—संयोजने ; सम्पादने ; करणे ; नियोगे च ; घटयति । वि + घट्—विश्लेषे, भेदे । ❀

घूर्ण् भ्रमणे (घूर्णने)—घूमना To roll about, whirl—घूर्णते ; घूर्णिष्यते । तुदादि परस्मैपदीभी होता है—वोपदेवमते उभय-पदी । "नौर्घूर्णते चपलेव स्त्री" ; घूर्णते शिरः ; "घूर्णतीव मे मनः" महाभा० ।

❀ आ + घूर्ण्—चक्रवद्भ्रमणे । ❀

चेष्ट् यत्ने ; व्यापारे च—(१) यत्न करना ; (२) काममे लगे रहना To endeavour ; to be active—चेष्टते ; चेष्टिष्यते । (१) चेष्टते पठितुं शिष्यः ; "वृत्त्यर्थं नातिचेष्टेत" हितो० १. १८८; (२) "सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि" गीता. ३. ३३. । "तं शोणितपरीताङ्गं चेष्टमानं महीतले" इत्यत्र तु लुठनार्थः

(लोटना)।

❀ वि + चेष्ट्—लुठने, परिस्पन्दने, अङ्गपरिवर्त्तने। ❀

च्यु (च्युङ्) पतने (च्युतौ, भ्रंशे, क्षरणे)—खिसलना, गिरना, च्युत होना To slip—च्यवते ; च्यविष्यते। धर्मान्न च्यवेत।—नाशे ; "उत्पद्यन्ते च्यवन्ते" मनु० १२. ९६.।

❀ प्र + च्यु—भ्रंशे ; स्रावे च। ❀

जृम्भ् (जृभि) जृम्भणे (मुखविकाशे, पुष्पादीनां विकाशे च)—(१) जम्हाना ; (२) खिलना To yawn ; to expand—जृम्भते ; जृम्भिष्यते। (१) "जृम्भस्व सिंह ! दन्तांस्ते गणयिष्ये" शाकु०७ ; (२) "पङ्कजं जृम्भतेऽद्य" ऋतु० ३. २२.।—(३) वृद्धौ (बढ़ना) To increase ; "जृम्भतां जृम्भतामप्रतिहतप्रसरं क्रोधज्योतिः" वेणी० १.।

❀ उत् + जृम्भ्—उदये ; विकाशे ; वृद्धौ च। वि + जृम्भ्—जृम्भणे ; व्याप्तौ च। ❀

डी (डीङ्) नभोगतौ (उड्डयने)—उड़ना To fly—डयते ; डयिष्यते। डयते पक्षी।.

❀ उत् + डी—उड्डयने। ❀

त्रप् (त्रपूष्) लज्जायाम्—लज्जित होना, शर्मिन्दा होना To be ashamed—त्रपते ; त्रपिष्यते, त्रप्स्यते। "त्रपन्ते तीर्थानि त्वरितमिह यस्योद्धृतिविधौ" गङ्गालहरी. २८.।

❀ अप + त्रप्—लज्जायाम् ; "य आत्मनाऽपत्रपते भृशं नरः स सर्वलोकस्य गुरुर्भवत्युत" महाभा० ; "येनापत्रपते साधुरसाधुस्तेन

तुष्यति" महाभा० । ✤

त्वर् (ञित्वरा) वेगे—त्वरा करना, जल्दी करना To hasten—
त्वरते ; त्वरिष्यते । "भवान् सुहृदर्थे त्वरताम्" मालविका० २. ।

✤ त्वर् + णिच्—त्वरयति ; "दूतास्त्वरयन्ति माम्" रामा० । ✤

द्युत् दीप्तौ (प्रकाशे)—चमकना To shine—द्योतते ; द्योतिष्यते ।
द्योतते रविः ।

✤ उत् + द्युत्—औज्ज्वल्ये । वि + द्युत्—शोभायाम् । ✤

ध्वंस् (ध्वन्सु) नाशे ; भ्रंशे (अधःपतने) च—(१) नष्ट होना;
(२) स्खलित होना To perish ; to fall down—ध्वंसते ;
ध्वंसिष्यते । (१) "तमांसि ध्वंसन्ते" महावीर० १ ; (२)
"ध्वंसेत हृदयं सद्यः" भा० ११. ९७. ।

✤ अप + ध्वंस्—निन्दायाम् , तिरस्कारे ; " न चाप्यन्यमपध्वंसेत्
कदाचित् कोपसंयुतः" महाभा० । वि + ध्वंस्—निपाते, क्षये । ✤

प्याय् (ओप्यायी)—प्यै (प्यैङ्) वृद्धौ (स्फीतौ)—बढ़ना, फूलना
To increase, swell—प्यायते ; प्यायिष्यते ।

✤ आ + प्याय्, प्यै—स्फीतौ ; प्रीतौ च । आ + प्याय्, प्यै +
णिच्—वर्द्धने ; प्रीणने च ; आप्याययति । ✤

प्रथ् विख्यातौ—प्रसिद्ध होना To become famous—प्रथते ; प्रथि-
ष्यते । प्रथते गुणी ।—(२) विस्तारे (फैलना) To spread
abroad (as fame, rumour &c) ; "तथा यशोऽस्य
प्रथते" मनु० ११. १९. ।

प्लु (प्लुङ्) गतौ (लम्फे) ; सन्तरणे ; उत्तरणे च—(१) कूदना ;

(२) बहना, तैरना ; (३) पार होना (सक०) To leap, jump; to float; to cross (in a boat)—प्लवते; प्लोष्यते । (१) "मृगः पुप्लुवे" भ० ६. ४८ ; (२) "किं नामैतत्, अम्बुनि मज्जन्त्यलाबूनि, ग्रावाणः प्लवन्त इति ?" महावीर० १ ; (३) "पुप्लुवे सागरं नौकया" महाभा० ।

❀ प्लु + णिच्—प्लावने (डुबाना); प्लावयति । आ + प्लु—अवगाहने, स्नाने ; "सवासा जलमाप्लुत्य" मनु० ५. ७७. । उत + प्लु—उल्लम्फे (फाँदना) । उप + प्लु—उत्पीडने । परि + प्लु—चलने, चाञ्चल्ये । वि + प्लु—विपत्तौ ; विनाशे च । सम् + प्लु—वृद्धौ । ❀

भास् (भासृ) दीप्तौ (स्फुरणे, स्फुटीभावे, आविर्भावे च)—(१) चमकना ; (२) प्रकट होना To shine; to become clear or evident—भासते ; भासिष्यते । (१) "तावत् कामनृपातपत्रसुषमं बिम्बं बभासे विधोः" भामिनी० २.६७ ; (२) "त्वदङ्गमार्दवे दृष्टे कस्य चित्ते न भासते । मालती-शशभृल्लेखा कदलीनां कठोरता ?।।" चन्द्रालोकः ५.४२. । 'अव' और 'प्रति' उपसर्गके साथभी प्रयुक्त होता है ।

भ्रंश् (भ्रन्शु) अधःपतने—भ्रष्ट होना To fall or drop down—भ्रंशते ; भ्रंशिष्यते । "भ्रंशते दुरितं राष्ट्रे प्रजाभ्यो यत्प्रभावतः" ।

❀ परि, प्र + भ्रंश्—च्युतौ । ❀

भ्राज् (भ्राजृ, टुभ्राजृ) दीप्तौ (शोभायाम्)—चमकना To shine—भ्राजते ; भ्राजिष्यते ।"विभ्राजसे मकरकेतनमर्चयन्ती" रत्ना० १.२१.।

मुद् हर्षे—आनन्दित होना To rojoice—मोदते ; मोदिष्यते । मोदते धनी ।

❀ अनु + मुद्—अनुमोदने (पसन्द करना) । प्र + मुद्—हर्षे । ❀

यत (यती) यत्ने—प्रयत्न करना To attempt, strive—यतते ; यतिष्यते । यतते पठितुं शिष्यः ।

❀ आ + यत—वशीभावे (आयत्त होना, अधीन होना, निर्भर करना) ; सप्तमीके साथ ; "वयं त्वय्यायतामहे" महावीर० १. ४९. । प्र + यत्—प्रयत्ने । ❀

रम् (रमु) क्रीडायाम् (रमणे, आनन्दे ; आसक्तौ)—(१) खेलना ; (२) आनन्दित होना To sport ; to take delight in, to be gratified—रमते ; रंस्यते । (१) "रेमे मुहुर्मध्यगता सखीनाम्" कु० १ . २९ ; (२) "लोलापाङ्गैर्यदि न रमसे लोचनै-र्वञ्चितोऽसि" मेघ० २७. ।

❀ अभि, आ + रम्—आसक्तौ ; आरमति । उप + रम्—निवृत्तौ ; मरणे च ; उपरमति, ०ते । वि + रम्—निवृत्तौ ; विरमति । ❀

रुच् प्रीतौ ; प्रकाशे च—(१) रुचना ; (२) चमकना, शोभित होना To be agreeable ; to shine, look beautiful—रोचते ; रोचिष्यते । प्रीतिरिह अनुरागविशेषः । तत्र यस्यानुरागः, तस्य सम्प्रदानत्वम् । (१) रोचतेऽन्नं बुभुक्षवे ; "यदेव रोचते यस्मै, भवेत् तत् तस्य सुन्दरम्" हितो० २. ५० ; (२) "रुरुचिरे रुचिरेक्षणविभ्रमाः" माघ० ६. ४६. ।

❀ वि + रुच्—दीप्तौ । ❀

लम्ब् (लबि) अवस्रंसने (लम्बने)—लटकना To hang down, dangle—लम्बते ; लम्बिष्यते। "ऋषयो ह्यत्र लम्बन्ते" महाभा०।
❀ अव+लम्ब्—आश्रये। आ+लम्ब्—आश्रये ; आदाने च। वि+लम्ब्—विलम्बे। ❀

वल् वलने—जाना, चलना To go, to move, to turn to—वलते ; वलिष्यते। "अलिकदम्बकं वलतेऽभिमुखं तव" माघ० ६. ११ ; "हृदयमदये तस्मिन्नेवं पुनर्वलते बलात्" गीतगो० ७.४०.। "त्वदभिसरणरभसेन वलन्ती" गीतगो० ६. ३ ; "दृष्टिरन्यतो न वलति" काद०—इत्यादौ परस्मैपदमपि।

वृत (वृतु) वर्त्तने (स्थितौ, विद्यमानतायाम्)—रहना To exist, remain, stay—वर्त्तते ; वर्त्तिष्यते, वर्त्स्यति। "अत्र विषयेऽस्माकं महत् कुतूहलं वर्त्तते" पञ्च० १.।
❀ वृत्+णिच्—आजीविकायाम्, वृत्तिकरणे, प्राणधारणे (गुज़रान करना To live on, subsist) ; वर्त्तयति। "रामोऽपि सह वैदेह्या वने वन्येन वर्त्तयन्" र० १२. २०.। क्वचित् आत्मनेपदमपि, यथा—"मदसिक्तमुखैर्मृगाधिपः करिभिर्वर्त्तयते स्वयं हतैः" भा० २. १८.। अति+वृत्—अतिक्रमे, उल्लङ्घने (सक०)। अनु+वृत्—अनुसरणे (सक०)। अप+वृत्—प्रतिनिवृत्तौ (लौटना)। वि+अप+वृत्—निवृत्तौ। अभि+वृत्—अभिमुखगमने, आगमने (सक०)। आ+वृत्—आगमने। आ+वृत्+णिच्—दुग्धादिपाके (औटाना) ; आवृत्तौ (फेरना To repeat) च ; आवर्त्तयति। अप+आ+वृत्, उप+आ+वृत्, परा+वृत्, वि+आ+

वृत्—निवृत्तौ (लौटना)। नि+वृत्—निवृत्तौ। निर्+वृत्—निष्पत्तौ, समाप्तौ। प्र+वृत्—प्रवृत्तौ। वि+वृत्—घूर्णने, भ्रमणे। सम्+वृत—सत्तायाम् (होना); "स्विन्नाङ्गुलिः संववृते कुमारी" र० ७. २२.। ✽

वृध् (वृधु) वृद्धौ—बढ़ना To increase—वर्द्धते; वर्द्धिष्यते, वर्त्स्यति। "वर्द्धते ते तपः" भ० ६. ६८.।

✽ सम्+वृध्+णिच्—वर्द्धने, प्रतिपालने; सम्मानने च; संवर्द्धयति। ✽

वेप् (टुवेपृ) कम्पने—कांपना To shudder, tremble—वेपते; वेपिष्यते। वेपते वायुना वृक्षः।

व्यथ् भये; चलने; दुःखानुभवे च—डरना; विचलित होना; दुःख पाना—To be agitated; to be afflicted, to be sorry—व्यथते; व्यथिष्यते। व्यथते लोकः (दुःखमनुभवति, कम्पते, बिभेति वा)।

शुभ् दीप्तौ (शोभायाम्)—शोभित होना To look beautiful or handsome—शोभते; शोभिष्यते। "सुष्ठु शोभसे एतेन विनयमाहात्म्येन" उत्तर० १; "सुखं हि दुःखान्यनुभूय शोभते" मृच्छ० १. १०. (To appear to advantage).

श्वित् (श्विता) शौक्ल्ये—सफ़ेद होना To be white—श्वेतते। श्वेतते प्रासादः। "व्यतिकरितदिगन्ताः श्वेतमानैर्यशोभिः" मालती० २. ९.। नै० १२. २२.।

स्पन्द् (स्पदि) किञ्चिच्चलने (ईषत्कम्पने, स्फुरणे)—कांपना, फड़फड़ाना

To throb, palpitate—स्पन्दते ; स्पन्दिष्यते । "स्पन्दते दक्षिणो भुजः" मृच्छ० ; "परपन्दे वामनयनं जानकी-जामदग्न्ययोः" महाना० १. २८. ।

'परि' उपसर्गके साथभी प्रयुक्त होता है ।

स्पर्ध् संघर्षे (पराभिभवेच्छायाम्)—स्पर्द्धा करना, बराबरी करना, झगड़ना To contend or vie with—स्पर्द्धते ; स्पर्द्धिष्यते । स्पर्द्धते बलिना मम बली ।

स्मि (ष्मिङ्) ईषद्धसने—मुस्कराना To smile, laugh (gently)—स्मयते ; स्मेष्यते । स्मयते वधूः । "स्मयमान वदनाम्बुजं स्मरामि" भामिनी० २. २७. ।

⚜ वि+स्मि—विस्मये (ताज्जुब करना, मुताज्जिब होना) । ⚜

स्यन्द् (स्यन्दू) स्रवणे (क्षरणे)—चूना, बहना To drop, trickle, flow—स्यन्दते ; स्यन्दिष्यते । अरविन्दात् मकरन्दः स्यन्दते ।

⚜ अभि+स्यन्द्—द्रवीभावे, क्षरणे ; "अभिष्यन्देत हृदयम्" उत्तर० । ⚜

स्रंस् (स्रन्सु) भ्रंशे (अधःपतने)—च्युत होना To fall down—स्रंसते ; स्रंसिष्यते । "गाण्डीवं स्रंसते हस्तात्" गीता. १. ३०. ।

ह्लाद् (ह्लादी) हर्षे—हृष्ट होना To be glad or delighted—ह्लादते ; ह्लादिष्यते । "अविज्ञातेऽपि बन्धौ हि बलात् प्रह्लादते मनः" भा० ११. ८. । "धन्यानां विरजस्तमा भगवतो चर्य्येयमाह्लादते" (उल्लयति) अनर्घ० २. २९.—इत्यत्र सकर्मकः ।

अनुवाद करो—तुम्हारी उन्नतिसे मेरा मन हृष्ट होता है । व्याघ्रका

गर्जन सुनकर (श्रुत्वा) सभीका हृदय कांप उठता है। दरिद्र शिशुओंके उपकारके लिये सर्वदा यत्न करूंगा। पूर्व दिशामे चन्द्रमा शोभा पाता है,—यह देखकर (दृष्ट्वा) कौन आनन्दित नहीं होता? रामके कुव्यवहारसे श्याम नितान्त लज्जित हुआ है। कायमनोवाक्यसे प्रयत्न करो।

भ्वादि सकर्मक उभयपदी धातु।

☞ भ्वादि उभयपदी धातु परस्मैपदमे 'पच्'-धातु, और आत्मनेपदमे 'लभ्'-धातुके तुल्य।

खन् (खनु) अवदारणे (खनने)—खोदना To dig—खनति, खनते; खनिष्यति, खनिष्यते। "तृषितो जाह्नवीतीरे कूपं खनति दुर्मतिः"।

⚜ उत्+खन्—खनने; उत्पाटने, उन्मूलने च। नि+खन्—रोपणे, स्थापने, प्रवेशने (गाड़ना); "ऊनद्विवर्षं निखनेत्" याज्ञवल्क्यः। ⚜

गुह् (गुहू) संवरणे (आच्छादने, गोपने)—ढकना, छिपाना To cover, hide—गूहति, गूहते; गूहिष्यति, गूहिष्यते, घोक्ष्यति, घोक्ष्यते। "गुह्यञ्च गूहति गुणान् प्रकटीकरोति" भर्त्तृहरिः।

⚜ उप+गुह्—आलिङ्गने। नि+गुह्—गोपने। ⚜

चाय् (चायृ) दर्शने (चाक्षुषज्ञाने)—देखना To observe, discern, see—चायति, चायते; चायिष्यति, चायिष्यते। "तं पर्वतीयाः प्रमदाश्चचायिरे" माघ० १२. ६१.।

⚜ नि+चाय्—दर्शने। ⚜

धाव् (धावु) शुद्धौ (क्षालने); द्रुतगमने च—(१) धोना; (२) दौड़ना (अक०)—To wash, cleanse; to run—धावति, धावते; धाविष्यति, धाविष्यते। (१) "दधावाक्षिस्ततश्चक्षुः सुग्रीवस्य विभी-

पगः" भ० १४. ९० ; (२) "धावन्त्यमी मृगजवाक्षमयेव रथ्याः" शाकु० १. ८.।

❀ अनु + धाव्—पश्चाद्धावने ; अनुसन्धाने च। अभि + धाव्—अभिमुखगतौ। निर् + धाव्—मार्जने। ❀

धृ (धृञ्) धारणे—पकड़ना To hold—धरति, धरते ; धरिष्यति, धरिष्यते।

❀ अव + धृ + णिच्, अथवा चुरादि—निश्चये, निरूपणे ; अवधारयति। उत् + धृ—उद्धारे, मोचने। ❀

नी (णीञ्) प्रापणे (नयने)—ले जाना To carry, lead, take, convey—नयति, नयते ; नेष्यति, नेष्यते। द्विकर्मक—नयति नयते गां वनं गोपः (प्रापयतीत्यर्थः)। "मामपि तत्र नय" हितो०।—(२) अतिवाहने To pass (as time) ; "संविष्टः कुशशयने निशां निनाय" र० १. ९५.।

❀ अनु + नी—प्रार्थनायाम् ; प्रसादने च। अप + नी—अपसारणे। अभि + नी—अभिनये, अनुकरणे। आ + नी—आनयने। आ + नी + णिच्—मङ्गाना ; आनाययति। प्रति + आ + नी—प्रत्यानयने। उत् + नी—उत्क्षेपणे ; अनुमाने च। उप + नी—उपनयने ; "माणवकम् उपनयते" ; (२) प्रापणे च ; "आर्य्यस्यासनमुपनय" मृच्छ०। निर् + नी—अवधारणे। परि + नी—विवाहे। प्र + नी—रचनायाम् ; प्रापणे च। वि + नी—अपनयने ; शासने, शिक्षायाञ्च। ❀

पच् (डुपचष्) पाके (रन्धने)—पकाना To cook—पचति, पचते ; पक्ष्यति, पक्ष्यते। द्विकर्मक—पचति पचते तण्डुलान् ओदनं लोकः।

—(२) जीर्णीकरणे (परिपाक करना, हज़्म करना); "पचाम्यन्नं चतुर्विधम्" गीता. १५. १४. ।

⚜ कर्मकर्त्तरि—परिणामे, परिणतावस्थायाम्—पच्यते ; "सद्य एव सुकृतां हि पच्यते कल्पवृक्षफलधर्मि काङ्क्षितम्" र० ११. ५० ; (२) विनाशोन्मुखीभावे ; "नरके पच्यते घोरे" । ⚜

भज् भागे ; सेवायाम् (अनुरागे ; आश्रये, स्वीकारे ; प्राप्तौ) च—(१) बाँटना ; (२) सेवा करना, भक्ति करना ; (३) आश्रय करना ; (४) प्राप्त होना To divide ; to worship ; to resort to ; to obtain, experience—भजति, भजते ; भक्ष्यति, भक्ष्यते । (१) "भ्रातरः समं भजेरन् पैतृकं रिक्थम्" मनु० ९. १०४ ; (२) हरिं भज ; (३) "शिलातलं भेजे" काद० ; "मातर्लक्ष्मि ! भजस्व कञ्चिदपरम्" भर्तृ० ३ ; (४) "अभितप्तमयोऽपि मार्दवं भजते, कैव कथा शरीरिषु ?" र० ८. ४३. ।

⚜ वि + भज्—विभागे (हिस्सा करना) । ⚜

भृ (भृञ्) भरणे (पूरणे ; पोषणे, प्रतिपालने)—(१) भरना ; (२) पालन करना To fill ; to support—भरति, भरते ; भरिष्यति, भरिष्यते । (१) भरति कुम्भमद्भिर्जनः ; (२) "दरिद्रान् भर कौन्तेय ! मा प्रयच्छेश्वरे धनम्" हितो० १. १४.

यज् देवपूजायाम् (यागे); दाने च—(१) पूजा वा याग करना ; (२) देवताके उद्देशसे उत्सर्ग करना To worship with sacrifices ; to make an oblation to—यजति, यजते ; यक्ष्यति, यक्ष्यते । (१) यजति यजते विष्णुं सुधीः (पूजयतीत्यर्थः) ।

यागार्थमें तृतीयान्त यज्ञ-वाचक शब्दके साथ प्रयुक्त होता है ; "यजेत राजा क्रतुभिः" मनु० ७. ७९ ; "अश्वमेधेन यजेत" । (२) दान-गार्थमें द्वितीयान्त देवता वाचक और तृतीयान्त उत्सृष्टवस्तुवाचक शब्दके साथ प्रयुक्त होता है ; "पशुना रुद्रं यजते" (पशुं रुद्राय ददातीत्यर्थः) ; "अस्तिर्यजते पितृन्" महाना० ।

याच् (टुयाचृ) याचने (प्रार्थनायाम्)—याचना करना, माङ्गना To ask, solicit, implore—याचति, याचते ; याचिष्यति, याचिष्यते । द्विकर्मक—बलिं याचते वसुधाम् । याचति याचते नृपं विप्रः ; "पितरं प्रणिपत्य पादयोरपरित्यागमयाचतात्मनः" र० ८. १२.।

लष् स्पृहायाम्—इच्छा करना, अभिलाष करना To desire or wish for—लषति, लषते ; लष्यति, लष्यते ; लषिष्यति, लषिष्यते । प्रायेण अयम् 'अभि' पूर्वकः—अभिलषति, अभिलष्यति । "तेन दत्तमभिलेषुरङ्गना मुखासवम्" र० १९. १२ ; "मानुषानभिलष्यन्ती" म० ४. २२.।

वप् (डुवप्) बीजसन्ताने ; तन्तुवपने ; मुण्डने च—(१) बीज बोना ; (२) बुनना ; (३) मुण्डाना To sow ; to weave ; to shave—वपति, वपते ; वप्स्यति, वप्स्यते । (१) "यादृशं वपते बीजं तादृशं लभते फलम्" ; (२) वपति तन्तुं तन्त्रवायः ; (३) वपति मस्तकं नापित. ।

नि+वप्, निर्+वप्—उत्सर्गे, दाने । प्रति+वप्—अनुवेधे (जड़ना) ; निखनने, विन्यासे च ।

वह् प्रापणे ; धारणे च—(१) ले जाना ; (२) धारण करना To carry ; to bear, support—वहति, वहते ; वक्ष्यति वक्ष्यते । (१) द्विकर्मक—वहति वहते भारं ग्रामं जनः (प्रापयतीत्यर्थः) ; (२) "न गर्दभा वाजिधुरं वहन्ति" मृच्छ० ४. १७. ।—(३) वायोर्गतौ (अक०) ; "मन्दं वहति मारुतः" रामा० ।—(४) स्यन्दने, स्रवणे, क्षरणे (अक०) ; "परोपकाराय वहन्ति नद्यः" ।

❧ अति + वह् + णिच्—अतिवाहने, यापने, अतिक्रमणे ; अतिवाहयति । अप + वह्—उत्सारणे ; निरासे च ; "अपोवाह वासोऽस्या मारुतः" महाभा०। अप + वह् + णिच्—अपसारणे ; अपवाहयति । आ + वह्—उत्पादने ; धारणे च । उत् + वह्—विवाहे ; धारणे च । निर् + वह्—निष्पत्तौ ; सम्पादने ; स्थितौ च—"सर्वथा सत्यवचने देहो न निर्वहेत्" भागवत-टीका ८. १९. ४१ ; "कारणमसदिति कथयन् वन्ध्यापुत्रेण निर्वहेत् कार्य्यम्" स्वात्मनिरूपणम् ७८. । प्र + वह्—वहने, प्रवाहे । वि + वह्—विवाहे । सम् + वह् + णिच्—संवाहने, अङ्गमर्दने Shampooing ; संवाहयति । ❧

वे (वेञ्) तन्तुसन्ताने (वस्त्रनिर्माणे)—बुनना To weave—वयति, वयते ; वास्यति, वास्यते । वयति वयते तन्त्रं तन्त्रवायः । "यशः-पटं वयति स्म तद्गुणैः" नै० १. १२. ।

❧ प्र + वे—वेधने, ग्रन्थने ; "शल्यप्रोतं सुनिपुत्रम्" र० ९. ७९. । ❧

शप् आक्रोशे (विरुद्धानुध्याने, शापे, गालिदाने, भर्त्सनायाम्) ; शपथकरणे च—(१) कोसना ; (२) सौगन्द खाना To curse,

scold, abuse; to swear—शपति, शपते; शप्स्यति, शप्स्यते। (१) "अशपद्भव मानुषीति ताम्" र० ८. ८० ; (२) "कृष्णाय शपते गोपी"। जिस आदमीके पास शपथ किया जाता है, उसमे चतुर्थी, और जिस पदार्थके नामसे शपथ किया जाता है, उसमे तृतीया होती है; "भरतेनात्मना चाहं शपे ते मनुजाधिप! । यथा नान्येन तुष्येयमृते रामविवासनात्" रामा०।

❀ अभि+शप्—अभिशापे। ❀

श्रि (श्रिञ्) आश्रये; प्राप्तौ च—(१) आश्रय करना; (२) प्राप्त होना To resort to, have recourse to; to attain to—श्रयति, श्रयते; श्रयिष्यति, श्रयिष्यते। (१) "यं देशं श्रयते तमेव कुरुते बाहुप्रतापार्जितम्" हितो० १. १०९; (२) "परीता रक्षोभिः श्रयति विवशा कामपि दशाम्" भामिनी० १. ८३.।

❀ आ+श्रि-अवलम्बने (सहारा लेना)। सम्+श्रि-आश्रये।❀

हृ (हृञ्) हरणे (प्रापणे; स्तेये; नाशने च)—(१) ले जाना; (२) चोरी करना; (३) नष्ट करना To convey; to steal; to destroy—हरति, हरते; हरिष्यति, हरिष्यते। (१) द्विकर्मक—हरति हरते गां वनं गोपः; "सन्देशं मे हर" मेघ० ७; (२) "दुर्वृत्ता जारजन्मानो हरिष्यन्तीति शङ्कया। मदीयपद्यरत्नानां मञ्जूषैषा मया कृता" भामिनी० ४. ४६; (३) "नापेक्षा न च दाक्षिण्यं न प्रीतिर्न च सङ्गतिः। तथाऽपि हरते तापं लोकानामुन्नतो घनः॥" भामिनी० १. ३८.।

⚜ हृ + णिच्—प्रापणे (किसीके द्वारा कुछ भेजना) ; नाशे, भ्रंशे, वियोगे (खोना To lose) ; पराजये (हराना) च ; हारयति । अनु + हृ—अनुकरणे । अप + हृ—अपहरणे (छीन लेना ; चुराना) । अभि + अव + हृ—अभ्यवहारे, भोजने । वि + अव + हृ—व्यवहारे । आ + हृ—आहरणे, आनयने । उत् + आ + हृ—दृष्टान्तोपन्यासे (नज़ीर देना) ; कथने च । वि + आ + हृ—व्याहारे, उक्तौ । सम् + आ + हृ—सङ्ग्रहे । उत् + हृ—उद्धारे (मोचने ; उन्मूलने च) । उप + हृ—अन्तिकप्रापणे (पास ले जाना) ; उपढौकने च (भेंट करना) । निर् + हृ—अपनयने ; प्रेतवहने च । परि + हृ—परित्यागे । प्र + हृ—प्रहारे, ताडने । वि + हृ—क्रीडायाम् । सम् + हृ—नाशने ; प्रत्याकर्षणे (समेटना) ; सङ्क्षेपे च । उप + सम् + हृ—उपसंहारे, समापने । ⚜

ह्वे (ह्वेञ्) स्पर्द्धायाम् (पराभिभवेच्छायाम्) ; आह्वाने च—(१) लड़ाई माङ्गना ; (२) पुकारना To challenge ; To call by name—ह्वयति ह्वयते मल्लो मल्लम् (अभिभवितुमिच्छति); (२) ह्वयति जनं लोकः (आह्वयतीत्यर्थः) ; "तां पार्वतीति नाम्ना जुहाव" कु० १. २६. ।

⚜ आ + ह्वे—आह्वाने To call, summon, invite—परस्मैपदी—पुत्रमाह्वयति ;—(२) स्पर्द्धायाम्—आत्मनेपदी—कृष्णश्चाणूरमाह्वयते । ⚜

भ्वादि अकर्मक उभयपदी धातु ।

राज् (राजृ) दीप्तौ (शोभायाम्)—शोभित होना To glitter,

appear splendid or beautiful—राजति, राजते ; राजिष्यति, राजिष्यते । "राजन् ! राजति वीरवैरिवनितावैधव्यदस्ते भुज" काव्यप्रकाशः १०. ।

॥ वि+राज्—शोभायाम् । निर्+राज्+णिच्—प्रकाशने, विभूषणे ; नीराजने, निर्मञ्छने च (आरती करना) ; नीराजयति ; "नीराजयन्ति भूपालाः पादपीठान्तभूतलम्" प्रबोध० २. ८. । *॥* अनुवाद करो—दिनमे दोपहरके समय धूपमे मत दौड़ो । साधुपुरुषके पास प्रार्थना निष्फल होनेभी अच्छी, तोभी कृपणके पास कुछभी नहीं माङ्गना । अपने गुणोंको छिपा रखो । सर्वान्तःकरणसे ईश्वरका (द्वितीया) -भजन करो । महातपा दुर्वासाने शकुन्तलाको अभिशाप दिया था । वर्षामे किसानलोग खेतमे बीज बोते हैं । इस पुस्तकको घरमे ले जाऊंगा । विपद्मे जिसका (द्वितीया) आश्रय करोगे, प्राणान्तमेभी उसके ऊपर कुभाव नहीं लाना ।

दिवादि ।

क्रियाघटन-सूत्र ।

[इस प्रकरणमे यथासम्भव तुदादिके तार(*)-चिह्नित सूत्रोंका कार्य्य होगा ।]

२७१ । चतुर्लकार परे रहनेसे, कर्त्तृवाच्यमे दिवादिगणीय धातुके उत्तर 'य' होता है ; यथा—दिव्+ति=दिव्+य+ति—

२७२ । * 'य' परे रहनेसे, दिव्—दीव्, सिव्—सीव्, दॄ—दीर्, जॄ—जीर्, व्यध्—विध्, और जन्—जा होता है । दीव्+य+ति=

दीव्यति ।

२७३ । 'य' परे रहनेसे, कर्त्तृवाच्यमे शम्—शाम्, श्रम—श्राम्, भ्रम्—भ्राम्, क्षम्—क्षाम्, तम्—ताम्, दम्—दाम्, क्लम्—क्लाम्, मद्—माद्, भ्रन्श्—भ्रश्, और रन्ज्—रज् होता है ।

२७४ । चतुर्लकार परे रहनेसे, अन्त्य ओकारका लोप होता है ;—यथा—शो + य + ति = श्यति ।

दिवादि परस्मैपदी धातु ।

दिव् (दिवु) क्रीडायाम्—खेलना To play.

(अकर्मक—द्वितीयान्त अथवा तृतीयान्त 'अक्ष'-वाचक शब्दके साथ—अक्षैः अक्षान् वा दीव्यति ।)

लट् ।

	एकवचन	द्विवचन	वहुवचन
प्रथमपुरुष	दीव्यति	दीव्यतः	दीव्यन्ति
मध्यमपुरुष	दीव्यसि	दीव्यथः	दीव्यथ
उत्तमपुरुष	दीव्यामि	दीव्यावः	दीव्यामः

लोट् ।

प्रथमपुरुष	दीव्यतु	दीव्यताम्	दीव्यन्तु
मध्यमपुरुष	दीव्य	दीव्यतम्	दीव्यत
उत्तमपुरुष	दीव्यानि	दीव्याव	दीव्याम

लङ् ।

प्रथमपुरुष	अदीव्यत्	अदीव्यताम्	अदीव्यन्
मध्यमपुरुष	अदीव्यः	अदीव्यतम्	अदीव्यत

	एकवचन	द्विवचन	बहुवचन
उत्तमपुरुष	अदीव्यम्	अदीव्याव	अदीव्याम

विधिलिङ् ।

प्रथमपुरुष	दीव्येत्	दीव्येताम्	दीव्येयुः
मध्यमपुरुष	दीव्येः	दीव्येतम्	दीव्येत
उत्तमपुरुष	दीव्येयम्	दीव्येव	दीव्येम

लृट् ।

प्रथमपुरुष	देविष्यति	देविष्यतः	देविष्यन्ति
मध्यमपुरुष	देविष्यसि	देविष्यथः	देविष्यथ
उत्तमपुरुष	देविष्यामि	देविष्यावः	देविष्यामः

दिवादि सकर्मक परस्मैपदी धातु।

अस् (असु) क्षेपणे—फेंकना To cast—अस्यति ; असिष्यति । "तस्मिन्नास्थदिषीकास्त्रम्" र० १२. २३. ।—(२) अपनोदने ; "स्त्रीणामास श्रमम्" नलोदयः ४. ३६. ।

☞ अधि + अस्—आरोपे । अप + अस्—अपसारणे ; त्यागे च । अभि + अस्—अभ्यासे, आवृत्तौ, पुनरनुष्ठाने, मुहुः करणे । उत् + अस्, वि + उत् + अस्—निरासे, अपनयने । नि + अस्—निक्षेपे, स्थापने ; त्यागे च । वि + नि + अस्—स्थापने । उप + नि + अस्—प्रस्तावे । सम् + नि + अस्—सन्न्यासे ; "सन्दृश्य क्षणभङ्गुरं तदखिलं धन्यस्तु सन्न्यस्यति" भर्तृ० । निर् + अस्—दूरीकरणे । परि + अस्—विस्तृतौ ; क्षेपणे ; पातने च । वि + परि + अस्—विपर्य्यये । प्र + अस्—प्रक्षेपे । वि + अस्—अपनयने ; विभागे च ।

सम् + अस्—सङ्क्षेपे, समासे, संयोगे। ❀

इष् गतौ—इष्यति ; एषिष्यति।

❀ अनु + इष्—अन्वेषणे (ढूँढ़ना)। प्र + इष् + णिच्—प्रेषणे (भेजना) ; क्षेपणे च ; प्रेषयति। ❀

क्षम् (क्षमू) सहने (मर्षणे, क्षमायाम्)—क्षमा करना To forgive—क्षाम्यति ; क्षमिष्यति। क्षाम्यति दोषं साधुः।

गृध् (गृधु) लिप्सायाम् (आकाङ्क्षायाम्)—लालच करना To covet—गृध्यति ; गर्धिष्यति। गृध्यति धनं लुब्धः।

पुष् पोषणे (उपचये) ; पुष्टौ च—(१) पुष्ट करना, बढ़ाना ; (२) पुष्ट होना (अक०) To nourish, to enhance, to display ; to grow strong or fat—पुष्यति ; पोक्ष्यति। (१) "कामप्यभिख्यां स्फुरितैरपुष्यदासन्नलावण्यफलोऽधरोष्ठः" कु० ७. १८ ; "वर्णं पुष्यत्यनेकं सरयूप्रवाहः" र० १६. ५८ ; "देहमपुष्यः सुरामिषैः" भ० १७. ७२.।

लुभ् आकाङ्क्षायाम् (लोभे)—लालच करना To covet—लुभ्यति ; लोभिष्यति। लुभ्यति धनं लुब्धः। परन्तु चतुर्थी और सप्तमीके साथ प्रयुक्त होता है ; "तथाऽपि रामो लुलुभे मृगाय" ; "धर्मे लुभ्यति यः सदा"।

व्यध् ताडने (पीडने, वेधने)—बींधना, चुभाना, छेदना To hurt, pierce—विध्यति ; व्यत्स्यति। विध्यति शत्रुं शूरः ; "विविधुस्तोमरैः" भ० १४. २४.।

❀ अनु + व्यध्—सम्पर्के ; व्यापने ; मन्थने च। अप + व्यध्—

निक्षेपे ; निरासे ; त्यागे ; प्रेरणे च । आ + व्यध्—क्षेपे, निःसारणे ; धारणे, परिधाने च । ❧

शा तीक्ष्णीकरणे—पैनाना To sharpen, whet—श्यति ; शाययति ।

❧ नि + शो—निशाने, तेजने, तीक्ष्णीकरणे । ❧

श्लिष् (श्लिषु) आलिङ्गने ; योगे च—(१) गले लगाना ; (२) संयुक्त होना (अक०) To embrace ; to adhere to—श्लिष्यति ; श्लेक्ष्यति । (१) श्लिष्यति वृक्षं लता ।

❧ आ + श्लिष्—आलिङ्गने ; योगे च । वि + श्लिष्—वियोगे । प्र + श्लिष्—वियोगे । सम् + श्लिष्—संयोगे । ❧

सिव् (षिवु) तन्तुविस्तारे (सीवने, तन्तुभिर्ग्रन्थने)—सीना To sew—सीव्यति ; सेविष्यति । सीव्यति वस्त्रं सौचिकः ।

सो (षो) नाशने—नष्ट करना To kill, destroy—स्यति ; मारयति । स्यति यमो जन्तून् ।

❧ अव + सो—अवसाने, समाप्तौ । अधि + अव + सो—अध्यवसाये (उत्साहे ; निश्चये च) । परि + अव + सो—पर्य्यवसाने; समाप्तौ, परिणामे । प्रति + अव + सो—प्रत्यवसाने, भोजने । वि + अव + सो—व्यवसाये, उद्यमे, चेष्टायाम् । अनु + वि + अव + सो—अनुव्यवसाये (बुद्धार्थस्य पुनर्बोधे) । ❧

दिवादि अकर्मक परस्मैपदी धातु ।

कुप् कोपे—क्रुद्ध होना To be angry—कुप्यति ; कोपिष्यति । जिसपर क्रोध किया जाता है, उसमें प्रायशः चतुर्थी होती है ; कुप्यति माता शिशवे ; "कुप्यन्ति हितवादिने" काद० । किन्तु 'प्रति'-शब्द-

के योगसे द्वितीया, और 'उपरि'-शब्दके साथ षष्ठीभी होती है; "मां प्रति स कुपितः"; "कुपितश्चन्द्रगुप्तश्चाणक्यस्योपरि" मुद्रा० २.।

❦ प्र+कुप्—अतिकोपे; प्राबल्ये च—"दोषाः प्रकुप्यन्ति" सुश्रुत०। ❦

क्रुध् कोपे—रोष करना—क्रुध्यति; क्रोत्स्यति।

क्लम् (क्लमु) ग्लानौ (श्रमे)—क्लान्त होना, थकना To be fatigued or tired—क्लाम्यति; क्लमिष्यति। "कायः क्लाम्यति यस्य प्रहरतो रिपून्"।

क्लिद् (क्लिदू) आर्द्रीभावे—भीगना To become wet—क्लिद्यति; क्लेदिष्यति, क्लेत्स्यति। क्लिद्यति वस्त्रं पयसा।

क्षुभ् सञ्चलने* (क्षोभे, विकारे, उद्वेगे)—क्षुब्ध होना, विचलित होना, घबराना To shake, to be agitated or disturbed—क्षुभ्यति; क्षोभिष्यति। "महाह्रद इव क्षुभ्यन्" भ० ९. ११८.।

❦ प्र+क्षुभ्, सम्+क्षुभ्—सञ्चलने। वि+क्षुभ्+णिच्—विलोडने; विक्षोभयति। ❦

जॄ (जॄष्) वयोहानौ (जरायाम्, जीर्णीभावे, क्षये; विलये; परिपाके)—(१) जीर्ण होना, क्षीण होना; (२) नष्ट होना; (३) पचना To grow old, wear out, decay; to perish; to be dijested—जीर्य्यति; जरिष्यति, जरीष्यति; (१) "जीर्य्यन्ते जीर्य्यतः केशा दन्ता जीर्य्यन्ति जीर्य्यतः। जीर्य्यतश्चक्षुषी श्रोत्रे,

---

* इसी अर्थमे 'क्षुभ्'-धातु भ्वादिगणीय आत्मनेपदीभी होता है; लट्—क्षोभते।

तृष्णैका तरुणायते ॥" पञ्च० ५. १६ ; (२) "सौहृदानि जीर्य्यन्ति कालेन" महाभा० ; (३) "उदरे चाजरद्रन्ये" भ० ११. १६०.।

तम् (तमु) ग्लानौ (खेदे, श्रान्तौ ; व्यथायाम् ; कृशीभावे)—(१) श्रान्त होना ; (२) परेशान होना, (३) मुरझाना To be exhausted or fatigued, to be distressed (in body or mind); to pine or waste away—ताम्यति ; तमिष्यति। (१) "ललितशिरीषपुष्पहननैरपि ताम्यति यत्" मालती० ९. ३१ ; (२) "प्रविशति मुहुः कुञ्जं, गुञ्जन् मुहुर्बहु ताम्यति" गीतगो० ५. १६ ; (३) "गाढोत्कण्ठा लुलितलुलितैरङ्गकैस्ताम्यतीति" मालती० १. १८.।

उत्+तम्—उत्कण्ठायाम्। सम्+तम्—ग्लानौ।

तुष् प्रीतौ—तुष्ट होना To be contented or satisfied with anything—तुष्यति ; तोक्ष्यति। "तुष्यन्ति ब्राह्मणा नित्यम्" ; तृतीयान्त पदके साथ—"रत्नैर्महार्हैस्तुतुषुर्न देवा." भर्तृ०।

परि+तुष्, प्र+तुष्—परितोषे। सम्+तुष्—सन्तोषे।

तृप् तृप्तौ—तृप्त होना, राजी होना, To become satisfied—तृप्यति ; तर्पिष्यति, तर्प्स्यति, त्रप्स्यति। प्रायशः तृतीयाके साथ, परन्तु कहीं षष्ठी और सप्तमीके साथभी प्रयुक्त होता है ; "को न तृप्यति वित्तेन ?" हितो० २. १७३ ; "नाग्निस्तृप्यति काष्ठानाम्" पञ्च० १. १४८ ; "तस्मिन् हि ततृपुर्देवास्तते यज्ञे" महाभा०।

परि+तृप्—सम्यक्तृप्तौ।

तृष् (ञितृष्) पिपासायाम् (तृष्णायाम्; आकाङ्क्षायाम्)—प्यासा होना

To be thirsty—तृप्यति; तर्पिष्यति। "क्षताश्च कपयोऽतृपन्" भ० १६. ९१.।

त्रस् (त्रसी) उद्वेगे (त्रासे)—डरना To fear, dread—त्रस्यति, त्रसति; त्रसिष्यति। "प्रमदवनात् त्रस्यति" काद०; "त्रसति कः सति नाश्रयबाधने?" नै० ४. १६.।

दम् (दमु) उपशमे (शान्तीभावे); शान्तीकरणे (शासने, दमने) च—(१) शान्त होना; (२) दबाना (सक०) To be calm or tranquil, to subdue—दाम्यति; दमिष्यति। (१) दाम्यति मुनिः; (२) "यमो दाम्यति राक्षसान्" भ० १८. २०.।

दुष् वैकृत्ये (अशुद्धीभावे, दोषे)—दोषयुक्त वा अशुद्ध होना To be bad or corrupted, to become impure or contaminated—दुष्यति; दोक्ष्यति। दुष्यति लोकः पापात्; "देवान् पितृंश्चार्चयित्वा खादन् मांसं न दुष्यति" मनु० ५. ३२.।

प्र+दुष्—व्यभिचारे।

दृप् गर्वे (दर्पे)—घमण्ड करना To be proud—दृप्यति; दर्पिष्यति, द्रप्स्यति, दर्प्स्यति। "स किल नात्मना दृप्यति" उत्तर० ९; "को न दृप्यति वित्तेन?" हितो० ३. १७३.।

दॄ विदारे—फटना To burst or break asunder, split open—दीर्यति; दरिष्यति, दरीष्यति। "हृदयं दीर्यतीव मे" महाभा०।

अव+दॄ+णिच्—अवदारणे, खनने; अवदारयति। वि+दॄ—विदारे; "वैदेहिबन्धोर्हृदयं विदद्रे" र० १४. ३३.। वि+दॄ+

णिच्—विदारणे (फाड़ना) ; विदारयति । ※

द्रुह् जिघांसायाम् (अनिष्टचिन्तने, अपकारे)—बुराई चाहना, वैर करना To seek to hurt or injure, meditate mischief—द्रुह्यति ; द्रोहिष्यति, ध्रोक्ष्यति । जिसपर द्रोह किया जाता है, उसमें चतुर्थी होती है ; द्रुह्यति खलः साधवे ; "योऽन्वेति मां द्रुह्यति मह्यमेव साऽग्रेत्युपालम्भि तथाऽऽलिवर्गः" नै० ३. ७. ।

※ अभि + द्रुह्—अपकारे । ※

नश् (णश्) नाशे (क्षये, मरणे) ; अदर्शने (लुकायने ; पलायने) च— (१) नष्ट होना ; (२) अदृश्य होना, छिप जाना ; (३) भागना To be destroyed, perish ; to disappear ; to escape—नश्यति ; नशिष्यति, नङ्क्ष्यति । (१) "जीवनाशं ननाश च" भ० १४. ३१; (२) "भूतानि तस्य नश्यन्ति" हितो० १. २२६; (३) "नेशुर्भिया निशाचराः" भ० १४. ११२. ।

※ प्र + नश्—'नश्'-वत्; प्रणाशः ; प्रनष्टः । वि + नश्— विनाशे । ※

नृत् (नृती) नर्त्तने—नाचना To dance—नृत्यति ; नर्त्तिष्यति, नर्त्स्यति । "नृत्यति युवतिजनेन समं सखि !" गीतगो० १. ।

पुष्प् विकाशे—खिलना To open, bloom—पुष्प्यति ; पुष्पिष्यति । पुष्प्यति कुन्दकोरकम् ; शरदि पुष्प्यन्ति सप्तच्छदाः ।

भ्रंश् (भ्रन्शु) अधःपतने—भ्रष्ट होना, च्युत होना To tumble ; to stray from—भ्रश्यति ; भ्रंशिष्यति । "भ्रश्यन्ति कर्णोत्पलग्रन्थयः" महाना० १. ३१ ; "संस्थानाभ्रश्यत स्वर्गफलाद्गुरुर्नः"

र० १४. १६. । प्रायशः पञ्चमीके साथ ।

❀ परि+भ्रंश्, प्र+भ्रंश्—च्युतौ, हानौ । ❀

भ्रम् (भ्रमु) चलने (भ्रमणे); भ्रान्तौ (अयथार्थज्ञाने) च—(१) घूमना; (२) चूकना To rove, move; to err—भ्राम्यति ; भ्रमिष्यति । (१) "सूर्यो भ्राम्यति नित्यमेव गगने" भर्तृ० ; (२) "आभरणकारस्तु तालव्य इति बभ्राम" ।

मद् (मदी) हर्षे ; मत्ततायाञ्च—(१) आनन्दित होना ; (२) मतवाला होना To be glad or rejoiced; to be drunk or intoxicated—माद्यति ; मदिष्यति । (१) "सर्वलोकातिशायिन्या विभूत्या न च माद्यति" ; (२) "वीक्ष्य मद्यमितरा तु ममाद" माघ० १०. २७. ।

❀ उत्+मद्—उन्मादे, चित्तविकारे । प्र+मद्—प्रमादे, अनवधानतायाम् (ग़ाफ़िल होना) ; "न प्रमाद्यन्ति प्रमदासु विपश्चितः" मनु० २. २१७. । ❀

मुह् अविवेके (मोहे, ज्ञानरहितीभावे)—मुग्ध होना, विवेकरहित होना, संज्ञाहीन होना To be infatuated, to be perplexed or bewildered ; to faint, swoon—मुह्यति; मोहिष्यति, मोक्ष्यति । "आपत्स्वपि न मुह्यन्ति नराः पण्डितबुद्धयः" हितो० १. १७१ ; "स शुश्रुवांस्तद्वचनं मुमोह" र० १. २०. ।

यस् (यसु) प्रयत्ने ; यस्यति ।

❀ आ+यस्—प्रयत्ने ; "दैन्यात्कुन्मुखदर्शनापलपनैः पिण्डार्थ-

मायम्यत सेवां लाघवकारिणीं कृतधियः स्थाने श्ववृत्तिं विदुः" मुद्रा० ३ १४ ; खेदे च—"आयस्यसि तपस्यन्ती" म० ६. ६९. । आ + यस् + णिच्—पीडने ; " आयासयति मां जलाभिलाषः " काद० । प्र + यस्—प्रयत्ने ; "पुनः पुन· प्रायसदुत्त्प्लवाय सः" नै० १. १२५. ।

राध् सिद्धौ (निष्पत्तौ)—निष्पन्न होना To be accomplished or finished—राध्यति ; रात्स्यति । राध्यत्योदन. ।

अप + राध्—अपराधे, अनिष्टाचरणे (कुसूर करना) ; व्यक्ति और वस्तु-वाचक शब्दकी षष्ठी तथा सप्तमीके साथ—"अपराद्धोऽस्मि तत्रभवत. कण्वस्य" शाकु० ७, "यस्मिन् कस्मिन्नपि पूजार्हेऽपराद्धा शकुन्तला" शाकु० ४ ; कहीं चतुर्थीके सायमी प्रयुक्त होता है—"न दूये, सात्वतीसूनुर्यन्मह्यमपराध्यति" माघ० २. ११. । वि + राध्—अपकारे, द्रोहे । "क्रियासमभिहारेण विराध्यन्तं क्षमेत क· ?" माघ० २. ४३ ; "विराद्ध एवं भवता विराद्धा बहुधा च न" माघ० २. ४१. ।

शम् (शमु) उपशमे (शान्तभावे ; निवृत्तौ)—शान्त होना To be calm, quiet or tranquil, be appeased or pacified ; to cease—शाम्यति ; शमिष्यति। "शाम्येत् प्रत्यपकारेण नोपकारेण दुर्जन " कु० २. ४० ; "न जातु कामः कामानामुपभोगेन शाम्यति" मनु० २. ९४. ।

उप + शम्—'शम्'-वत् । नि + शम्—श्रवणे* । नि +

* "निशम्य शब्दान्" शकु० ५ २ ।

शम्+णिच्—श्रवणे* ; दर्शने च ; "निशमयति वचः" (शृणोतीत्यर्थः); दर्शने तु—"रूपं निशामयति"। "निशामय प्रियसखि!" मालती० ७.—इत्यत्र तु श्रवणार्थः। ✿

शुध् शौचे(शुद्धौ)—शुद्ध होना To become pure or purified—शुध्यति ; शोत्स्यति। "अद्भिर्गात्राणि शुध्यन्ति, मनः सत्येन शुध्यति" मनु० ५. १०९.।

✿ शुध्+णिच्—उन्मूलने ; ऋणोद्धारे ; अशुद्धिसंशोधने च ; शोधयति। परि+शुध्+णिच्—ऋणोद्धारे ; कण्टकाद्यपसारणे ; भ्रमादिसंशोधने च। वि+शुध्—शुद्धौ। ✿

शुष् शोषे (स्नेहरहितीभावे)—सूखना To be dried—शुष्यति ; शोक्ष्यति। शुष्यति धान्यमातपेन।

✿ परि, वि, सम्+शुष्—अतिशोषे। ✿

श्रम् (श्रमु) तपसि ; खेदे (श्रमे, क्लान्तौ ; दुःखे) च—(१) तपस्या करना ; (२) थकना ; दुखी होना To perform austerities ; to be wearied ; to be afflicted—श्राम्यति ; श्रमिष्यति। (१) "कियच्चिरं श्राम्यसि गौरि?" कु० ५. ५० ; (२) "आतिथेयमनिवारितातिथिः कर्त्तुमाश्रमगुरुः स नाश्रमत्" माघ० १४. ३८ ; "यो वृन्दानि त्वरयति पथि श्राम्यतां प्रोषितानाम्" मेघ० ९९.।

✿ परि+श्रम्—परिश्रमे। वि+श्रम्—विश्रामे। ✿

साध् निष्पत्तौ—निष्पन्न होना To be completed or accom-

---

* "प्रणयिनो निशमय्य स्वरम्" माघ० ६. १९.।

plished—साध्यति ; सात्स्यति । साध्यति घटः (निष्पन्नः स्यात् इत्यर्थः)।

❋ साध्+णिच्—सम्पादने ; प्राप्तौ ; पराजये ; वधे ; गमने च—"साधयाम्यहमविघ्नमस्तु ते" र० ११. ९१ ; साधयति । प्र+साध्+णिच्—अलङ्करणे ; कण्टकशोधने, वैरनिर्यातने च । ❋

सिध् (षिध्) संराद्धौ (निष्पत्तौ)—सिद्ध होना To be accomplished or fulfilled—सिध्यति ; सेत्स्यति । "उद्यमेन हि सिध्यन्ति कार्य्याणि न मनोरथैः" हितो० ३६. ।

स्निह् (ष्णिह्) प्रीतौ (स्नेहे)—प्यार करना To feel or have affection for, love, be fond of—स्निह्यति ; स्नेहिष्यति, स्नेक्ष्यति । स्निह्यति बन्धुः । जिसपर स्नेह किया जाता है, उसमें सप्तमी होती है ; "किं नु खलु बालेऽस्मिन् औरस इव पुत्रे स्निह्यति मे मनः ?" शकु० ७. ।

स्विद् (ञिष्विदा) गात्रप्रक्षरणे (घर्मच्युतौ)—पसीजना To sweat, perspire—स्विद्यति; स्वेत्स्यति । "न च स्विद्यति तस्याङ्गम्"।

हृष् हृष्टौ (आह्लादे)—खुश होना To rejoice, be delighted—हृष्यति ; हर्षिष्यति । हृष्यति लोकः सखाव् ।—(२) लोमहर्षे (बाल खड़ा होना) ; "हृष्यन्ति रोमकूपानि" महाभा० ।

दिवादि आत्मनेपदी धातु ।

मन् ज्ञाने (सम्भावने)—सोचना To think, believe, imagine.

(सकर्मक—"आत्मानं मन्यते बलिनं बली" भ० ६. २६ ; "त्वत्सम्भा-

वितमात्मानं बहु मन्यामहे वयम्" कु० ६. २०.—बहु मन्—श्लाघायाम्
To esteem highly. कथं भवान् मन्यते ?—आपका
मत क्या ? What is your opinion ?)

लट् ।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	मन्यते	मन्येते	मन्यन्ते
मध्यमपुरुष	मन्यसे	मन्येथे	मन्यध्वे
उत्तमपुरुष	मन्ये	मन्यावहे	मन्यामहे

लोट् ।

प्रथमपुरुष	मन्यताम्	मन्येताम्	मन्यन्ताम्
मध्यमपुरुष	मन्यस्व	मन्येथाम्	मन्यध्वम्
उत्तमपुरुष	मन्यै	मन्यावहै	मन्यामहै

लङ् ।

प्रथमपुरुष	अमन्यत	अमन्येताम्	अमन्यन्त
मध्यमपुरुष	अमन्यथाः	अमन्येथाम्	अमन्यध्वम्
उत्तमपुरुष	अमन्ये	अमन्यावहि	अमन्यामहि

विधिलिङ् ।

प्रथमपुरुष	मन्येत	मन्येयाताम्	मन्येरन्
मध्यमपुरुष	मन्येथाः	मन्येयाथाम्	मन्येध्वम्
उत्तमपुरुष	मन्येय	मन्येवहि	मन्येमहि

लृट् ।

प्रथमपुरुष	मंस्यते	मंस्येते	मंस्यन्ते

	एकवचन	द्विवचन	बहुवचन
मध्यमपुरुष	मंस्यसे	मंस्येथे	मंस्यध्वे
उत्तमपुरुष	मंस्ये	मंस्यावहे	मंस्यामहे

अनु + मन्—अनुमतौ, आदेशे ; स्वीकारे—"देवराय प्रदातव्या यदि कन्याऽनुमन्यते" मनु० ९. ९७.। अभि + मन्—चिन्तने, विचारणे, विवेचने ; इच्छायाञ्च । अव + मन्—अवज्ञायाम् । सम् + मन्—सम्मानने, पूजायाम् ।

जन् (जनी) प्रादुर्भावे (उत्पत्तौ)—उत्पन्न होना ; होना To be born or produced ; to become.

(अकर्मक—घटो जायते ; गोमयाद्वृश्चिको जायते । "अनिष्टादिष्ट-लाभेऽपि न गतिर्जायते शुभा" हितो० १. ९. ।)

लट्।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	जायते	जायेते	जायन्ते
मध्यमपुरुष	जायसे	जायेथे	जायध्वे
उत्तमपुरुष	जाये	जायावहे	जायामहे

लोट्।

प्रथमपुरुष	जायताम्	जायेताम्	जायन्ताम्
मध्यमपुरुष	जायस्व	जायेथाम्	जायध्वम्
उत्तमपुरुष	जायै	जायावहै	जायामहै

लङ्।

प्रथमपुरुष	अजायत	अजायेताम्	अजायन्त

	एकवचन	द्विवचन	बहुवचन
मध्यमपुरुष	अजायेथाः	अजायेथाम्	अजायध्वम्
उत्तमपुरुष	अजाये	अजायावहि	अजायामहि

विधिलिङ् ।

प्रथमपुरुष	जायेत	जायेयाताम्	जायेरन्
मध्यमपुरुष	जायेथाः	जायेयाथाम्	जायेध्वम्
उत्तमपुरुष	जायेय	जायेवहि	जायेमहि

लृट् ।

प्रथमपुरुष	जनिष्यते	जनिष्येते	जनिष्यन्ते
मध्यमपुरुष	जनिष्यसे	जनिष्येथे	जनिष्यध्वे
उत्तमपुरुष	जनिष्ये	जनिष्यावहे	जनिष्यामहे

❀ उत्पत्ति अर्थमे—अभि, उप, प्र, वि और सम् उपसर्गके साथ 'जन्'-धातु प्रयुक्त होता है । किन्तु 'प्र' और 'वि' उपसर्गके साथ सकर्मकभी कहीं होता है—'प्रसव करना' अर्थमे ; "प्रजायन्ते सुतान् नार्य्यः" । ❀

सू (षूङ्) प्रसवे (जनने, उत्पादने)—पैदा करना, जनना

To bring forth ; to produce.

(सकर्मक—सूयते पुत्रं नारी ; धर्मोऽर्थं सूयते ।)

लट् ।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	सूयते	सूयेते	सूयन्ते
मध्यमपुरुष	सूयसे	सूयेथे	सूयध्वे

	एकवचन	द्विवचन	बहुवचन
उत्तमपुरुष	सूये	सूयावहे	सूयामहे

लोट्।

प्रथमपुरुष	सूयताम्	सूयेताम्	सूयन्ताम्
मध्यमपुरुष	सूयस्व	सूयेथाम्	सूयध्वम्
उत्तमपुरुष	सूयै	सूयावहै	सूयामहै

लङ्।

प्रथमपुरुष	असूयत	असूयेताम्	असूयन्त
मध्यमपुरुष	असूयथाः	असूयेथाम्	असूयध्वम्
उत्तमपुरुष	असूये	असूयावहि	असूयामहि

विधिलिङ्।

प्रथमपुरुष	सूयेत	सूयेयाताम्	सूयेरन्
मध्यमपुरुष	सूयेथाः	सूयेयाथाम्	सूयेध्वम्
उत्तमपुरुष	सूयेय	सूयेवहि	सूयेमहि

लृट्।

प्रथमपुरुष	सविष्यते	सविष्येते	सविष्यन्ते
	सोष्यते	सोष्येते	सोष्यन्ते
मध्यमपुरुष	सविष्यसे	सविष्येथे	सविष्यध्वे
	सोष्यसे	सोष्येथे	सोष्यध्वे
उत्तमपुरुष	सविष्ये	सविष्यावहे	सविष्यामहे
	सोष्ये	सोष्यावहे	सोष्यामहे

अनुवाद करो—तुमलोगोंने मेरे इन वस्त्रोंको सीया था क्या ? उन्होंने

यहाँ नृत्य किया था। ज्वरसे उसका शरीर जीर्ण हो गया। ध्रुवने विजन वनमे कृष्णकी (द्वितीया) आराधना की थी, इसलिये उसका मनोरथ सिद्ध हुआ। उस हरिणको वाणसे विद्ध मत करो। कुटिल मनुष्य अपना भाव हृदयमे पोषण करते हैं। प्रचण्ड आतपतापसे देहका रक्त शुष्क होता है। माता पुत्रको आलिङ्गन करती है।

* * * *

दिवादि सकर्मक आत्मनेपदी धातु।

पद् गतौ (प्राप्तौ च)—(१) जाना ; (२) पाना To go ; to attain—पद्यते ; पत्स्यते। (२) "ज्योतिषामाधिपत्यञ्च प्रभावञ्चाप्यपद्यत" महाभा०।

☙ अनु, अभि + पद्—प्राप्तौ। आ + पद्—प्राप्तौ ; विपत्प्राप्तौ च—"अर्थधर्मौ परित्यज्य यः काममनुवर्त्तते। एवमापद्यते क्षिप्रं राजा दशरथो यथा॥" रामा०। वि + आ + पद्—मरणे। वि + आ + पद् + णिच्—व्यापादने, हनने ; व्यापादयति। उत् + पद्—उत्पत्तौ। वि + उत् + पद्—व्युत्पत्तौ। उप + पद्—(१) योग्यतायाम् ; "मद्भावायोपपद्यते" (उपयुक्तो भवति) गीता. १३. १८ ; "नैतत् त्वय्युपपद्यते" (योग्यं न भवति) गीता. २. ३ ; (२) सम्भावने ; "पुत्रदौहित्रयोर्विशेषो नोपपद्यते" (न सम्भाव्यते) मनु० ९. १३९ ; (३) प्राप्तौ ; "उपपद्यस्व स्वकर्मोचितां गतिम्" दशकु० ; (४) सिद्धौ, सम्पन्नतायाम् ; "सर्वं सखे त्वय्युपपन्नमेतत्" (सिद्धम्) कु० ३. १२.। अभि + उप + पद्—अनुग्रहे। निर् + पद्—निष्पत्तौ, सिद्धौ। प्र + पद्—गतौ ; प्राप्तौ च ; "ये

यथा मां प्रपद्यन्ते" (समाश्रयन्ते) गीता. ४. ११. । प्रति+पद्—प्राप्तौ ; ज्ञाने ; अङ्गीकारे ; उत्पादाने च—"कथं प्रतिवचनमपि न प्रतिपद्यसे ?" मुद्रा० ६. । प्रति+पद्+णिच्—बोधने । वि+प्रति+पद्—विरोधे, विरुद्धज्ञाने ; संशये । वि+पद्—विपत्तौ ; मरणे च । सम्+पद्—सम्पन्नतायाम् (होना); "सम्पत्स्यते वः कामोऽयम्" कु० २. ५४ ; "सम्पत्स्यन्ते नभसि भवतो राजहंसाः सहायाः." (भविष्यन्ति) मेघ० ११ ; "साधोः शिक्षा गुणाय सम्पद्यते, नासाधोः (गुणम् उत्पादयति इत्यर्थः) पञ्च० १.—सदा चतुर्थी के साथ । सम्+पद्+णिच्—सम्पादने ; सम्पादयति । ✤

बुध् ज्ञाने ; जागरणे च—(१) समझना ; (२) जागना (अक०) To understand ; to wake up—बुध्यते ; भोत्स्यते । (१) बुध्यन्ते शास्त्रं सुधीः ; (२) "ते च प्रापुरुदन्वन्तं बुबुधे चादिपूरुषः" र० १०. ६. ।

✤ अनु+बुध्—स्मरणे ; ज्ञाने । अव+बुध्—ज्ञाने । उत्+बुध्—विकासे ; जागरणे च । नि+बुध्—ज्ञाने ; श्रवणे च ; भ्वादि परस्मैपदी—निबोधति । प्र+बुध्—जागरणे ; विकासे ; ज्ञाने च । प्रति, वि+बुध्—जागरणे । सम्+बुध्—ज्ञाने । ✤

दिवादि अकर्मक आत्मनेपदी धातु ।

खिद् दैन्ये (दीनभावे, उपतप्तभावे, दुःखानुभवे)—दुःख पाना, खिन्न होना To suffer pain or misery, to be depressed or exhausted—खिद्यते ; खेत्स्यते । "स्वसुखनिरभिलाषः खिद्यसे लोकहेतोः" शकु० ५. ७ ; "स पुरुषो यः खिद्यते नेन्द्रियैः"

हितो० २. १३९.।

डी उड्डयने (नभोगमने)—उड़ना To fly—डीयते ; डयिष्यते।

दीप् (दीपी) दीप्तौ (उज्ज्वलीभावे, प्रकाशे, शोभायाम्, ज्वलने)—चमकना To shine, to burn or be lighted—दीप्यते ; दीपिष्यते। दीप्यते निशि चन्द्रमाः।

उत, प्र, सम्+दीप्—ज्वलने।

दू (दुङ्) उपतापे (खेदे)—दुःखित होना To be afflicted, to be sorry—दूयते ; दविष्यते। "दुर्जनोक्त्या न दूयते"।

प्री (प्रीङ्) प्रीतौ—प्रीत होना To be satisfied or pleased—प्रीयते ; प्रेष्यते। "प्रकाममप्रीयत यज्वनां प्रियः" माघ० १. १७.।

युज् समाधौ (चित्तवृत्तिनिरोधे); योग्यभावे च—(१) चित्तको एकाग्र करना ; (२) योग्य होना To concentrate the mind ; to be fit or right, be proper—युज्यते ; योक्ष्यते। (१) युज्यते योगी ; (२) शेषोक्त अर्थमे षष्ठी और सप्तमीके साथ प्रयुक्त होता है ; "या यस्य युज्यते भूमिका, तां खलु भावेन तथैव सर्वे वर्गाः पाठिताः" मालती० १ ; "त्रैलोक्यस्यापि प्रभुत्वं त्वयि युज्यते" हितो० १.।

युध् युद्धे (अभिभवेच्छायाम्)—लड़ाई करना To fight—युध्यते ; योत्स्यते। "तुण्डघातमयुध्यत" भ० ९. १०१.।

ली (लीङ्) श्लेषे (लीनभावे)—लीन होना (चिपटना ; छिपकर रहना, गायब होना ; गलना) To stick or adhere firmly to ; to lurk ; to disappear ; to melt away—

लीयते ; लेष्यते। लीयते चन्द्रः सूर्य्ये ; "(भृङ्गाङ्गनाः) लीयन्ते मुकुलान्तरेषु शनकैः सञ्जातलज्जा इव" रत्ना० १. २६.।

⁂ नि+ली—संश्लेषे ; निभृतावस्थाने (छिपना) च। वि+ली—नाशे ; द्रवीभावे (पिघलना) ; अवस्थाने च—"पुरोऽस्य यावन्न भुवि व्यलीयत" माघ० १. १२.। वि+ली+णिच्—द्रवीकरणे। ⁂

विद् सत्तायाम् (विद्यमानतायाम्)—रहना To be, exist—विद्यते ; वेत्स्यते। "अपापानां कुले जाते मयि पापं न विद्यते" मृच्छ० ९. ३७.।

⁂ निर्+विद्—आत्मावज्ञायाम् ; अनुतापे ; वैराग्ये च। ⁂

दिवादि सकर्मक उभयपदी धातु।

नह् (णह्) बन्धने—बांधना To tie, bind ; gird round—नह्यति, नह्यते ; नत्स्यति, नत्स्यते। "पूरावभासे विपणिस्थपण्या सर्वाङ्गनद्धाभरणेव नारी" र० १६. ४१ ; "शैलेयनद्धेषु शिलातलेषु निषेदुः" (व्याप्तेषु इत्यर्थः) कु० १. ५५.।

⁂ अपि+नह्—बन्धने ; आच्छादने च ; प्रायः अकारका लोप होता है ; "मन्दारमाला हरिणा पिनद्धा" शकु० ७. २ ; "कवच पिनद्ध" भ० ३. ४७.। उत्+नह्—उद्यमस्य बन्धने। परि+नह्—वेष्टने। सम्+नह्—आच्छादने ; मिलने ; उद्योगे (आत्मनेपदी) च—"छेत्तुं वज्रमणीन् शिरीषकुसुमप्रान्तेन सन्नह्यते" भर्तृ०। ⁂

मृष् तितिक्षायाम् (क्षमायाम्)—सहना ; क्षमा करना To put up with ; to pardon—मृष्यति, मृष्यते ; मर्षिष्यति, मर्षिष्यते।

"वासन्ती—तत् किमिदमकार्य्यमनुष्ठितं देवेन ? रामः—लोको न मृष्यतीति" उत्तर० ३ ; "मृष्यन्तु लवस्य वालिशतां तातपादाः" उत्तर० ६. ।

दिवादि अकर्मक उभयपदी धातु ।

क्लिश् उपतापे (क्लेशे)—क्लेश पाना To be afflicted—क्लिश्यति, क्लिश्यते ; क्लेशिष्यति, क्लेशिष्यते । वोपदेवमते—उभयपदी ; पाणिनिमते—आत्मनेपदी । "त्रयः परार्थे क्लिश्यन्ति साक्षिणः प्रतिभूः कुलम्" मनु० ८. १६९. ।

रञ्ज् (रन्ज्) रागे (आसक्तौ ; रक्तीभावे च)—(१) अनुरक्त होना, मायल होना ; (२) लाल होना To be attached or devoted to ; to become red—रज्यति, रज्यते ; रङ्क्ष्यति, रङ्क्ष्यते । (१) "दैवानियं निषधराजरुचस्त्यजन्ती रूपादरज्यत नले न विदर्भसुभ्रूः" नै० १३. ३८ ; (२) "नेत्रे स्वयं रज्यतः" उत्तर० ५. ३९. ।

रञ्ज् + णिच्—लाक्षादिना रक्तीकरणे (रङ्गना) ; प्रसादने च (खुश् करना) ; रञ्जयति । अनु + रञ्ज्—अनुरागे । अप + रञ्ज्—विरागे । उप + रञ्ज्—उपरागे, राहुग्रासे । वि + रञ्ज्—विरागे ।

अनुवाद करो—विनोदिनीने दो सन्तानका (द्वितीया) प्रसव किया है । लक्ष्मणने इन्द्रजित्के साथ युद्ध किया था । वे पद-पदमे (प्रतिपदम्) विपन्न होते हैं । यह काम तीन दिनोंमे सम्पन्न हुआ था । जो इसे समझेगा, वह फल पायेगा । उसके परुष भाषणसे सब कोई दुःखित हुए । यदि वनमे व्याघ्र न रहे, तो जाओ । हम कभी उसके वचनसे खिन्न

नहीं होंगे । सब लोगोंने वक्ताके वाक्यका आशय अच्छे प्रकारसे नहीं समझा ।

स्वादि ।

क्रियाघटन-सूत्र ।

[इस प्रकरणमें २६८ । २६० । २६१ सूत्रोंका कार्य्य होगा ।]

२७८ । चतुर्लकार परे रहनेसे, कर्त्तृवाच्यमें स्वादिगणीय धातुके उत्तर 'नु' आगम होता है ; यथा—सु + ति = सु + नु + ति—

२७६ । * सगुण (ति, सि, मि, तु, द्, स्, आनि, आव, आम, अम्, ऐ, आवहै, आमहै) विभक्ति परे रहनेसे, 'नु' और 'उ' इन दोनो आगमोंका गुण होता है ; यथा—सुनोति । उ—तन् + उ + ति = तनोति ।

२७७ । 'नु' परे रहनेसे, 'श्रु' के स्थानमें 'शृ', और 'धिव्' के स्थानमें 'धि' होता है ; यथा—श्रु + ति = श्रु + नु + ति = शृ + णु + ति = शृ + णो + ति = शृणोति ; धिव् + ति = धिव् + नु + ति = धि + नु + ति = धि + नो + ति = धिनोति ॥

२७८ । * विभक्तिका अगुण स्वरवर्ण परे रहनेसे, स्वरवर्णके परस्थित 'नु' और 'उ' आगमोंके उकारके स्थानमें 'व्', और व्यञ्जनवर्णके परस्थित 'नु' के उकारके स्थानमें 'उव्' होता है ; यथा—(स्वर) श्रु + अन्ति = श्रु + नु + अन्ति = शृ + णु + अन्ति = शृ + ण् + व् + अन्ति = शृण्वन्ति । (व्यञ्जन) शक् + अन्ति = शक् + नु + अन्ति = शक् + न् + उव् + अन्ति = शक्नुवन्ति ।

२७९ । * 'व' और 'म' परे रहनेसे, 'नु' और 'उ' आगमोंके

उकारका विकल्पसे लोप होता है ; किन्तु 'नु' व्यञ्जनवर्णसे मिलित होनेसे नहीं होता ; यथा—(नु) श्रृणु + वः = श्रृण्वः, श्रृणुवः । (उ) तन् + उ + वः = तन्वः, तनुवः । व्यञ्जन—शक्नुवः ।

२८० । * सकार-भिन्न अन्य वर्णके परस्थित 'अन्ते,' 'अन्ताम्' और 'अन्त' विभक्तिके नकारका लोप होता है ; यथा—अश्नुव् + अन्ते = अश्नुव् + अते = अश्नुवते ।

स्वादि परस्मैपदी धातु ।

श्रु श्रवणे—सुनना To hear.

(सकर्मक—"मार्गं तावच्छृणु कथयतस्त्व-
त्प्रयाणानुरूपम्" मेघ० १३. ।)

लट् ।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	श्रृणोति	श्रृणुतः	श्रृण्वन्ति
मध्यमपुरुष	श्रृणोषि	श्रृणुथः	श्रृणुथ
उत्तमपुरुष	श्रृणोमि	श्रृण्वः, श्रृणुवः	श्रृण्मः, श्रृणुमः

लोट् ।

प्रथमपुरुष	श्रृणोतु	श्रृणुताम्	श्रृण्वन्तु
मध्यमपुरुष	श्रृणु	श्रृणुतम्	श्रृणुत
उत्तमपुरुष	श्रृणवानि	श्रृणवाव	श्रृणवाम

लङ् ।

प्रथमपुरुष	अश्रृणोत्	अश्रृणुताम्	अश्रृण्वन्
मध्यमपुरुष	अश्रृणोः	अश्रृणुतम्	अश्रृणुत

	एकवचन	द्विवचन	बहुवचन
उत्तमपुरुष	अशृणवम्	अशृण्व, अशृणुव	अशृण्म, अशृणुम

विधिलिङ् ।

प्रथमपुरुष	शृणुयात्	शृणुयाताम्	शृणुयुः
मध्यमपुरुष	शृणुयाः	शृणुयातम्	शृणुयात
उत्तमपुरुष	शृणुयाम्	शृणुयाव	शृणुयाम

लृट् ।

प्रथमपुरुष	श्रोष्यति	श्रोष्यतः	श्रोष्यन्ति
मध्यमपुरुष	श्रोष्यसि	श्रोष्यथः	श्रोष्यथ
उत्तमपुरुष	श्रोष्यामि	श्रोष्यावः	श्रोष्यामः

** आ+श्रु, प्रति+श्रु—प्रतिज्ञायाम् । सम्+श्रु—अकर्मकात् आत्मनेपदम्; संशृणुते; "हितान्न यः संशृणुते स किंप्रभुः" भा० १.५. । **

शक् (शक्लृ) सामर्थ्ये—सकना To be able.

(अकर्मक; 'तुमुन्'-अन्त क्रियापदके साथ प्रायशः प्रयुक्त होता है—भक्तः शक्नोति हरिं द्रष्टुम् । सकर्मक धातुके योगसे सकर्मक होता है; इदं वस्तु शक्यते; "शक्योऽस्य मन्युर्भवता विनेतुम्" र० २.४९; अन्यत्रापि—"शक्या मनसापि सुदूरोऽमराणाम्"—पम्याद्याः इत्यर्थः—नै० ६.९८ ।)

लट् ।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	शक्नोति	शक्नुतः	शक्नुवन्ति

	एकवचन	द्विवचन	बहुवचन
मध्यमपुरुष	शक्नोषि	शक्नुथः	शक्नुथ
उत्तमपुरुष	शक्नोमि	शक्नुवः	शक्नुमः

लोट् ।

प्रथमपुरुष	शक्नोतु	शक्नुताम्	शक्नुवन्तु
मध्यमपुरुष	शक्नुहि	शक्नुतम्	शक्नुत
उत्तमपुरुष	शक्नवानि	शक्नवाव	शक्नवाम

लङ् ।

प्रथमपुरुष	अशक्नोत्	अशक्नुताम्	अशक्नुवन्
मध्यमपुरुष	अशक्नोः	अशक्नुतम्	अशक्नुत
उत्तमपुरुष	अशक्नवम्	अशक्नुव	अशक्नुम

विधिलिङ्—शक्नुयात् । लृट्—शक्ष्यति ।

अनुवाद करो—सबसमय गुरुजनोंका वाक्य सुनना । कभी अश्लील वाक्य सुनना नहीं चाहिये । मैंने प्रातःकालमे मेघका गर्जन सुना था । तू कोकिलकी मधुर ध्वनि नहीं सुनता है क्या ? राम श्याम दोनो भाई गान सुन रहे हैं ।

* * * *

स्वादि सकर्मक परस्मैपदी धातु ।

आप् (आप्लृ) प्राप्तौ—पाना To obtain—आप्नोति ; आप्स्यति ।

ज्ञानात् कैवल्यमाप्नोति ।

☙ अव+आप्—प्राप्तौ, लाभे । प्र+आप्—प्राप्तौ ; उपगमने च—"जटायुः प्राप रावणम्" भ० ५. ९६ ; "प्रापदाश्रमम्" र०

१. ४९. । सम्+प्र+आप्—सम्प्राप्तौ । वि+आप्—व्याप्तौ । सम्+आप्—प्राप्तौ । सम्+आप्+णिच्—समापने, समाप्ति करणे ; समापयति । ❀

क्षि हिंसायाम् (नाशे)—नष्ट करना To destroy—क्षिणोति ; क्षेष्यति । "न तद्यशः शस्त्रभृतां क्षिणोति" र० २. ४०. ।

❀ कर्मकर्त्तरि—क्षीयते (क्षीण होना) ; "प्रतिक्षणमयं कायः क्षीयमाणो न लक्ष्यते" हितो० ४. ६९ ; "प्रत्यासन्नविपत्तिमूढमनसां प्रायो मतिः क्षीयते" पञ्च० २. ४. । ❀

दु (टुदु) उपतापने (पीड़ने)—दुखाना, सताना To torment, afflict—दुनोति ; दोष्यति । "वर्णप्रकर्षे सति कर्णिकारं दुनोति निर्गन्धतया स्म चेतः" कु० ३. २८. । "मन्मथेन दुनोमि" गीतगो० २. ९.—इत्यत्र अकर्मकः ।

धिन्व् (धिवि) प्रीणने—सन्तुष्ट करना To please, satisfy—धिनोति ; धिन्विष्यति । "धिनोति हव्येन हिरण्यरेतसम्" भा० १. २२. ।

पृ प्रीणने—पृणोति ; परिष्यति । अतिथीन् पृणोति ।

हि प्रेरणे—प्रेरण करना ; निक्षेप करना To send forth, impel ; to throw or discharge—हिनोति ; हेष्यति । "गदा शक्रजिता जिघ्ये" भ० १४. ३६. ।

❀ प्र+हि—प्रेरणे (भेजना) ; निक्षेपे च । ❀

स्वादि सकर्मक आत्मनेपदी धातु ।

अश् (अशू) व्याप्तौ (पूरणे, आच्छादने ; प्राप्तौ)—(१) व्याप्त

करना ; (२) प्राप्त होना To pervade, fill completely ; to get, obtain.

((१) "क्ष्मातलं बलजलराशिरानशे" माघ० १७. ४६ ; (२) "अत्युत्कटैः पुण्यपापैरिहैव फलमश्नुते" हितो० १. ८४. ।)

लट् ।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	अश्नुते	अश्नुवाते	अश्नुवते
मध्यमपुरुष	अश्नुषे	अश्नुवाथे	अश्नुध्वे
उत्तमपुरुष	अश्नुवे	अश्नुवहे	अश्नुमहे

लोट् ।

प्रथमपुरुष	अश्नुताम्	अश्नुवाताम्	अश्नुवताम्
मध्यमपुरुष	अश्नुष्व	अश्नुवाथाम्	अश्नुध्वम्
उत्तमपुरुष	अश्नवै	अश्नवावहै	अश्नवामहै

लङ् ।

प्रथमपुरुष	आश्नुत	आश्नुवाताम्	आश्नुवत
मध्यमपुरुष	आश्नुथाः	आश्नुवाथाम्	आश्नुध्वम्
उत्तमपुरुष	आश्नुवि	आश्नुवहि	आश्नुमहि

विधिलिङ् ।

प्रथमपुरुष	अश्नुवीत	अश्नुवीयाताम्	अश्नुवीरन्
मध्यमपुरुष	अश्नुवीथाः	अश्नुवीयाथाम्	अश्नुवीध्वम्
उत्तमपुरुष	अश्नुवीय	अश्नुवीवहि	अश्नुवीमहि

लृट्।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	अशिष्यते अदयते	अशिष्येते अदयेते	अशिष्यन्ते अदयन्ते
मध्यमपुरुष	अशिष्यसे अदयसे	अशिष्येथे अदयेथे	अशिष्यध्वे अदयध्वे
उत्तमपुरुष	अशिष्ये अदये	अशिष्यावहे अदयावहे	अशिष्यामहे अदयामहे

स्वादि सकर्मक उभयपदी धातु।

वृ (वृञ्) वरणे (प्रार्थनायाम्)—मनोनीत करना, पसन्द करना, चाहना To choose, select (as a boon).

("ववार रामस्य वनप्रयाणम्" भ० ३. ६;

"यदेव वव्रे तदपश्यदाहृतम्" र० ३. ६.१)

(परस्मैपद)

लट्।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	वृणोति	वृणुतः	वृण्वन्ति
मध्यमपुरुष	वृणोषि	वृणुथः	वृणुथ
उत्तमपुरुष	वृणोमि	वृण्वः, वृणुवः	वृण्मः, वृणुमः

लोट्।

प्रथमपुरुष	वृणोतु	वृणुताम्	वृण्वन्तु

	एकवचन	द्विवचन	बहुवचन
मध्यमपुरुष	वृणु	वृणुतम्	वृणुत
उत्तमपुरुष	वृणवानि	वृणवाव	वृणवाम

लङ् ।

प्रथमपुरुष	अवृणोत्	अवृणुताम्	अवृण्वन्
मध्यमपुरुष	अवृणोः	अवृणुतम्	अवृणुत
उत्तमपुरुष	अवृणवम्	अवृण्व,अवृणुव	अवृण्म,अवृणुम

विधिलिङ् ।

प्रथमपुरुष	वृणुयात्	वृणुयाताम्	वृणुयुः
मध्यमपुरुष	वृणुयाः	वृणुयातम्	वृणुयात
उत्तमपुरुष	वृणुयाम्	वृणुयाव	वृणुयाम

लृट्—वरिष्यति, वरीष्यति ।

(आत्मनेपद)

लट् ।

प्रथमपुरुष	वृणुते	वृण्वाते	वृण्वते
मध्यमपुरुष	वृणुषे	वृण्वाथे	वृणुध्वे
उत्तमपुरुष	वृण्वे	वृणुवहे	वृणुमहे

लोट् ।

प्रथमपुरुष	वृणुताम्	वृण्वाताम्	वृण्वताम्
मध्यमपुरुष	वृणुष्व	वृण्वाथाम्	वृणुध्वम्
उत्तमपुरुष	वृणवै	वृणवावहै	वृणवामहै

लङ्।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	अवृणुत	अवृण्वाताम्	अवृण्वत
मध्यमपुरुष	अवृणुथाः	अवृण्वाथाम्	अवृणुध्वम्
उत्तमपुरुष	अवृण्वि	अवृणुवहि	अवृणुमहि

विधिलिङ्।

प्रथमपुरुष	वृण्वीत	वृण्वीयाताम्	वृण्वीरन्
मध्यमपुरुष	वृण्वीथाः	वृण्वीयाथाम्	वृण्वीध्वम्
उत्तमपुरुष	वृण्वीय	वृण्वीवहि	वृण्वीमहि

लृट्—वरिष्यते, वरीष्यते।

❀ अप + वृ, अप + आ + वृ—उन्मोचने, प्रकाशने । आ + वृ—गोपने; आच्छादने; रोधे च। प्र + आ + वृ—परिधाने। नि + वृ + णिच्—निवारणे; निवारयति । निर् + वृ—निर्वृतौ, सुखे, स्वस्थतायाम् । वि + वृ—व्याख्याने; प्रकाशने च । परि + वृ—वेष्टने। सम् + वृ—गोपने; निरोधे च। ❀

* * * *

स्वादि सकर्मक उभयपदी धातु ।

चि (चिञ्) चयने (राशीकरणे, सङ्ग्रहणे)—चुनना, बटोरना, इकट्ठा करना To collect, gather, accumulate—चिनोति, चिनुते; चेष्यति, चेष्यते । द्विकर्मक—वृक्षं पुष्पं चिनोति ।

❀ कर्मकर्त्तरि—वृद्धौ (बढ़ना); चीयते; "राजहंस! तव सैव शुभ्रता चीयते न च न चापचीयते" काव्यप्रकाशः; "चीयते बालिश-

स्यापि सत्क्षेत्रपतिता कृषिः” मुद्रा० १. ३. । अप + चि—कर्मकर्त्तरि —हानौ, क्षये ; अपचीयते । अव + चि—चयने । आ + चि—सञ्चये, सञ्चहे ; व्याप्तौ, आच्छादने च । उत् + चि—सङ्ग्रहे । उप + चि—वर्द्धने (बढ़ाना) ; “यशःस्तोमानुच्चैरुपचिनु” अनर्घ० १. ३५;—कर्मकर्त्तरि—वृद्धौ ; उपचीयते ; “बलेनैव सहोपचीयते मदः” काद० । नि + चि—व्याप्तौ ; प्रधानतः ‘क्त’-प्रत्ययान्तही व्यवहृत होता है ; “शकुन्तनीडनिचितं बिभ्रज्जटामण्डलम्” शकु० ७. ११. । निर् + चि —निश्चये । परि + चि—ज्ञाने ; अभ्यासे च । प्र + चि—कर्मकर्त्तरि —वृद्धौ ; प्रचीयते । वि + चि—सञ्चये ; अन्वेषणे च—“विष्णुं विचिन्वन्ति योगिनो विमुक्तये” (ध्यायन्तीत्यर्थः) र० १०. २३. । सम् + चि—सञ्चये । ❦

धु (धुञ्), धू (धूञ्) कम्पने—हिलाना To shake—धुनोति, धुनुते ; धूनोति, धूनुते ; धु—अनिट्, धू—वेट् ; धोष्यति धोष्यते; धविष्यति धविष्यते । “धूनोति चम्पकवनानि धुनोत्यशोकं (वायुः)”। (२) अपनोदने ; “स्रजमपि शिरस्यन्धः क्षिप्तां धुनोत्यहिशङ्कया” शकु० ७. २४. ।

❦ अव + धू—निरासे । आ + धू—ईषत्कम्पे । उत् + धू—उत्क्षेपे । निर् + धू, वि + धू—निरासे, नाशे । ❦

सु (षुञ्) सुरासन्धाने ; सोमादेः पीडने ; मन्थने ; स्नाने च—(१) मद्य चुआना ; (२) सोमलताप्रभृतिको निचोड़ना ; (३) मथना; (४) नहाना (अक०) To distil ; to press out or extract juice ; to churn ; to bathe—सुनोति, सुनुते ;

सोष्यति, सोष्यते।

⁂ अभि+सु—स्नाने; अभिषुणोति; "वारांश्चीनमिषुण्वते" अनर्घ: २. १९. । ⁂

स्तृ (स्तृञ्) आच्छादने—ढाँपना, बिछाना To spread, strew, cover—स्तृणोति, स्तृणुते; स्तरिष्यति, स्तरिष्यते। "शिरोभिर्मही तस्तार" र० ४. ६३.।

⁂ आ+स्तृ—विस्तारे (बिछाना)। परि+स्तृ—विस्तारे; आवरणे च। वि+स्तृ—विस्तारे। ⁂

अनुवाद करो—जो सर्वान्तःकरणसे प्रयत्न करता है, वह उपयुक्त फल पाता है। इस वर्ष वणिक्-लोगोंने वाणिज्यसे लक्ष रुपये प्राप्त किये हैं। परिश्रमका फल तुमने पाया, परन्तु उसने क्यों नहीं पाया? मनुष्य पूर्ण अध्यवसायसे क्या नहीं पा सकता? मेघ चारों दिशायें व्याप्त करता है। प्रबल झञ्झावातसे वृक्षसमूह कम्पित होते हैं। भक्तगण प्रातःकालमें उठकर (उत्थाय) पुष्प चयन करते हैं। परिमित और नियमित भोजनसे शरीरका स्वास्थ्य और बल बढते हैं। बाल्यकालसेही प्रतिदिन थोड़ी थोडी विद्या सञ्चय करना और उसके लिये (तदर्थम्) सद्गुरुका (द्वितीया) वरण करना चाहिये। शङ्का मत करो। मेरे साथ रामचन्द्रको प्रेरण करो। राक्षस हमें अत्यन्त सताते हैं। रामचन्द्र अवश्य राक्षसोंका (द्वितीया) संहार करनेमें (संहर्त्तुम्) समर्थ होगा।

तनादि ।

क्रियाघटन-सूत्र ।

[इस प्रकरणमे २९८ । २६० । २६१ । २७६ । २७८ । २७९ । २८० सूत्रोंका कार्य्य होगा ।]

२८१ । चतुर्लकार परे रहनेसे, कर्त्तृवाच्यमे तनादिगणीय धातुके उत्तर 'उ' आगम होता है ; यथा—तन् + ति = तन् + उ + ति = तनोति ।

२८२ । सगुण विभक्ति परे रहनेसे, कृ—कर्, अन्यत्र 'कुर्' होता है ।

२८३ । व, म और य परे रहनेसे, 'कृ' धातुके उत्तर विहित 'उ' आगमका लोप होता है ।

तनादि सकर्मक उभयपदी धातु ।

कृ (डुकृञ्) करणे—करना To do.

("तात ! किं न करवाण्यहम् ?" ; "सत्सङ्गतिः कथय किं न करोति पुंसाम्" भर्त्तृ० ।)

(परस्मैपद)

लट् ।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	करोति	कुरुतः	कुर्वन्ति
मध्यमपुरुष	करोषि	कुरुथः	कुरुथ
उत्तमपुरुष	करोमि	कुर्वः	कुर्मः

लोट्।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	करोतु	कुरुताम्	कुर्वन्तु
मध्यमपुरुष	कुरु	कुरुतम्	कुरुत
उत्तमपुरुष	करवाणि	करवाव	करवाम

लङ्।

प्रथमपुरुष	अकरोत्	अकुरुताम्	अकुर्वन्
मध्यमपुरुष	अकरोः	अकुरुतम्	अकुरुत
उत्तमपुरुष	अकरवम्	अकुर्व	अकुर्म

विधिलिङ्।

प्रथमपुरुष	कुर्य्यात्	कुर्य्याताम्	कुर्य्युः
मध्यमपुरुष	कुर्य्याः	कुर्य्यातम्	कुर्य्यात
उत्तमपुरुष	कुर्य्याम्	कुर्य्याव	कुर्य्याम

लृट्।

प्रथमपुरुष	करिष्यति	करिष्यतः	करिष्यन्ति
मध्यमपुरुष	करिष्यसि	करिष्यथः	करिष्यथ
उत्तमपुरुष	करिष्यामि	करिष्यावः	करिष्यामः

(आत्मनेपद)

लट्।

प्रथमपुरुष	कुरुते	कुर्वाते	कुर्वते
मध्यमपुरुष	कुरुषे	कुर्वाथे	कुरुध्वे
उत्तमपुरुष	कुर्वे	कुर्वहे	कुर्महे

लोट् ।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	कुरुताम्	कुर्वाताम्	कुर्वताम्
मध्यमपुरुष	कुरुष्व	कुर्वाथाम्	कुरुध्वम्
उत्तमपुरुष	करवै	करवावहै	करवामहै

लङ् ।

प्रथमपुरुष	अकुरुत	अकुर्वाताम्	अकुर्वत
मध्यमपुरुष	अकुरुथाः	अकुर्वाथाम्	अकुरुध्वम्
उत्तमपुरुष	अकुर्वि	अकुर्वहि	अकुर्महि

विधिलिङ् ।

प्रथमपुरुष	कुर्वीत	कुर्वीयाताम्	कुर्वीरन्
मध्यमपुरुष	कुर्वीथाः	कुर्वीयाथाम्	कुर्वीध्वम्
उत्तमपुरुष	कुर्वीय	कुर्वीवहि	कुर्वीमहि

लृट् ।

प्रथमपुरुष	करिष्यते	करिष्येते	करिष्यन्ते
मध्यमपुरुष	करिष्यसे	करिष्येथे	करिष्यध्वे
उत्तमपुरुष	करिष्ये	करिष्यावहे	करिष्यामहे

❧ अलम् + कृ—भूषणे (सजाना) ; अलङ्करोति । उरी, उररी + कृ—स्वीकारे । पुरस् + कृ—पूजायाम् ; अग्रतः करणे च । तिरस् + कृ—भर्त्सने ; आच्छादने च । वहिस् + कृ—दूरीकरणे ; बहिष्करोति । सत् + कृ—आदरे । नमस् + कृ—नमस्कारे । सजूः + कृ—सहायीकरणे । अधि + कृ—स्वामित्वे ; नियोगे ; विषयीकरणे च । अनु + कृ—अनुकरणे । अप +

कृ—अपकारे; जिसका अपकार किया जाय, उसमें प्रायशः षष्ठी होती है; "किं तस्या मयाऽपकृतम् ?" पञ्च० ४; कहीं द्वितीया और सप्तमीभी होती है; "अथवा सैनिकाः केचिदपकुर्य्युर्युधिष्ठिरम्" महाभा०; "न परंपु महौजसश्छलादपकुर्वन्ति मलिम्लुचा इव" माघ० १६. ५२. । आ + कृ + णिच्—आह्वाने; आकारयति । अप + आ + कृ—अपसारणे । उप + आ + कृ—संस्कारपूर्वकवेदग्रहणे; संस्कारपूर्वकपशुहनने च; "सौमित्रे! गोसहस्रमुपाकुरु" रामा० । निर् + आ + कृ—निराकरणे, निरासे । वि + आ + कृ—व्याख्यायाम् । उप + कृ—उपकारे; प्रायशः षष्ठीके साथ; "न हि दीपौ परस्परस्योपकुरुत." शारीरकभाष्यम्; (२) करणे च; "किं ते भूयः प्रियमुपकरोमि ?" । परा + कृ—परिहरणे । परि + कृ—भूषणे; शोधने, निर्मलीकरणे च; परिष्करोति, पर्य्यस्करोत । वि + प्र + कृ—पीडने; "किं सत्त्वानि विप्रकरोषि ?" शकु० ७; (२) विकारप्रापणे च; "क्षमपरमवशं न विप्रकुर्य्युर्विभुमपि तं यदमी स्पृशन्ति भावाः ?" कु० ६. ९५. । प्रति + कृ—प्रतिकारे । वि + कृ—विकारे; "उपयन्नपयन् धर्मो विकरोति हि धर्मिणम्"; "चित्तं विकरोति कामः."; अकर्मक होनेसे आत्मनेपदी होता है; "हीनान्यनुपकर्त्तॄणि प्रवृद्धानि विकुर्वते (मित्राणि)" र० १७. ५८. (विरुद्धं चेष्टन्ते, अपकुर्वते इत्यर्थः)। सम् + कृ—अलङ्करणे; शोधने च; संस्करोति । सुट्

* * * *

तन् (तनु) विस्तारे (प्रसारणे)—तानना, पसारना, फैलाना To spread, stretch, extend—तनोति, तनुते; तनिष्यति, तनिष्यते । "तनोति रविरातपम्" कु० २. ३३. ।—(२) करणे, उत्पादने:

"त्वयि विमुखे मयि सपदि सुधानिधिरपि तनुते तनुदाहम्" गीतगो० ४. ७ ; "पितुर्मुदं तेन ततान सोऽर्भकः" र० ३. २५ ; (३) अनुष्ठाने, निष्पादने ; "नवतिं नवाधिकां महाक्रतूनां ततान" र० ३. ६९ : (४) रचने च ; "तनुते टीकाम्" ।

❧ अव + तन्—व्याप्तौ । आ + तन्—व्याप्तौ ; "आतेने वनगहनानि वाहिनी सा" भा० ७. २५ ; (२) उत्पादने ; "जडतामातनोति" उत्तर० ३. १२ ; (३) करणे ; "सपर्य्यामाततान" काद० । प्र + तन्—विस्तारे । वि + तन्—विस्तारे ; व्याप्तौ ; करणे ; उत्पादने ; रचने च । वि + तन् + णिच्—दीर्घीकरणे, विस्तारे ; वितानयति । सम् + तन्—विस्तारे । ❧

तनादि सकर्मक आत्मनेपदी धातु ।

मन् (मनु) बोधे—जानना, समझना To consider, regard, deem—मनुते ; मंस्यते । "मनुते मनुतुल्योऽसौ प्रजामात्मजवत् प्रभुः" ; "समीभूता दृष्टिस्त्रिभुवनमपि ब्रह्म मनुते" भर्त्तृ० ।

अनुवाद करो—सभी अपना अपना काम करो । उन्होंने इस कामको उत्तमरूपसे किया । भोजनके पश्चात् और रात्रिमे स्नान नहीं करना । जो लोग असत् कार्य्य करते हैं, वे अवश्य दुःख पाते हैं । तू कर, मै भी करूँ । वह करे तो करे, मै नहीं करूंगा । रामकी माताने मनोयोगसे गृहसंस्कार किया है । शिष्यगण गुरुका (द्वितीया) अनुकरण करते हैं । मै उसका प्रतिकार करूंगा । प्राणपणसे दूसरेका उपकार करना ।

क्र्यादि ।

क्रियाघटन-सूत्र ।

[इस प्रकरणमे २६० । २६१ । २६३ । २८० सूत्रोंका कार्य्य होगा ।]

२८४ । चतुर्लकार परे रहनेसे, कर्तृवाच्यमे क्र्यादिगणीय धातुके उत्तर 'ना' आगम होता है ; यथा—अश् + ति = अश्नाति ।

२८५ । 'अम्'-भिन्न विभक्तिका स्वरवर्ण परे, 'ना'—'न्' होता है ; यथा—अश् + अन्ति = अश् + ना + अन्ति = अश् + न् + अन्ति = अश्नन्ति ।

२८६ । 'ना' परे रहनेसे, धातुके उपधा नकारका लोप होता है ; यथा—मन्थ् + ति = मन्थ् + ना + ति = मथ्नाति ।

२८७ । अगुण व्यञ्जनवर्ण परे रहनेसे, 'ना'—'नी' होता है ; यथा—अश् + ना + तः = अश्नीतः ।

२८८ । 'ना' परे रहनेसे, पू, लू, धू, गॄ, दॄ, वॄ और शॄ धातुका अन्त्य स्वर ह्रस्व होता है ; यथा—पू + ना + ति = पुनाति ।

२८९ । व्यञ्जनवर्णके परस्थित 'ना'—'हि' के साथ मिलकर 'आन' होता है; यथा—अश् + हि = अश् + ना + हि = अश् + आन = अशान ।

२९० । 'ना' परे रहनेसे, ग्रह्—गृह्, और ज्ञा—जा होता है ; यथा—ग्रह् + ति = गृह्णाति ; ज्ञा + ति = जानाति ।

क्रयादि ।

सकर्मक उभयपदी धातु ।

क्री (डुक्रीञ्) क्रये (मूल्यदानेन द्रव्यग्रहणे)—
मोल लेना To buy.

(क्रीणाति क्रीणीते धान्यं धनेन लोकः ।)

(परस्मैपद)

लट् ।

	एकवचन	द्विवचन	वहुवचन
प्रथमपुरुष	क्रीणाति	क्रीणीतः	क्रीणन्ति
मध्यमपुरुष	क्रीणासि	क्रीणीथः	क्रीणीथ
उत्तमपुरुष	क्रीणामि	क्रीणीवः	क्रीणीमः

लोट् ।

प्रथमपुरुष	क्रीणातु	क्रीणीताम्	क्रीणन्तु
मध्यमपुरुष	क्रीणीहि	क्रीणीतम्	क्रीणीत
उत्तमपुरुष	क्रीणानि	क्रीणाव	क्रीणाम

लङ् ।

प्रथमपुरुष	अक्रीणात्	अक्रीणीताम्	अक्रीणन्
मध्यमपुरुष	अक्रीणाः	अक्रीणीतम्	अक्रीणीत
उत्तमपुरुष	अक्रीणाम्	अक्रीणीव	अक्रीणीम

विधिलिङ् ।

प्रथमपुरुष	क्रीणीयात्	क्रीणीयाताम्	क्रीणीयुः

	एकवचन	द्विवचन	बहुवचन
मध्यमपुरुष	क्रीणीयाः	क्रीणीयातम्	क्रीणीयात
उत्तमपुरुष	क्रीणीयाम्	क्रीणीयाव	क्रीणीयाम

लृट्—क्रेष्यति।

(आत्मनेपद)

लट्।

प्रथमपुरुष	क्रीणीते	क्रीणाते	क्रीणते
मध्यमपुरुष	क्रीणीषे	क्रीणाथे	क्रीणीध्वे
उत्तमपुरुष	क्रीणे	क्रीणीवहे	क्रीणीमहे

लोट्।

प्रथमपुरुष	क्रीणीताम्	क्रीणाताम्	क्रीणताम्
मध्यमपुरुष	क्रीणीष्व	क्रीणाथाम्	क्रीणीध्वम्
उत्तमपुरुष	क्रीणै	क्रीणावहै	क्रीणामहै

लङ्।

प्रथमपुरुष	अक्रीणीत	अक्रीणाताम्	अक्रीणत
मध्यमपुरुष	अक्रीणीथाः	अक्रीणाथाम्	अक्रीणीध्वम्
उत्तमपुरुष	अक्रीणि	अक्रीणीवहि	अक्रीणीमहि

विधिलिङ्।

प्रथमपुरुष	क्रीणीत	क्रीणीयाताम्	क्रीणीरन्
मध्यमपुरुष	क्रीणीथाः	क्रीणीयाथाम्	क्रीणीध्वम्
उत्तमपुरुष	क्रीणीय	क्रीणीवहि	क्रीणीमहि

लृट् ।

प्रथमपुरुष	क्रेष्यते	क्रेष्येते	क्रेष्यन्ते
मध्यमपुरुष	क्रेष्यसे	क्रेष्येथे	क्रेष्यध्वे
उत्तमपुरुष	क्रेष्ये	क्रेष्यावहे	क्रेष्यामहे

✤ परि+क्री—क्रयविशेषे (किराया लेना To hire, purchase for a time)। वि+क्री—विक्रये ; विक्रीणीते ; 'विनिमय' (अदला बदला करना To barter, exchange) अर्थमे परस्मैपदी होता है ; "विक्रीणाति तिलैस्तिलान्" पञ्च० २. ७२. । ✤

ज्ञा बोधे (ज्ञाने)—जानना To know.

("आपत्सु मित्रं जानीयात्" हितो० १. ७४. । उपसर्गविहीन उभयपदी ; "जाने तपसो वीर्य्यम्" शकु० ३. २ ; "न त्वं दृष्ट्वा न पुनरलकां ज्ञास्यसे कामचारिन् !" मेघ० ६३ ; "सन्दर्भशुद्धिं गिरां जानीते जयदेव एव" गीतगो० १.४. ।)

(परस्मैपद)

लट् ।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	जानाति	जानीतः	जानन्ति
मध्यमपुरुष	जानासि	जानीथः	जानीथ
उत्तमपुरुष	जानामि	जानीवः	जानीमः

लोट् ।

प्रथमपुरुष	जानातु	जानीताम्	जानन्तु
मध्यमपुरुष	जानीहि	जानीतम्	जानीत

	एकवचन	द्विवचन	बहुवचन
उत्तमपुरुष	जानानि	जानाव	जानाम

लङ्।

प्रथमपुरुष	अजानात्	अजानीताम्	अजानन्
मध्यमपुरुष	अजानाः	अजानीतम्	अजानीत
उत्तमपुरुष	अजानाम्	अजानीव	अजानीम

विधिलिङ्।

प्रथमपुरुष	जानीयात्	जानीयाताम्	जानीयुः
मध्यमपुरुष	जानीयाः	जानीयातम्	जानीयात
उत्तमपुरुष	जानीयाम्	जानीयाव	जानीयाम

लृट्।

प्रथमपुरुष	ज्ञास्यति	ज्ञास्यतः	ज्ञास्यन्ति
मध्यमपुरुष	ज्ञास्यसि	ज्ञास्यथः	ज्ञास्यथ
उत्तमपुरुष	ज्ञास्यामि	ज्ञास्यावः	ज्ञास्यामः

(आत्मनेपद)

लट्।

प्रथमपुरुष	जानीते	जानाते	जानते
मध्यमपुरुष	जानीपे	जानाये	जानीध्वे
उत्तमपुरुष	जाने	जानीवहे	जानीमहे

लोट्।

प्रथमपुरुष	जानीताम्	जानाताम्	जानताम्
मध्यमपुरुष	जानीष्व	जानाथाम्	जानीध्वम्

	एकवचन	द्विवचन	बहुवचन
उत्तमपुरुष	जानै	जानावहै	जानामहै

लङ्।

प्रथमपुरुष	अजानीत	अजानाताम्	अजानत
मध्यमपुरुष	अजानीथाः	अजानाथाम्	अजानीध्वम्
उत्तमपुरुष	अजानि	अजानीवहि	अजानीमहि

विधिलिङ्।

प्रथमपुरुष	जानीत	जानीयाताम्	जानीरन्
मध्यमपुरुष	जानीथाः	जानीयाथाम्	जानीध्वम्
उत्तमपुरुष	जानीय	जानीवहि	जानीमहि

लृट्।

प्रथमपुरुष	ज्ञास्यते	ज्ञास्येते	ज्ञास्यन्ते
मध्यमपुरुष	ज्ञास्यसे	ज्ञास्येथे	ज्ञास्यध्वे
उत्तमपुरुष	ज्ञास्ये	ज्ञास्यावहे	ज्ञास्यामहे

❀ अनु+ज्ञा—अनुमतौ ; "तदनुजानीहि मां गमनाय" उत्तर० २. । अनु+ज्ञा+णिच्—गमनाय आदेशग्रहणे, आमन्त्रणे, आप्रच्छने ; अनुज्ञापयति ; "स मातरमनुज्ञाप्य तपस्येव मनो दधे" महाभा०। अभि+ज्ञा—अनुस्मृतौ ; ज्ञाने च। प्रति+अभि+ज्ञा—अनुस्मरणे। अव+ज्ञा—अनादरे, अवमाननायाम्। आ+ज्ञा—ज्ञाने। आ+ज्ञा+णिच्—आदेशे, शासने; विज्ञापने च। उप+ज्ञा—आद्यज्ञाने ; "पाणिनिना उपज्ञातं व्याकरणम्" (विनोपदेशेन ज्ञातम्)। परि+ज्ञा—परिज्ञाने, निश्चये। प्र+ज्ञा—सम्यग्बोधे, परिज्ञाने। प्रति+ज्ञा—प्रतिज्ञायाम् ;

आत्मनेपदी; "हरचापारोपणेन कन्यादानं प्रतिजानीते" प्रसन्नराघवम् ४.। वि + ज्ञा—विशिष्टज्ञाने। वि + ज्ञा + णिच्—विज्ञापने; विज्ञापयति।

ग्रह उपादाने (ग्रहणे, स्वीकारे)—लेना

To take, accept.

("प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत्" र० १. १८.।—(२) धारणे; "तं कण्ठे जग्राह" काद०; (३) वशीकरणे; "ग्रहीतुमार्य्यान् परिचर्य्यया मुहुर्महानुभावा हि नितान्तमर्थिनः" माघ० १. १७; (४) ज्ञाने; "मयाऽपि मृत्पिण्डबुद्धिना तथैव गृहीतम्" शकु० ६; "नेत्रवक्त्रविकारैश्च गृह्यतेऽन्तर्गतं मनः" मनु० ८. २६; (५) आश्रये; "शास्त्रेदं न गृह्णीयात्"।)

(परस्मैपद)

लट्।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	गृह्णाति	गृह्णीतः	गृह्णन्ति
मध्यमपुरुष	गृह्णासि	गृह्णीथः	गृह्णीथ
उत्तमपुरुष	गृह्णामि	गृह्णीवः	गृह्णीमः

लोट्।

प्रथमपुरुष	गृह्णातु	गृह्णीताम्	गृह्णन्तु
मध्यमपुरुष	गृहाण	गृह्णीतम्	गृह्णीत

	एकवचन	द्विवचन	बहुवचन
उत्तमपुरुष	गृह्णानि	गृह्णाव	गृह्णाम

लङ् ।

प्रथमपुरुष	अगृह्णात्	अगृह्णीताम्	अगृह्णन्
मध्यमपुरुष	अगृह्णाः	अगृह्णीतम्	अगृह्णीत
उत्तमपुरुष	अगृह्णाम्	अगृह्णीव	अगृह्णीम

विधिलिङ् ।

प्रथमपुरुष	गृह्णीयात्	गृह्णीयाताम्	गृह्णीयुः
मध्यमपुरुष	गृह्णीयाः	गृह्णीयातम्	गृह्णीयात
उत्तमपुरुष	गृह्णीयाम्	गृह्णीयाव	गृह्णीयाम

लृट्—ग्रहीष्यति ।

(आत्मनेपद)

लट् ।

प्रथमपुरुष	गृह्णीते	गृह्णाते	गृह्णते
मध्यमपुरुष	गृह्णीषे	गृह्णाथे	गृह्णीध्वे
उत्तमपुरुष	गृह्णे	गृह्णीवहे	गृह्णीमहे

लोट् ।

प्रथमपुरुष	गृह्णीताम्	गृह्णाताम्	गृह्णताम्
मध्यमपुरुष	गृह्णीष्व	गृह्णाथाम्	गृह्णीध्वम्
उत्तमपुरुष	गृह्णै	गृह्णावहै	गृह्णामहै

लङ् ।

प्रथमपुरुष	अगृह्णीत	अगृह्णाताम्	अगृह्णत

	एकवचन	द्विवचन	बहुवचन
मध्यमपुरुष	अगृह्णीथाः	अगृह्णाथाम्	अगृह्णीध्वम्
उत्तमपुरुष	अगृह्णि	अगृह्णीवहि	अगृह्णीमहि

विधिलिङ्।

प्रथमपुरुष	गृह्णीत	गृह्णीयाताम्	गृह्णीरन्
मध्यमपुरुष	गृह्णीथाः	गृह्णीयाथाम्	गृह्णीध्वम्
उत्तमपुरुष	गृह्णीय	गृह्णीवहि	गृह्णीमहि

लृट्।

प्रथमपुरुष	ग्रहीष्यते	ग्रहीष्येते	ग्रहीष्यन्ते
मध्यमपुरुष	ग्रहीष्यसे	ग्रहीष्येथे	ग्रहीष्यध्वे
उत्तमपुरुष	ग्रहीष्ये	ग्रहीष्यावहे	ग्रहीष्यामहे

ग्रह् + णिच्—शिक्षणे ; ग्राहयति । अनु + ग्रह्—अनुग्रहे ; "महात्मानोऽनुगृह्णन्ति भजमानान्रिपूनपि" माघ० २. १०.। अव + ग्रह्—निग्रहे । उद् + ग्र + णिच्—उपन्यासे ; उद्ग्राहयति । उप + ग्रह्—परिग्रहे ; "अव्यवसायिन प्रमदेव वृद्धपति नेच्छत्युपग्रहीतुं लक्ष्मीः" हितो० । नि + ग्रह्—पीडने । परि + ग्रह्—आदाने, स्वीकारे । प्र + ग्रह्—प्रकर्षेण ग्रहणे । प्रति + ग्रह्—स्वीकारे ; आक्रमणे च । वि + ग्रह्—युद्धे, कलहे ; समस्तस्य पृथक्करणे च । सम् + ग्रह्—सङ्ग्रहे ।

* * * *

क्र्यादि सकर्मक परस्मैपदी धातु।

अश् भोजने—खाना To eat—अश्नाति ; अशिष्यति । अश्नात्वन्

बुभुक्षितः ।

❀ उप + अश्—उपभोगे; प्राप्तौ च । प्र,सम् + अश्—भोजने । ❀

कुष् निष्कर्षे (निःसारणे, बहिष्करणे)—फाड़के निकालना To tear, extract, pull or draw out—कुष्णाति; कोषिष्यति । "शिवाः कुष्णन्ति मांसानि" भ० १८. १२. ।

❀ निर् + कुष्—बहिर्निःसारणे, विदारणे; निष्कुष्णाति; निष्कोक्ष्यति, निष्कोषिष्यति । ❀

(क्लिशू) बाधने (पीडने)—दुख देना To torment, afflict, molest, distress—क्लिश्नाति; क्लेशिष्यति, क्लेक्ष्यति । "स क्लिश्नाति भुवनत्रयम्" कु० २. ४०. ।

गृ शब्दे (उक्तौ, उच्चारणे; स्तुतौ)—(१) कहना; (२) स्तव करना To speak, utter, relate; to praise, extol—गृणाति; गरिष्यति, गरीष्यति । (१) गृणाति वाक्यं लोकः; (२) "केचिद्भीताः प्राञ्जलयो गृणन्ति" गीता. ११. २१. ।

ग्रन्थ् सन्दर्भे (ग्रन्थने; रचनायाम्)—(१) गूथना; (२) बनाना To tie or string together; to write, compose—ग्रथ्नाति; ग्रन्थिष्यति । (१) ग्रथ्नाति मालां मालिकः; "काचं मणिं काञ्चनमेकसूत्रे ग्रथ्नन्ति मूढाः"; (२) "ग्रथ्नामि काव्यशशिनं विततार्थरश्मिम्" काव्यप्रकाशः १०. ।

❀ उद् + ग्रन्थ्—बन्धने । सम् + ग्रन्थ्—रचनायाम् । ❀

दृ विदारणे—फाड़ना To tear, rend, sunder—दृणाति; दरिष्यति, दरीष्यति । "दृणाति च रिपून् रणे" ।

❀ वि + दृ—विदारणे ; "स्तनं विददार कामः" अनर्घ० । ❀

पुष् पोषणे (भरणे ; वर्द्धने)—(१) पालना ; (२) बढ़ाना To nourish, maintain, support; to increase, augment—पुष्णाति ; पोषिष्यति । (१) "तेनाद्य वत्समिव लोकममुं पुषाण" भर्तृ० ; (२) "पुपोष लावण्यमयान् विशेषान्" कु० १. २५. ।—(३) प्रकाशने, बोधने ; "न हीश्वरव्याहृतयः कदाचित् पुष्णन्ति लोके विपरीतमर्थम्" कु० ३. ६३. ।

बन्ध् बन्धने—बांधना To bind, tie, fasten—बध्नाति ; भन्त्स्यति । "प्रस्थानभिन्नां न बबन्ध नीवीम्" र० ७. ९. ।—(२) परिधाने ; "न हि चूडामणिः पादे प्रभवामीति बध्यते" पञ्च० १. ७८ ; (३) रचने ; "श्लोक एव त्वया बद्धः" रामा० ।

❀ अनु + बन्ध्—सम्बन्धे, अपरित्यागे, अनुवर्त्तने ; "सत्योऽयं जनप्रवादो यद्विपद्विपदं सम्पत् सम्पदमनुबध्नाति" काद० । आ + बन्ध्—बन्धने ; करणे च—'आबद्धाञ्जलिः' । उत् + बन्ध्—गलरज्ज्वादिना ऊर्द्धबन्धने । नि + बन्ध्—बन्धने ; स्थिरीकरणे ; रचनायाञ्च । निर् + बन्ध्—आग्रहे । प्र + बन्ध्—रचनायाम् । प्रति + बन्ध्—व्याघाते, निरोधे ; "प्रतिबध्नाति हि श्रेयः पूज्यपूजाव्यतिक्रमः" र० १. ८०. । सम् + बन्ध्—सम्बन्धे, संयोगे । ❀

मन्थ् विलोडने* (मन्थने ; संक्षोभे ; पीडने ; विनाशे)—(१) मथना; (२) हिलाना, विचलित करना ; सताना (३) विनष्ट करना

---

* 'मन्थ्' (मथि) धातु भ्वादि परस्मैपदीभी होता है ; मन्थति । 'मथ' (मथे) धातुभी होता है भ्वादि परस्मैपदी ; मथति ।

To churn; to agitate; to oppress, afflict; to destroy—मथ्नाति; मन्थिष्यति। (१) मथ्नाति दधि बल्लवी; द्विकर्मक—सुधां सागरं ममन्थुः; (२) "मां मथ्नातीव मन्मथः" महाभा०; "मन्मथो मां मथ्नन् निजनाम सान्वयं करोति" दश-कु०; (३) "मथ्नामि कौरवशतं समरे न कोपात्?" वेणी० १.१९.।

मुष् (मुषु) स्तेये (चौर्य्ये, लुण्ठने; अपाकरणे)—(१) चोरी करना; (२) दूर करना To steal, rob, plunder; to dispel—मुष्णाति; मोषिष्यति। (१) "मुषाण रत्नानि" माघ० १. ५१; द्विकर्मक—देवदत्तं शतं मुष्णाति; (२) "दैवं प्रज्ञां मुष्णाति" महाभा०; "विषयबाहुल्यं कालविप्रकर्षश्च नः स्मृतिं मुष्णाति" महावीर०।

मृद् क्षोदे (मर्दने; चूर्णीकरणे; विनाशने)—(१) मीड़ना, मलना; चूरना; (२) विनष्ट करना To rub, press, squeeze; to pound, pulverize; to destroy—मृद्नाति; मर्दिष्यति। (१) "मम च मृदितं क्षौमं बाल्ये त्वदङ्गविवर्त्तनैः" वेणी० ५. ४०.; "मृद्नाति द्विषतां दर्पं यो भुजाभ्यां भुवः पतिः"; (२) "बलान्यमृद्नान्नलिनाभवक्त्रः" र० १८. ५.।

❧ अभि, अव+मृद्—निष्पेषणे, पीडने, दलने, उच्छेदे। उप+मृद्—हनने, विनाशने। वि+मृद्—घर्षणे। सम्+मृद्—पीडने, सञ्चूर्णने। ❧

शॄ हिंसने (हनने; छेदने)—हिंसा करना, मारना; टुकड़ा करना To kill, destroy; to tear to pieces—शृणाति; शरि-

स्यति, शातिष्यति । "वनाश्रयाः यस्य मृगाः परिग्रहाः ? श्रणाति यस्तान् प्रसभेन तस्य ते" भा० १४. १३ ; "पशुमिव पशुः पर्वं-शास्त्रं श्रणातु" महावीर० ३. ३२. ।

स्तम्भ् (स्तन्भु) रोधने ; जडीकरणे च—(१) रोकना ; (२) निश्चल करना, बे-होश करना To stop, hinder, suppress; to stupefy, paralyze, benumb—स्तभ्नाति, स्तभ्नोति (स्वादि) ; स्तम्भिष्यति । (१) "कण्ठ: स्तम्भितबाष्पवृत्तिकलुषः" शाकु० ४. ६ ; (२) "प्राणा दध्वंसिरे, गात्रं तस्तम्भे च प्रिये हते" भा० १४. ६६. ।

✽ अव+स्तम्भ्—अवलम्बने ; निरोधे च । उत्+स्तम्भ्—धारणे, आश्रये । उप+स्तम्भ्—आश्रये । वि+स्तम्भ्—प्रतिबन्धे, निवारणे ; स्थापने ; धारणे च । सम्+स्तम्भ्—निरोधे ; स्थिरीकरणे च । ✽

क्र्यादि सकर्मक उभयपदी धातु ।

धू (धूञ्) कम्पने—हिलाना To shake—धुनाति, धुनीते ; धोष्यति धोष्यते, धविष्यति धविष्यते । चूतं धुनाति वायुः ।

पू (पूञ्) शोधने (पवित्रीकरणे)—शुद्ध करना, पवित्र करना To purify, cleanse—पुनाति, पुनीते ; पविष्यति, पविष्यते । "जाह्नवी नः पुनातु" ; "भागीरथि ! पुनीहि माम्" ; "पुण्याश्रमदर्शनेन तावदात्मानं पुनीमहे" शाकु० १. ।

प्री (प्रीञ्) प्रीणने—प्रीत करना, खुश करना To satisfy—प्रीणाति, प्रीणीते ; प्रेष्यति, प्रेष्यते । "प्रीणाति यः सुचरितैः पितरं

स पुत्रः" भट्टि० । "प्रभुः प्रीणातु विश्वभुक्"; "कच्चिन्मनस्ते प्रीणाति वनवासे ?" महाभा०—इत्यत्र अकर्मकोऽपि ।

वृ (वृञ्) वरणे—प्रार्थना करना To choose, ask for—वृणाति, वृणीते; वरिष्यति वरिष्यते, वरीष्यति वरीष्यते । "पुत्र ! वरं वृणीष्व" र० २. ६३. ।

लू (लूञ्) छेदने—काटना, लावनी करना To cut, sever, reap—लुनाति, लुनीते; लविष्यति, लविष्यते । "शरासनज्यामलुनाद्बिडौजसः" र० ३. ५९.; "लुनीहि नन्दनम्" माघ० १. ५१. ।

स्तृ (स्तृञ्) आच्छादने—ढांकना, बिछाना To cover, strew—स्तृणाति, स्तृणीते; स्तरिष्यति स्तरिष्यते, स्तरीष्यति स्तरीष्यते ।

अनुवाद करो—ग्वालेलोग सांझके समय दूध मथते हैं । दूसरेका द्रव्य नहीं चुराना । लड़के फूलसे माला गूथते हैं । रावणने त्रिभुवनको सताया था । माता दुग्धसे बालकका (द्वितीया) पोषण करती है । चरवाहे इस मैदानमे गायोंको बांधते हैं । बाज़ारमे (विपणि, आपणः) सब लोग द्रव्यादि क्रय करते हैं । यहां दूकानदारलोग (आपणिक, विपणिन्) सब द्रव्य बेचते हैं । धर्मशील पुत्र पिताको पवित्र करता है । मैं कभी भी सत्यमार्ग नहीं छोड़ूंगा,—उसने यह प्रतिज्ञा की थी । हमलोगोंको भोजनके लिये अनुज्ञा कीजिये । किसानलोग दात्र-द्वारा धान्य छेदन करते हैं । मलयपवन वृक्षको हिलाता है । असत् उपायसे उपार्जित वस्तु ग्रहण नहीं करना । धर्मके लिये सङ्कट करो ।

चुरादि।

क्रियाघटन-सूत्र।

२९१। चुरादिगणीय धातुके उत्तर स्वार्थमे 'णिच्' होता है; 'णिच्'-का 'इ' रहता है।

२९२। * 'णिच्' परे रहनेसे, धातुके उपधा अकार तथा अन्त्य-स्वरकी वृद्धि, और उपधा लघुस्वरका गुण होता है; यथा—(वृद्धि) वृ + इ = वारि; (गुण) चुर् + इ = चोरि।

२९३। *'णिच्' परे रहनेसे, पूर्ववर्त्ती अकारका लोप होता है; यथा—कथ + इ = कथि।

२९४। 'णिच्' परे रहनेसे, कृत्-कीर्त्, और कृप्—कल्प् होता है।

२९५। * णिजन्त, सनन्त, यङन्त और काम्यादि*-प्रत्ययान्त-की फिर 'धातु'-संज्ञा होती है, और चतुर्लकारमे भ्वादिगणीय धातुके तुल्य कार्य्य होता है; यथा—कथि + ति = कथि + अ + ति = कथे + अ + ति = कथयति।

चुरादि सकर्मक परस्मैपदी धातु।

भक्ष् अदने (भक्षणे)—खाना To eat.

(भक्षयति तण्डुलान् मूषिकः।)

लट्।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	भक्षयति	भक्षयतः	भक्षयन्ति

* काम्य, क्य, क्यङ्, क्विप्।

	एकवचन	द्विवचन	बहुवचन
मध्यमपुरुष	भक्षयसि	भक्षयथः	भक्षयथ
उत्तमपुरुष	भक्षयामि	भक्षयावः	भक्षयामः

लोट् ।

प्रथमपुरुष	भक्षयतु	भक्षयताम्	भक्षयन्तु
मध्यमपुरुष	भक्षय	भक्षयतम्	भक्षयत
उत्तमपुरुष	भक्षयाणि	भक्षयाव	भक्षयाम

लङ् ।

प्रथमपुरुष	अभक्षयत्	अभक्षयताम्	अभक्षयन्
मध्यमपुरुष	अभक्षयः	अभक्षयतम्	अभक्षयत
उत्तमपुरुष	अभक्षयम्	अभक्षयाव	अभक्षयाम

विधिलिङ् ।

प्रथमपुरुष	भक्षयेत्	भक्षयेताम्	भक्षयेयुः
मध्यमपुरुष	भक्षयेः	भक्षयेतम्	भक्षयेत
उत्तमपुरुष	भक्षयेयम्	भक्षयेव	भक्षयेम

लृट् ।

प्रथमपुरुष	भक्षयिष्यति	भक्षयिष्यतः	भक्षयिष्यन्ति
मध्यमपुरुष	भक्षयिष्यसि	भक्षयिष्यथः	भक्षयिष्यथ
उत्तमपुरुष	भक्षयिष्यामि	भक्षयिष्यावः	भक्षयिष्यामः

* * * *

चुरादि सकर्मक परस्मैपदी धातु ।

अञ्च् (अञ्चु) विशेषणे (प्रकाशने, जनने, वर्द्धने)—प्रकाश करना, बढ़ाना

To manifest, produce, increase—अञ्चयति; अञ्चयिष्यति। "मुदमञ्चय" गीतगो० १०. ११.।

अर्च् पूजायाम्—पूजा करना, सम्मान करना To adore, worship, honour—अर्चयति। "दूरस्थो नार्चयेद्गुरुम्" मनु० २. २०२.।

☞ अभि और सम् उपसर्गके साथभी इसी अर्थमें प्रयुक्त होता है। ☜

अर्ज् अर्जने—कमाना To earn—अर्जयति।

☞ उप + अर्ज्—उपार्जने; "चिरकालोपार्जितः सुहृत्" हितो०। ☜

अर्ह् पूजायाम्—अर्हयति।

ईर् प्रेरणे, क्षेपणे; चालने; कथने च—(१) फेंकना; (२) हिलाना; (३) कहना To throw, cast; to move, shake; to utter, say—ईरयति। (१) "ऐरिरच्च महाद्रुमम्" भ० १९. ९२; (२) "वातेरितपल्लवाङ्गुलिभिः" शकु० १; (३) "न च सपत्नजनेष्वपि तेन वागपरुषा परुषाक्षरमीरिता" र० ९. ८.।

☞ उत् + ईर्—उच्चारणे, उक्तौ; उत्क्षेपणे; प्रकाशने, उत्पादने च। अभि + उत् + ईर्—उक्तौ। प्र + ईर्—प्रेरणे। सम् + ईर्—विक्षेपणे; कथने च। ☜

कृत् संशब्दने (कीर्त्तने)—कथन करना mention, repeat, utter, declare—कीर्त्तयति। "कीर्त्तयन्ति च गोष्ठीषु यद्गुणानन्यपौगणाः"; "विप्रसेवैव शूद्रस्य प्रशस्तं कर्म कीर्त्यते" मनु०१०.१२३.।

कॢप् (कृप्) कल्पने (विन्यासे, रचनायाम्, निर्माणे; निरूपणे)—(१) सोचना; (२) तैयार करना; (३) निर्देश करना To consider, imagine; to prepare; to compose; to

settle—कल्पयति। (१) "मत्सरस्तु मे विपरीतं कल्पयति" मुद्रा० ७; (२) "शयनमस्याकल्पयम्" काद० ; "इदं शास्त्रमकल्पयत्" मनु० १. १०२; (३) "आसनं कल्पयामास" महाभा०।

❧ अव + क्लृप्—सम्भावनायाम्। उप + क्लृप्—विन्यासे, आयोजने। परि + क्लृप्—करणे; निश्चये च। प्र + क्लृप्—उद्भावने; निरूपणे च। वि + क्लृप्—संशये। सम् + क्लृप्—सङ्कल्पे, मानसक्रियायाम्, इच्छायाम्। ❧

क्षल् शोधने (क्षालने)—धोना To wash, purify—क्षालयति। "क्षालयामि तव पादपङ्कजे" महाना० ३. ४९.।

❧ प्र + क्षल्, वि + क्षल्—प्रक्षालने। ❧

खण्ड् (खडि) भेदने (भञ्जने, खण्डने, छेदने; विनाशे)—(१) टुकड़ा करना, काटना; (२) नष्ट करना To break to pieces, cut; to destroy—खण्डयति। (१) "खण्डं खण्डमखण्डयद्-बाहुसहस्रम्" महाना० २. ४; (२) "रजनीचरनाथेन खण्डिते तिमिरे निशि" हितो०।

गर्ह् कुत्सायाम्—निन्दा करना To blame—गर्हयति। "विषमां हि दशां प्राप्य दैवं गर्हयते नरः" हितो० ४. ३.—इत्यत्र आत्मनेपदमपि। "तं विगर्हन्ति साधवः" मनु० ९. ६८. (भ्वादि० उभयपदी)।

गुप् गोपने—छिपाना To conceal—गोपयति। "वित्तं न गोपयति यस्तु वनीयकेभ्यः"।

घट् संघाते (योजनायाम्)—जोड़ना To join, unite—घाटयति।

घाटयति कवाट द्वारि जनः (संयोजयतीत्यर्थः) ।

❀ उत्+घट्—उद्घाटने (खोलना) ; "मञ्जूषां यन्त्रैरुद्घाटयामास" ; "कपाटमुद्घाटयामि" मृच्छ० ३. । ❀

घट्ट चालने—हिलाना To shake—घट्टयति ।

❀ आ+घट्ट—आघाते । वि+घट्ट—अभिघाते । सम्+घट्ट—सङ्घर्षे । ❀

घुष् (घुषिर्) विशब्दने (कथने, आविष्करणे, घोषणायाम्) ढण्ढोरा करना, मुहूरत देना, मनादी करना To cry or proclaim aloud, announce or declare publicly—घोषयति । "इति घोषयतीव डिण्डिमः" हितो० २. ८४ ; "चमूस्य जयमघोषयत्" र० ९. १०. ।

❀ आ, वि+घुष्—घोषणायाम् । प्र+उत्+घुष्—निनादने ।❀

चट् भेदने—चाटयति ।

❀ उत्+चट्—उच्चाटने, अपसारणे ; "उच्चाटनीयः करतालिकानां दानादिदानीं भवतीभिरेषः ?" नै० ३. ७. । ❀

चर्च् अध्ययने (अनुशीलने)—चर्चा करना To peruse, study repeatedly—चर्चयति । चर्चयति वेदं विप्रः ।—अनुलेपने ; "चन्दनचर्चितनीलकलेवर०" गीतगो० १. ४०. ।

चर्व् अदने (चर्वणे)—चबाना To chew, eat, browse—चर्वयति, चर्वति । चर्वयति चर्वति तण्डुलं बालकः ; "रथं वक्त्रे निक्षिप्य दशनैश्चर्वयति" सप्तशती ।

चिन्त (चिति) स्मृत्याम् (चिन्तायाम्)—चिन्ता करना, गौर करना To

think, reflect—चिन्तयति। "चिन्तय तावत् केनापदेशेन पुनराश्रमपदं गच्छामः" शकु० २.।—उद्भावने To devise; "कोऽप्युपायश्चिन्त्यताम्" हितो० १.।

❦ परि, वि, सम्+चिन्त्—अत्यन्तचिन्तायाम्, ध्याने, स्मरणे। ❦

चुद् प्रेरणे (क्षेपणे; चालने; नियोगे; प्रश्ने च)—(१) फेंकना; (२) चलाना; (३) नियुक्त करना; (४) पूछना, शङ्का करना To throw; to drive on; to prompt, impel; to ask, to adduce as an argument or objection—चोदयति। (१) "शरैर्मन्मथचोदितैः" महाभा०; (२) "चोदयाश्वान्" शकु० १; (३) "तान् वधे मातुरचोदयत्" महाभा०; "चोदयामास तं, सभा वै क्रियतामिति" महाभा०; (४) "शिष्यान् समानीयाचार्योऽर्थमचोदयत्" महाभा०।

❦ प्र+चुद्, सम्+चुद्—प्रेरणे;—कथने च; परिवेषयेत प्रयतो गुणान् सर्वान् प्रचोदयन्" मनु० ३. २२८; "सञ्चोदयामास शीघ्रं याहीति सारथिम्" रामा०। ❦

चुर् स्तेये (चौर्ये)—चोरी करना To steal—चोरयति। चोरयति धनं चोरः; "अचूचुरच्चन्द्रमसोऽभिरामताम्" माघ० १. १६.।

चूर्ण् पेषणे (चूर्णीकरणे)—चूरना To pulverize, pound—चूर्णयति। "चूर्णयत्यरिमण्डलं यः"।

छद् अपवारणे (आच्छादने, गोपने)—ढकना, छिपाना To cover hide, conceal, veil—उभयपदी; छादयति, छादयते; छदति, छदते। छादयति छादयते दिशं मेघः।

ॐ अव, आ, प्र+छद्—आच्छादने, संवरणे, गोपने । सम्+छद्—आच्छादने, व्यापने । ॐ

छन्द्—ॐ उप+छन्द्—प्रलोभने ; प्रार्थनायाञ्च—उपच्छन्दयति । ॐ

जस् हिंसायाम् ; ताडने च—जासयति ।

ॐ उत्+जस्—उन्मूलने To kill, destroy, extirpate—उज्जासयति । पर्यायेऽ साथ; निजौजसोज्जासयितुं जगद्द्रुहाम्" माघ० १. ३७. । ॐ

टङ्क (टकि) बन्धने—टांकना To tie, fasten ; to stitch—टङ्कयति ।

ॐ उत्+टङ्क—उल्लेखे ; सर्वेऽपि धातवोऽत्र सार्था उट्टङ्किताः । ॐ

तड् आघाते (ताडने)—मारना, पीटना To beat, strike—ताडयति । "लालयेत् पञ्चवर्षाणि दशवर्षाणि ताडयेत्" चाणक्यः ।—वादने ; "अताडयन् मृदङ्गांश्च" म० १७. ७. ।

तप् दाहे (उष्णीकरणे ; व्यथनेच)—(१) गर्म करना ; (२) पीड़ा देना To heat ; to torment—तापयति । (१) "न हि तापयितुं शक्यं सागराम्भस्तृणोल्कया" हितो० १. ८७ ; मृशं तापितः कन्दर्पेण" गीतगो० २१. २२. ।

तर्क् वितर्के (विचारे, ऊहे, संशये)—गुमान करना, विचार करना, अनुमान करना To conjecture, infer, suspect—तर्कयति । "त्वं तावत् कतमां तर्कयसि ?" शकु० ६ ; "वृक्षसेचनादश्रमवर्ती परिश्रान्तां तर्कयामि" शकु० १ ; "(पातुं) त्वं चेदच्छस्फटिकविशदं तर्कयेस्तिर्यगम्भः" मेघ० ६१. ।

❀ प्र, वि+तर्क्—वितर्के।❀

तिज् निशाने (तीक्ष्णीकरणे)—तेज़ करना, पैनाना To sharpen, whet—तेजयति। "कुसुमचापमतेजयदंशुभिर्हिमकरः" र० ९.३९.।

❀ उत्+तिज्—उद्दीपने, प्रोत्साहने, व्यग्रकरणे ; तीक्ष्णीकरणे च।❀

तुल् उन्माने (परिमाणे)—तोलना To weigh, measure—तोलयति। तोलयति काञ्चनं वणिक्।—उत्थापने ; "कैलासे तुलिते" महावीर० ९. ३७.।

❀ उत्+तुल्—उत्तोलने, उर्द्ध्वनयने। ❀

दुल् उत्क्षेपे—दुलाना, झुलाना To swing, shake to and fro—दोलयति। "तं दोलयति मुदा सहृदाली"।

धृ धारणे ; गृहीतापरिशोधने च—(१) धारण करना ; (२) धारना To *hold, sustain ; to assume ; to put on (clothes,* ornaments &c); to owe anything to a person—धारयति। (१) "धारयन् मस्करिव्रतम्" भ० ९. ६३ ; (२) "तस्मै तस्य वा धनं धारयसि"।

पट् विदारणे (छेदने)—चीरना, फाड़ना ; तोड़ना To split, tear up ; to break—पाटयति। "कश्चिन्मध्यात् पाटयामास दन्ती" माघ० १८. ५१.। "अन्यासु भित्तिषु मया निशि पाटितासु" मृच्छ० ३. १४.।

❀ उत्+पट्—उत्पाटने, उन्मूलने (उखाड़ना)। ❀

पाल् रक्षणे (पालने)—पालना To protect, nourish—पालयति। अपत्यवत् पालयति प्रजा नृपः।

पीड् बाधने (पीडने, क्लेशदाने)—दुखाना To pain, torment—पीडयति। पीडयति शत्रुं लोकः।—मर्दने च (दाबना); "लभेत सिकतासु तैलमपि यत्नतः पीडयन्" भर्तृ०।

✱ उत्+पीड्—सङ्घर्षे; उत्सारणे, नोदने; पीडने च। उप+पीड्—संश्लेषे; पीडने च। नि+पीड्—पीडने; धारणे; आलिङ्गने च। निर्+पीड्—निष्पीडणे, आर्द्रवस्त्रादेर्निर्जलीकरणे (निचोड़ना)। ✱

पुष् धारणे (पोषणे)—पोषण करना To nourish, bring up, maintain—पोषयति। "परपिण्डेनात्मानं पोषयामि" हितो०।

पूज् पूजायाम् (सम्माने, प्रशंसायाम्)—पूजा करना To worship, revere—पूजयति। "राजानं पूजयति" रघु० १.।

पूर् आप्यायने (पूरणे)—पूर्ण करना To fill; to fulfil, satisfy—पूरयति। "पूरय मधुरिपुकामम्" गीतगो० ९. १४.।

भू चिन्तायाम्; शोधने; मिश्रणे; उत्पादने; वर्द्धने च—(१) चिन्ता करना; (२) शुद्ध करना; (३) मिलाना; (४) पैदा करना; (५) बढ़ाना To think or reflect, consider; to purify; to mingle or mix; to produce; to foster, cherish—भावयति। (१) "अर्थमनर्थं भावय नित्यम्" मोहमुद्गरः; (२) 'तपसा भावितात्मानो शान्तं विन्दन्ति निश्चितम्'; (४) "भूतानि भावयति जनयति वर्द्धयतीति वा भूतभावनः" विष्णुसहस्रनामभाष्यम्; (५) "देवान् भावयतानेन, ते देवा भावयन्तु वः। परस्परं भावयन्तः श्रेयः परमवाप्स्यथ॥"

गीता ३. ११.।

भूष् अलङ्करणे (भूषणे)—सिङ्गारना To adorn—भूषयति। "शुचि भूषयति श्रुतं वपुः, प्रशमस्तस्य भवत्यलङ्क्रिया" भा० २. ३२.।

मण्ड् (मडि) भूषायाम्—भूषित करना To adorn, decorate—मण्डयति। मण्डयति हारो जनम्।

मान् पूजायाम् (सम्मानने)—सम्मान करना To honour, respect—मानयति। "मान्यान् मानय" भर्तृ०।

मार्ग् अन्वेषणे (प्रतिसन्धाने)—ढूँढ़ना To seek for—मार्गयति, मार्गति। मार्गयति मार्गति गुणं गुणी।

मार्ज्, मृज् (मृजू) शोधने (मार्जने; दूरीकरणे)—मलना; हटाना To purify, cleanse; to wipe—मार्जयति। "यो मार्जयति साम्राज्यश्रियश्चापल्यवाच्यताम्"।

मृष् तितिक्षायाम् (क्षमायाम्)—क्षमा करना To endure; to pardon, excuse—उभयपदी; मर्षयति, मर्षयते। "आर्य्य! मर्षय मर्षय" वेणी० १.।

मोक्ष् मोचने—मुक्त करना; छोड़ना, फेंकना To release; to cast—मोक्षयति। "त्वां शापान्मोक्षयिष्यति" महाभा०; "सङ्ख्येषु मोक्षयति यश्च शरं मनुष्ये"।

यत् परिभवे (ताडने); अलङ्करणे च—यातयति।

❀ निर्+यत—प्रत्यर्पणे (फेर देना To return); प्रतिदाने, वैरशुद्धौ च (बदला लेना To requite, repay, retaliate)—"रामलक्ष्मणयोर्वैरं स्वयं निर्यातयामि वै" रामा०। ❀

यन्त्र् (यत्रि) यन्त्रने (नियमने)—रोकना, अटकाना, दबाना To restrain, curb, check—यन्त्रयति । "स्नेहकारण्ययन्त्रित" महाभा० ।

✤ नि+यन्त्र्—'यन्त्र्' वत् । ✤

लक्ष् दर्शने (ज्ञाने), अङ्कने (चिह्नीकरणे) च—(१) देखना, (२) चिह्नित करना To perceive, to apprehend, to mark—उभयपदी, लक्षयति, लक्षयते । लक्षयति लक्षयते घटं लोक (पश्यति, चिह्नयुक्तं करोति वा इत्यर्थ), "चरितान्यस्य लक्षय" महाभा० ।

✤ आ+लक्ष्—आलोचन, ज्ञाने च । उप+लक्ष्—ज्ञाने, अनुमने, विशेषणे—"केदारैरुपलक्षित", लक्षणया बोधने च—"काकेभ्यो दधि रक्ष्यतामित्यादौ दध्युपघातकर्तृत्वेन श्वादिरुपलक्ष्यते" । सम्+लक्ष्—सम्यग्दृष्टौ, परीक्षायाम् । ✤

लङ्घ् (लघि) लङ्घने (अतिक्रमणे)—लांघना, पार होना To leap or pass over—लङ्घयति । "गिरिमलङ्घयत्" र० ४ ५२, "यशो भवद्गुरुर्लङ्घयितु ममोद्यत" र० ३ ४८ । भ्वादिगणीय उभयपदीभी होता है, लङ्घति, लङ्घते, "लङ्घते स्म मुनिरेव विमानान्" नै० ६ ४ ।

✤ उद्, वि+लङ्घ्—उल्लङ्घने । ✤

लड् उपसेवायाम् (अत्यन्तपालने, लालने)—लाड करना To caress, fondle—लाडयति । लालयति । "लालने बहवो दोषास्ताडने बहवो गुणा. । तस्मात् पुत्रञ्च शिष्यञ्च ताडयेन्न तु लालयेत् ॥" चाणक्य ।

⚜ उप + लड्—"वालकमुपलालयन्" शकु० ७. । ⚜

लोक् (लोकृ) दर्शने—देखना To behold—लोकयति ।

⚜ अव, आ, वि + लोक्—दर्शने । ⚜

लोच् (लोचृ)—⚜ आ + लोच्, परि + आ + लोच्—चिन्तने, विचारणे, निरूपणे । ⚜

वच् परिभाषणे (वाचने, पाठे)—बांचना To read, peruse—वाचयति । "नानादेशसमुद्भूतां वाचयत्यखिलां लिपिम्" ।

वण्ट् (वटि) विभाजने (वण्टने)—बांटना To divide—वण्टयति । पक्षे—भ्वादि परस्मैपदी—वण्टति । "वण्टयन्ति नृपा रत्नं, विप्रा वण्टन्ति हाटकम्" ।

वृ वारणे—रोकना To prevent—वारयति । यवेभ्यो गां वारयति; "प्रविशन्तं न कश्चिद्वारयत्" ।

⚜ अप + वृ—आच्छादने, गोपने । ⚜

वृज् (वृजी) वर्जने (त्यागे)—छोड़ना To shun, give up, abandon—वर्जयति । "वर्जयेदसतां सङ्गम्" ।

⚜ अप + वृज्—त्यागे; दाने; छेदने च । आ + वृज्—आनमने; दाने; प्रसादने च । वि + वृज्—परित्यागे । ⚜

शिष् असर्वोपयोगे (पारशेषीकरणे)—बचाना, छोड़ देना, बाकी रखना To leave as a remainder, spare—शेषयति, शेषति । शेषयति शेषति यशोराशिं लोकः (अवशिष्टं करोतीत्यर्थः) ।

⚜ अव + शिष्, परि + शिष्—अवशेषे । वि + शिष्—अतिशायने, अतिक्रमे, पराभवे, तिरस्कारे । निर् + शिष्—शून्यीकरणे,

उन्मूलने, उत्पादने, विलोपने । ❀

श्रण् दाने To give away, bestow—पायेगायं 'वि'पूर्वः—विश्राणयति । "विश्राणयति यः श्रीमान् विप्रेभ्यो विपुलं वसु" ।

सद्—❀ आ+सद्—प्राप्तौ ; गमने (सन्निकर्षे) च—पाना ; जाना To obtain, to go to, approach—आसादयति । "आसादयति विद्यानां पारम्" ; "नक्रः स्वस्थानमासाद्य गजेन्द्रमपि कर्षति" । ❀

सान्त्व् समाश्वासने (सान्त्वनायाम्)—समझा देना To soothe, comfort—सान्त्वयति । सान्त्वयति शोकार्त्तं दयालुः ।

सूद्—❀ नि+सूद्—हिंसने To kill—निसूदयति, निषूदयति । ❀

स्फुट् भेदने—फोड़ना To burst or rend asunder, split—स्फोटयति ।

❀ आ+स्फुट्—बाहुताडने ; "बाहू चास्फोटयच्छनैः" महाभा० । ❀

स्वद् आस्वादने (रसोपादाने)—चखना To taste—स्वादयति । स्वादयति क्षीरं लोकः ।

❀ आ+स्वद्—आस्वादने, अनुभवे । ❀

चुरादि सकर्मक आत्मनेपदी धातु ।

कुत्स् अवक्षेपे (निन्दायाम्)—निन्दा करना To abuse—कुत्सयते । "पूजयेदशनं नित्यमद्याचैतदकुत्सयन्" मनु० २. ५४.—इत्यत्र परस्मैपदी, आर्षग्रन्थेषु पदनियमाभावात् ।

चित् ज्ञाने—जानाना To know—चेतयते* । "कादम्बरीरसभरेण

* ज्ञानार्थमें 'चित्' (चिती) धातु भ्वादिगणीय परस्मैपदीभी होता

समस्त एव मत्तो न किञ्चिदपि चेतयते जनोऽयम्" कादम्बरी।

तन्त्र् कुटुम्बधारणे (धारणे, पोषणे)—To support, maintain (as a family)—तन्त्रयते।—शासने, नियमने; "प्रजाः प्रजाः स्वा इव तन्त्रयित्वा" शकु० ५. ५.।

तर्ज् भर्त्सने—डांटना, झिड़कना To scold; to threaten—तर्जयते। बहुशः परस्मैपदमेभी महाकविप्रयोग दीखता है; "सखी-मङ्गुल्या तर्जयति" शकु० १; "अहिताननिलोद्धूतैस्तर्जयन्निव केतुभिः" र० ४. २८.।

भर्त्स् भर्त्सने (धमकाना)—भर्त्सयते। परस्मैपदी—वोपदेवः।

भल्—❦ नि + भल्—दर्शने—निभालयते। परस्मैपदी अपि। ❦

मन्त्र् (मत्रि) गुप्तभाषणे (मन्त्रणायाम्)—सलाह करना To consult—मन्त्रयते।। "हृत् तस्य यां मन्त्रयते" नै० ३. १०७.। क्वचित् परस्मैपदीभी होता है; "किमेकाकिनी मन्त्रयसि?" शकु० ६; "हला! सङ्गीतशालापरिसरेऽवलोकिताद्वितीया त्वं किं मन्त्रयन्त्यासीः?" मालती० २.।

❦ अनु, अभि + मन्त्र्—अभिमन्त्रणे, मन्त्रकरणकसंस्करणे। आ + मन्त्र्—कथने; प्रस्थानानुमतिप्रार्थने; सम्बोधने; निमन्त्रणे च। नि + मन्त्र्—निमन्त्रणे। ❦

वञ्च् (वञ्चु) विप्रलम्भे (प्रतारणे, वञ्चनायाम्)—धोका देना,

है; यथा—चेतति; चेतिष्यति। "अविद्यानिद्रयाऽऽक्रान्ते जगत्येकः स चेतति" (जागर्त्ति, प्रबुध्यते इत्यर्थः); "गर्भवासस्थितं रेतश्चेतति" (चैतन्ययुक्तं भवतीत्यर्थः) पञ्चदशी. ६. १४७; "चिचेत रामस्तत् कृच्छ्रम्"।

ठगना To cheat, deceive—वञ्चयते। "त्वमथ वञ्चयसे जनमनुगतमसमशरज्वरदूनम्" गीतगो० ८. ७.। परस्मैपदीमी होता है; "(वन्यनं) वञ्चयन् प्रणयिनीरवाप सः" र. १९. १७.।

सकर्मक अदन्त चुरादि धातु।

अङ्क लक्षणे (चिह्नीकरणे)—चिह्नित करना, निशान करना To mark—अङ्कयति। अङ्कापयति। "अङ्कयामास वस्त्रान्" महाभा०।

अर्थ याचने—माङ्गना To beg, ask, solicit—आत्मनेपदी; अर्थयते। द्विकर्मक—"त्वामिममर्थमर्थयते" दशकु०; "वैर्ण्यं गत्वाऽर्थयस्व धनम्" महाभा०।

अभि + अर्थ, प्र + अर्थ—प्रार्थनायाम्। सम् + अर्थ—चिन्तने; दृढीकरणे, प्रमाणीकरणे च।

अवधीर अवज्ञायाम्—अनादर करना To disregard—अवधीरयति। "अवधीरयति साधुमसाधुः"।

ल्यप्—अवधीर्य्य; "हितवचनमवधीर्य्य" हितो०; "इतीव धारामवधीर्य्य" नै० १. ७२.।

आन्दोल दोलने—झुलाना, हिलाना To swing, to shake—आन्दोलयति। "मन्दमारुतान्दोलिता लतेव" दशकु०।

कथ वाक्यप्रबन्धे (कथने, वर्णने)—कहना To tell, relate—कथयति। प्रायशः चतुर्थ्यन्त व्यक्तिवाचक शब्दके साथ; "राममिन्वसनदर्शनोत्सुकं मैथिलाय कथयाम्बभूव सः" र० ११. ३७.।

कर्ण भेदने।—आ + कर्ण—श्रवणे; आकर्णयति।

कल गतौ; सङ्ख्यायाम् (गणनायाम्) च—कलयति। "कलिः काम-

धेनुः" ।—(१) धारणे, ग्रहणे To hold, bear, assume, put on; "म्लेच्छनिवहनिधने कलयसि करवालम्" गीतगो० १. ; "कलयति हि हिमांशोर्निष्कलङ्कस्य लक्ष्मीम्" मालती० १. २२ ; "कलय वलयश्रेणीं पाणौ" गीतगो० १२. २६. ।—(२) गणनायाम् To count, reckon; "कालः कलयतामहम्" गीता. १०. ३०. ।—(३) करणे To make; "सदा पान्थः पूषा गगनपरिमाणं कलयति" भर्तृ० ; "मधुमिलितमधुपकुलकलितरावे (केलिसद्ने)" गीतगो० ११. १९. ।—(४) ज्ञाने To know; "कलयन्नपि सव्यथोऽवतस्थे" माघ० ९. ८३ ; "रुपा निषिद्धालिजनां यदैनां छायाद्वितीयां कलयाञ्चकार" नै० ३. १२. ।—(५) चिन्तने, विचारणे To think, consider; "व्यालनिलयमिलनेन गरलमिव कलयति मलयसमीरम्" गीतगो० ४. ७ ; "कलयामि मणिभूषणं वहुदूषणम्" गीतगो० ७. ७. ।—(६) निर्माणे To form; "मरकतशकलकलितकलधौतलिपेः" गीतगो० ८. ४. ।

❀ आ + कल—बोधे ; बन्धने ; आक्रमणे, ग्रहणे, अधिकारे च । परि + कल—ज्ञाने । सम् + कल—सङ्कलने (योजने ; सङ्ग्रहे च) To add or sum up. । वि + अव + कल—व्यवकलने, वियोजने To subtract or deduct. ❀

क्षप क्षेपणे (दूरीकरणे ; अतिवाहने)—(१) दूर करना ; (२) काटना, गवाना To cast; to remove; to pass—क्षपयति । (२) "पक्षिणीं क्षपयेन्निशाम्" स्मृतिः ।

गण सङ्ख्याने (गणनायाम् ; विचारे, ज्ञाने)—गिनना To count,

number; to consider—गणयति। "लीलाकमलपत्राणि गणयामास पार्वती" कु० ६. ८४; "पावकस्य महिमा स गण्यते, कक्षवज्ज्वलति सागरेऽपि यः" र० ११. ७५.।

⁂ वि + गण—ज्ञाने; निश्चये। अव + गण—अवज्ञायाम्। ⁂

गवेष मार्गणे (अन्वेषणे, अनुसन्धाने)—ढूँढना To seek—गवेषयति। गवेषयति गुणं गुणी; "तस्मादेष यतः प्राप्तस्तत्रैवान्यो गवेष्यताम्" कथासरित्सागरः। "गवेषमाणं महिषीकुलं जलम्" ऋतु० १. २१.—इत्यत्र भ्वादिगणीय आत्मनेपदी।

गुण अभ्यासे (गुणने, पूरणे; 'आम्रेडने' इति मल्लिनाथः—माघ० २.७८.) गुण करना, ज़र्ब करना To multiply—गुणयति। "हन्ति. पूर्त्तिश्च गुणने" इति शब्दविदः।

चित्र चित्रीकरणे (आलेख्यकरणे)—तस्वीर या शबीह् खींचना To paint—चित्रयति। चित्रयति प्रतिमां लोकः। "वाग्देवताचरित-चित्रितचित्तसद्मा" (अलङ्कृत) गीतगो० १. २; "क्रौञ्चपदालीचित्रिततीरा" छन्दोमञ्जरी।

दण्ड दण्डनिपातने—दण्ड देना, डाण्डना To punish—दण्डयति। दण्डापयति। दण्डयति अपराधिनं राजा। द्विकर्मक—"तान् सहस्रञ्च दण्डयेत्" मनु० ९. २३४; "अनृतन्तु वदन् दण्ड्यः स्ववित्तस्यांशमष्टमम्" मनु० ८ ३६.। "कौटसाक्ष्यं कुर्वाणान् दण्डयित्वा प्रवासयेत्" मनु० ८. ३६.।

पार कर्मसमाप्तौ (शक्तौ)—सकना To be able—पारयति। "न खलु मातापितरौ भर्त्तृवियोगदुःखितां दुहितरं द्रष्टुं पारयत." शकु० ६.

"अधिकं न हि पारयामि वक्तुम्" भामिनी० २. ५९.।

मह पूजायाम् To honour, worship—महयति। "गोक्षारं न निधीनां महयन्ति महेश्वरं विबुधाः"; "स्त्री पुमानित्यनास्थैषा वृत्तं हि महितं सताम्" कु० ६. १२.।

मिश्र सम्पर्के (मिश्रणे, संयोजने)—मिलाना To mix—मिश्रयति। मिश्रयति घृतेनान्नं लोकः; "वाचं न मिश्रयति यद्यपि मद्वचोभिः" शकु० १. २६.।

मूत्र प्रस्रावे—पेशाब करना To make water—मूत्रयति। "तिष्ठन् मूत्रयति" महाभा०।

मृग अन्वेषणे—ढूँढ़ना To search for—आत्मनेपदी; मृगयते। "रामो मृगं मृगयते वनवीथिकासु" महाना० ३. ९६.।

रच रचनायाम् (प्रणयने, निर्माणे, करणे)—रचना, तैयार करना To prepare; to make; to compose—रचयति। "रचयति शयनं सचकितनयनम्" गीतगो० ५. १०; "मौलौ वा रचयाञ्जलिम्" वेणी० ३. ४२; "अश्वघाटीं जगन्नाथो विश्वहृद्यामरीरचत्"; "रचयति चिकुरे कुरवककुसुमम्" (विन्यस्यति) गीतगो० ७. २३; "विरचितानुरूपवेशः" र० ९. ७६.।

रस आस्वादने—चखना To taste, relish—रसयति। रसयति मधु द्विरेफः; "मृद्वीका रसिता" भामिनी० ४. १४.।

रह त्यागे—छोड़ना To quit, abandon—रहयति। रहयति शोकं धीरः; "रहयत्यापदुपेतमायतिः" भा० २. १४.।

रूप रूपकरणे—बनाना To form—रूपयति। रूपयति प्रतिमां शिल्पी।

—(४) अभिनये (नाट्येन प्रकाशने—नाटकमें दिखलाना) To represent on the stage; "शकुन्तला वीडां रूपयति" शकु०४.।

❀ नि + रूप—निरूपणे (निर्णये, निश्चये ; दर्शने ; विवरणे, स्वरूपकथने च)। ❀

वर ईप्सायाम्—वरण करना, पसन्द करना To ask for, choose, seek to get—वरयति। "कन्या वरयते रूपम्"।

वर्ण शुक्लादिवर्णकरणे (रञ्जने) ; वर्णने ; स्तुतौ च—(१) रङ्गना ; (२) वर्णन करना ; (३) स्तुति करना To colour ; to describe ; to praise—वर्णयति। (१) प्रतिमां वर्णयति ; (२) कथां वर्णयति ; (३) हरिं वर्णयति।

❀ निर् + वर्ण—दर्शने। ❀

वास उपसेवायाम् (गुणान्तराधाने, सुरभीकरणे)—सुगन्धित करना, सुन्दर करना To scent, perfume—वासयति। वासयति वस्त्रं चन्दनः ; "छेदे चन्दनतरुर्वासयति मुखं कुठारस्य" हितो०।

❀ अधि + वास—'वास'-वत्। ❀

विडम्ब अनुकरणे (सदृशीकरणे) ; वञ्चने च—(१) अनुकरण करना, नकल करना ; (२) ठगना To imitate, copy, resemble ; to cheat ; to ridicule—विडम्बयति। (१) "(तं) क्रतुर्विडम्बयामास, न पुनः प्राप तच्छ्रियम्" र० ४. १७ ; (२) "एवमात्माभिप्रायसम्भावितेष्टजनचित्तवृत्तिः प्रार्थयिता विडम्ब्यते" शकु० २.।

वीज व्यजने (वायुसञ्चालने)—पङ्खा झलना To fan—वीजयति। सख्यौ शकुन्तलां वीजयतः ; "वीज्यते स हि संसुप्तश्चामरैः"

कु० २. ४२.।

व्यय वित्तसमुत्सर्गे (धनव्यये)—व्यय करना, खर्च करना, To expend—व्यययति। "बहु व्यययति द्रव्यम्"।

शील अभ्यासे (अनुशीलने)—अभ्यास करना To practise repeatedly, study—शीलयति। "शीलयन्ति यतयः सुशीलताम्" भा० १३. ४३.।—(२) परिधाने; "शीलय नीलनिचोलम्" गीतगो० ५. ११.।—आश्रयणे, गमने; "यदनुगमनाय निशि गहनमपि शीलितम्" गीतगो० ७. ४; "स्मेरानना सपदि शीलय सौधमौलिम्" भामिनी० २. ४.।

श्लथ दौर्बल्ये (शिथिलीकरणे)—शिथिल (ढीला) करना To slacken, loosen, relax—श्लथयति। "परित्राणस्नेहः श्लथयितुमशक्यः खलु यथा" गङ्गालहरी. ३७.।

सभाज पूजने (सत्कारे); प्रीणने च—सम्मान करना; आनन्दित करना To salute, greet, pay respects, congratulate; to please, gratify—सभाजयति। "स्नेहात् सभाजयितुमेत्य" उत्तर० १. ७; "सुचरितनन्दिन ऋषयो देवं सभाजयितुमागता इति तर्कयामि" शकु० ५.।—अलङ्करणे; "वटुपरिषदं पुण्यश्रीकः श्रियैव सभाजयन्" उत्तर० ४. १९.।

सूच व्यक्तीकरणे—सूचित करना, प्रकाश करना, ज़ाहिर करना To indicate, reveal—सूचयति। "त्वां सूचयिष्यति तु माल्यसमुद्भवोऽयं (गन्धः)" मृच्छ० १. ३५; "मन्त्रो गुप्तद्वारो न सूच्यते" र० १७. ५०.।

स्तेन चौर्य्ये—चोरी करना To steal—स्तेनयति ।

"वाच्यर्था नियताः सर्वे वाङ्मूला वाग्विनिःसृताः ।

तां तु यः स्तेनयेद्वाचं स सर्वस्तेयकृन्नरः ॥" मनु० ४. २५६. ।

स्पृह इच्छायाम्—चाहना To wish, long for—स्पृहयति । चतुर्थी के साथ; पुष्पेभ्यः स्पृहयति; "न मैथिलेयः स्पृहयाम्बभूव भर्त्रे दिवो, नाप्यलकेश्वराय" र० १६. ४२. ।

अनुवाद करो—कभी अपरिमित भोजन नहीं करना। कोई द्रव्य एकाकी भोजन नहीं करना। तू अब खा, मैं उसके साथ बात करूँ। आज शिक्षक हमलोगोंको नीतिवाक्य कहेंगे। किसीके साथ झूठ मत कहो। आपने मुझे क्या कहा? किसीका द्रव्य चुराना नहीं चाहिये। रामदास एक एक करके (एकैकशः) रुपया गिनता है। रातमें दही नहीं खाना। किसीकी (द्वितीया) अवज्ञा मत करो। वह जितना कमाता है, सभी व्यय करता है। इन फलोंको बाँट दो। सबका गुण कीर्त्तन करो। वे दुखीको तसल्ली देते थे। दुष्ट लोग जहाँ तहाँ सभीका दोष कीर्त्तन करते हैं। वाल्मीकिजीने सुललित पद्योंमें रामचन्द्रका चरित्र समग्र वर्णन किया है। साधुलोग सर्वदा सद्विषयकी (द्वितीया) आलोचना करते हैं।

रुधादि ।

क्रियाघटन-सूत्र ।

[इस प्रकरणमें २६० । २६१ सूत्रोंका कार्य्य होगा ।]

२९६ । चतुर्लकार परे रहनेसे, कर्त्तृवाच्यमें रुधादिगणीय धातुके अन्त्यस्वरके पश्चात् 'न्' होता है; यथा—रुध् + ति = रुन्ध् + ति—

२९७। सगुण विभक्ति परे रहनेसे, 'नृ'के स्थानमे स्वरान्त 'न' होता है; यथा—रुनृध्+ति=रुणध् (१०० (क) सूत्र)+ति—

२९८। * धकारसे परे 'त' अथवा 'थ' रहनेसे, दोनो मिलकर 'द्ध' होता है; यथा—रुणध्+ति=रुणद्धि।

२९९। * एक वर्गके तीन वर्ण एकत्र होनेसे, मध्यम वर्णका लोप होता है; यथा—रुनृध्+तः=रु (नृद्ध)=रुन्धः।

३००। * 'स' परे रहनेसे, 'द्' और 'ध्'के स्थानमे 'त्' होता है; यथा—रुणध्+सि=रुणत्सि।

३०१। * व्यञ्जनवर्णके परस्थित 'हि'—'धि' होता है; यथा—रुध्+हि=रुनृध्+धि=रुनृद्† +धि=रुन्धि (२९९ सू०)।

३०२। * व्यञ्जनवर्णके परस्थित लङ् का 'द्' और सकारका लोप होता है; यथा—अ+रुणध्+द्=अरुणध्=अरुणत् (२६० सू०)।

३०३। * लङ्के सकारका लोप होनेसे, धातुके 'द्' और 'ध्'के स्थानमे विकल्पसे रेफ होता है; यथा—अरुणत्, अरुणः।

३०४। * 'च' अथवा 'ज'—परस्थित तकारमे मिलकर 'क्त', और थकारमे मिलकर 'क्थ' होता है; यथा—भुज्+ते=भुनृज्+ते=भुन्+क्ते=भुङ्क्ते।

३०५। * च, छ, ज, श, ष, ह और घ—परस्थित दन्त्य सकारमे मिलकर 'क्ष' होता है; यथा—भुनृज्+से=भुङ्क्षे।

३०६। * 'ध' परे रहनेसे, 'च' और 'ज'के स्थानमे 'ग' होता है,

---

† एक वर्गके दो चतुर्थ वर्ण एकत्र होनेसे, आदिका वर्ण तृतीय वर्ण होता है।

और विराममे अर्थात् कोई वर्ण परे न रहनेसे अन्तस्थित 'च्' और 'ज्' के स्थानमे 'क्' होता है ; यथा—भुनज् + ध्वे = भुनग्ध्वे = भुङ्ग्ध्वे ; भुज् + द् = अभुनक् ।

३०७ । चतुर्थवर्ण परे रहनेसे, कर्तृवाच्यमे 'हिनस'के स्थानमे 'हिंस्' होता है ; यथा—हिनस् + नि = हिनस्ति ।

३०८ । * 'ध' परे रहनेसे, पूर्ववर्त्ती 'स' के स्थानमे 'द' होता है, अथवा सकारका लोप होता है ; यथा—हिनस् + हि = हिनस् + धि = हिनद् + धि = हिन्धि ।

३०९ । ति, सि, मि, तु, द्, स्—इन विभक्तियोंके परे रहनेसे, 'तृह' धातुका 'न्'—'ने' होता है ; यथा—तृह् + ति = तृनह् + ति = तृणेह् + ति—

३१० । य, र, ल, व, ह, ञ, ण, न, म भिन्न व्यञ्जनवर्ण परे रहनेसे, 'ह'के स्थानमे 'ढ' होता है ; यथा—तृणेह् + ति = तृणेढ् + ति—

३११ । * टवर्ग और मूर्द्धन्य षकारके परस्थित तवर्गके स्थानमे टवर्ग होता है ; परन्तु 'ढ'के परस्थित 'त' और 'थ' के स्थानमे 'ढ' होता है ; यथा—तृणेढ् + ति = तृणेढ् + ढि—

३१२ । 'ढ' परे रहनेसे, पूर्व ढकारका लोप होता है, और ऋ भिन्न उपधा स्वर दीर्घ होता है ; यथा—तृणेढ् + ढि = तृणेढि । तृह् + तः = तृनह् + तः = तृनढ् + तः = तृनढ्ढः = तृण्ढः । (दीर्घ) मुह् + क्त = मूढ ।

३१३ । * कोई वर्ण परे न रहनेसे, धातुके छ, श, ष और ह के स्थानमे 'ट' अथवा 'ड' होता है ; और 'ध' परे रहनेसे, 'ड' होता है ;

यथा—अतृणेह्=अतृणेट् अथवा अतृणेड्।

३१४। * वर्गके प्रथम और द्वितीय वर्ण तथा श, ष, स परे रहनेसे, श, ष, स, ह भिन्न 'धुट्'-वर्णके स्थानमे प्रथमवर्ण होता है; यथा—छिद्+ति=छिनत्ति।

रुधादि।

सकर्मक परस्मैपदी धातु।

भञ्ज् (भन्जो) आमर्दने (भङ्क्ते)—तोड़ना To break.

("भनक्त्युपवनं कपिः" भ० ९. २; "भनज्मि सर्वमर्यादाः" ६. ३८.।—पराभवे; "क्षत्राणि रामः परिभूय रामात् क्षत्राद्यथाऽभज्यत स द्विजेन्द्रः" नै० २२. १३३.।)

लट्।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	भनक्ति	भङ्क्तः	भञ्जन्ति
मध्यमपुरुष	भनक्षि	भङ्क्थः	भङ्क्थ
उत्तमपुरुष	भनज्मि	भञ्ज्वः	भञ्ज्मः

लोट्।

प्रथमपुरुष	भनक्तु	भङ्क्ताम्	भञ्जन्तु
मध्यमपुरुष	भङ्ग्धि	भङ्क्तम्	भङ्क्त
उत्तमपुरुष	भनजानि	भनजाव	भनजाम

लङ्।

प्रथमपुरुष	अभनक्	अभङ्क्ताम्	अभञ्जन्

	एकवचन	द्विवचन	बहुवचन
मध्यमपुरुष	अभनक्	अभङ्क्तम्	अभङ्क्त
उत्तमपुरुष	अभनज्म्	अभञ्ज्व	अभञ्ज्म

विधिलिङ् ।

प्रथमपुरुष	भञ्ज्यात्	भञ्ज्याताम्	भञ्ज्युः
मध्यमपुरुष	भञ्ज्याः	भञ्ज्यातम्	भञ्ज्यात
उत्तमपुरुष	भञ्ज्याम्	भञ्ज्याव	भञ्ज्याम

लृट्—भङ्क्ष्यति, भङ्क्ष्यतः, भङ्क्ष्यन्ति ।

हिंस् (हिसि) हिंसायाम्—मार डालना, नष्ट करना

To kill, destroy completely.

("हिनस्ति दुष्कृतं सूनृता वाक्" ।)

लट् ।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	हिनस्ति	हिंस्तः	हिंसन्ति
मध्यमपुरुष	हिनस्सि	हिंस्थः	हिंस्थ
उत्तमपुरुष	हिनस्मि	हिंस्वः	हिंस्मः

लोट् ।

प्रथमपुरुष	हिनस्तु	हिंस्ताम्	हिंसन्तु
मध्यमपुरुष	हिन्धि	हिंस्तम्	हिंस्त
उत्तमपुरुष	हिनसानि	हिनसाव	हिनसाम

लङ् ।

प्रथमपुरुष	अहिनः	अहिंस्ताम्	अहिंसन्

	एकवचन	द्विवचन	बहुवचन
मध्यमपुरुष	अहिनः	अहिंस्तम्	अहिंस्त
उत्तमपुरुष	अहिनसम्	अहिंस्व	अहिंस्म

विधिलिङ् ।

प्रथमपुरुष	हिंस्यात्	हिंस्याताम्	हिंस्युः
मध्यमपुरुष	हिंस्याः	हिंस्यातम्	हिंस्यात
उत्तमपुरुष	हिंस्याम्	हिंस्याव	हिंस्याम

लृट्— हिंसिष्यति, हिंसिष्यतः, हिंसिष्यन्ति ।

पिष् (पिष्लृ) सञ्चूर्णने (पेषणे)—पीसना To pound, grind, crush—पिनष्टि ; पेक्ष्यति । पिनष्टि लोको गोधूमम् ।

शिष् (शिष्लृ) अवशेषे ; विशेषणे (विशेषकरणे) च—(१) बाक़ी रखना ; (२) विशेष करना, इमतियाज़ करना, तमीज़ करना, फ़र्क़ करना To leave as a remainder ; to distinguish or discriminate from others—शिनष्टि; शेक्ष्यति ।

❀ शिष्—कर्मकर्त्तरि—बाक़ी रहना; शिष्यते ; "तेषामेकः शिष्यते, अन्ये लुप्यन्ते" । अव + शिष्—कर्मकर्त्तरि ; "यज्ज्ञात्वा नेह भूयोऽन्यज्ज्ञातव्यमवशिष्यते" गीता. ७. २. । वि + शिष्—वर्द्धने ;—कर्मकर्त्तरि ; अतिशये (बिह्तर होना, अफ़ज़ल होना) ; "मौनात् सत्यं विशिष्यते" मनु० २. ८३ ; "सर्वेषामेव दानानां ब्रह्मदानं विशिष्यते" मनु० ४. २३३. । परि + शिष्—अवशेषे । ❀

तृह, हिंसायाम् (वधे)—To kill, hurt, injure.

("तृणे तृणेढि ज्वलनः खलु ज्वलन् क्रमात् करीष-

द्रुमखाण्डमण्डलम् ॥" नै० ९. १९१.।)

लट्।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	तृणेढि	तृण्ढः	तृंहन्ति
मध्यमपुरुष	तृणेक्षि	तृण्ढः	तृण्ढ
उत्तमपुरुष	तृणेह्मि	तृंह्वः	तृंह्मः

लोट्।

प्रथमपुरुष	तृणेढु	तृण्ढाम्	तृंहन्तु
मध्यमपुरुष	तृण्ढि	तृण्ढम्	तृण्ढ
उत्तमपुरुष	तृणहानि	तृणहाव	तृणहाम

लङ्।

प्रथमपुरुष	अतृणेट्	अतृण्ढाम्	अतृंहन्
मध्यमपुरुष	अतृणेट्	अतृण्ढम्	अतृण्ढ
उत्तमपुरुष	अतृणहम्	अतृंह्व	अतृंह्म

विधिलिङ्।

प्रथमपुरुष	तृंह्यात्	तृंह्याताम्	तृंह्युः
मध्यमपुरुष	तृंह्याः	तृंह्यातम्	तृंह्यात
उत्तमपुरुष	तृंह्याम्	तृंह्याव	तृंह्याम

लृट्—तर्हिष्यति, तर्क्ष्यति।

अञ्ज् (अञ्जू) म्रक्षणे (लेपने); व्यक्तीकरणे च—(१) लेपन करना, तेल लगाना; (२) प्रकाश करना To anoint; to show—अनक्ति। (१) "अनक्ति गात्रं तैलेन जनः"; (२) मा नाञ्जी

राक्षसीर्माया:" भ. ९. ४९. ।

❦ अञ्ज् + णिच्—अञ्जन लगाना ; अञ्जयति; "नाञ्जयन्तीं स्वके नेत्रे, न चाभ्यक्तामनावृताम् (पश्येद्भार्य्यां द्विजोत्तमः)" मनु० ४. ४४. । अभि + अञ्ज्—अभ्यङ्गे, तैलादिमर्दने । वि + अञ्ज्—व्यक्तौ, प्रकाशने । अभि + वि + अञ्ज्—अभिव्यक्तौ; प्रकटने । ❦

रुधादि सकर्मक उभयपदी धातु ।

रुध् (रुधिर्) आवरणे (रोधे)—रुद्ध करना, रोकना

To obstruct, oppose ; to besiege.

("इदं रुणद्धि मां पद्ममन्तःकूजितषट्पदम्" विक्रमो०. ४. २१ ; "रुन्धन्तु* वारणघटा नगरं मदीयाः" मुद्रा० ४. १७. ।)

(परस्मैपद)

लट् ।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	रुणद्धि	रुन्धः	रुन्धन्ति
मध्यमपुरुष	रुणत्सि	रुन्धः	रुन्ध
उत्तमपुरुष	रुणध्मि	रुन्ध्वः	रुन्ध्मः

लोट् ।

प्रथमपुरुष	रुणद्धु	रुन्धाम्	रुन्धन्तु
मध्यमपुरुष	रुन्धि	रुन्धम्	रुन्ध
उत्तमपुरुष	रुणधानि	रुणधाव	रुणधाम

---

* 'रोत्स्यन्ति' इति पाठान्तरम् ।

लङ्।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	अरुणत्	अरुन्धाम्	अरुन्धन्
मध्यमपुरुष	अरुणत्, अरुणः	अरुन्धम्	अरुन्ध
उत्तमपुरुष	अरुणधम्	अरुन्ध्व	अरुन्ध्म

विधिलिङ्।

प्रथमपुरुष	रुन्ध्यात्	रुन्ध्याताम्	रुन्ध्युः
मध्यमपुरुष	रुन्ध्याः	रुन्ध्यातम्	रुन्ध्यात
उत्तमपुरुष	रुन्ध्याम्	रुन्ध्याव	रुन्ध्याम

लृट्—रोत्स्यति, रोत्स्यतः, रोत्स्यन्ति ।

(आत्मनेपद)

लट्।

प्रथमपुरुष	रुन्धे	रुन्धाते	रुन्धते
मध्यमपुरुष	रुन्त्से	रुन्धाथे	रुन्ध्वे
उत्तमपुरुष	रुन्धे	रुन्ध्वहे	रुन्ध्महे

लोट्।

प्रथमपुरुष	रुन्धाम्	रुन्धाताम्	रुन्धताम्
मध्यमपुरुष	रुन्त्स्व	रुन्धाथाम्	रुन्ध्वम्
उत्तमपुरुष	रुणधै	रुणधावहै	रुणधामहै

लङ्।

प्रथमपुरुष	अरुन्ध	अरुन्धाताम्	अरुन्धत
मध्यमपुरुष	अरुन्धाः	अरुन्धाथाम्	अरुन्ध्वम्

	एकवचन	द्विवचन	बहुवचन
उत्तमपुरुष	अरुन्धि	अरुन्ध्वहि	अरुन्ध्महि

विधिलिङ् ।

प्रथमपुरुष	रुन्धीत	रुन्धीयाताम्	रुन्धीरन्
मध्यमपुरुष	रुन्धीथाः	रुन्धीयाथाम्	रुन्धीध्वम्
उत्तमपुरुष	रुन्धीय	रुन्धीवहि	रुन्धीमहि

लृट्—रोत्स्यते, रोत्स्येते, रोत्स्यन्ते ।

❧ अनु + रुध्—दिवादिगणीय आत्मनेपदी—अनुवर्त्तने ; अनुरुध्यते ; "सद्वृत्तिमनुरुध्यन्तां भवन्तः" महावीर० २ ; "हन्त तिर्य्यञ्चोऽपि परिचयमनुरुध्यन्ते" उत्तर० ३ ; "वात्सल्यमनुरुध्यन्ते महात्मानः" महावीर० ६ ; "मद्वचनमनुरुध्यते वा भवान् ?" काद० । अव + रुध्—अवरोधे । उप + रुध्—निर्बन्धे ; प्रतिबन्धे ; अवरोधे To besiege ; आच्छादने च । नि + रुध्—निरोधे, नियमने । प्रति + रुध्—प्रतिरोधे । वि + रुध्—कर्मकर्त्तरि—विरोधे (अनैक्ये ; कलहे च) ; विरुध्यते । सम् + रुध्—प्रतिबन्धे ; संयमने च । ❧

भुज् पालने To rule, govern ; to protect.

(भुनक्ति पृथिवीं राजा ।)

(परस्मैपदी)

लट् ।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	भुनक्ति	भुङ्क्तः	भुञ्जन्ति
मध्यमपुरुष	भुनक्षि	भुङ्क्थः	भुङ्क्थ

	एकवचन	द्विवचन	बहुवचन
उत्तमपुरुष	भुनज्मि	भुञ्ज्वः	भुञ्ज्मः

लोट् ।

प्रथमपुरुष	भुनक्तु	भुङ्क्ताम्	भुञ्जन्तु
मध्यमपुरुष	भुङ्ग्धि	भुङ्क्तम्	भुङ्क्त
उत्तमपुरुष	भुनजानि	भुनजाव	भुनजाम

लङ् ।

प्रथमपुरुष	अभुनक्	अभुङ्क्ताम्	अभुञ्जन्
मध्यमपुरुष	अभुनक्	अभुङ्क्तम्	अभुङ्क्त
उत्तमपुरुष	अभुनजम्	अभुञ्ज्व	अभुञ्ज्म

विधिलिङ्—भुञ्ज्यात्, भुञ्ज्याताम्, भुञ्ज्युः ।

लृट्—भोक्ष्यति, भोक्ष्यतः, भोक्ष्यन्ति ।

भुज् अभ्यवहारे (भोजने); उपभोगे (अनुभवे) च-
(१) खाना; (२) भोग करना To eat;
to enjoy; to suffer.

((१) "शयनस्थो न भुञ्जीत" मनु० ४. ७४; (२) "अघं स केवलं भुङ्क्ते यः पचत्यात्मकारणात्" मनु० ३. ११८;
"वृद्धो जनो दुःखशतानि भुङ्क्ते"।)

(आत्मनेपदी)

लट् ।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	भुङ्क्ते	भुञ्जाते	भुञ्जते

	एकवचन	द्विवचन	बहुवचन
मध्यमपुरुष	भुङ्क्षे	भुञ्जाथे	भुङ्ग्ध्वे
उत्तमपुरुष	भुञ्जे	भुञ्ज्वहे	भुञ्ज्महे

लोट्।

प्रथमपुरुष	भुङ्क्ताम्	भुञ्जाताम्	भुञ्जताम्
मध्यमपुरुष	भुङ्क्ष्व	भुञ्जाथाम्	भुङ्ग्ध्वम्
उत्तमपुरुष	भुनजै	भुनजावहै	भुनजामहै

लङ्।

प्रथमपुरुष	अभुङ्क्त	अभुञ्जाताम्	अभुञ्जत
मध्यमपुरुष	अभुङ्क्थाः	अभुञ्जाथाम्	अभुङ्ग्ध्वम्
उत्तमपुरुष	अभुञ्जि	अभुञ्ज्वहि	अभुञ्ज्महि

विधिलिङ्।

प्रथमपुरुष	भुञ्जीत	भुञ्जीयाताम्	भुञ्जीरन्
मध्यमपुरुष	भुञ्जीथाः	भुञ्जीयाथाम्	भुञ्जीध्वम्
उत्तमपुरुष	भुञ्जीय	भुञ्जीवहि	भुञ्जीमहि

लृट्—भोक्ष्यते, भोक्ष्येते, भोक्ष्यन्ते।

⚜ उप + भुज्—उपभोगे। परि, सम् + भुज्—सम्भोगे। ⚜

छिद् (छिदिर्) द्वैधीकरणे (छेदने ; नाशने)—(१) काटना ; (२) नष्ट करना To cut ; to destroy.

((१) "नैनं छिन्दन्ति शस्त्राणि" गीता. २. २३ ;

(२) "तृष्णां छिन्धि" भर्तृ०।)

(परस्मैपद)

लट्।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	छिनत्ति	छिन्तः	छिन्दन्ति
मध्यमपुरुष	छिनत्सि	छिन्थः	छिन्थ
उत्तमपुरुष	छिनद्मि	छिन्द्वः	छिन्द्मः

लोट्।

प्रथमपुरुष	छिनत्तु	छिन्ताम्	छिन्दन्तु
मध्यमपुरुष	छिन्धि	छिन्तम्	छिन्त
उत्तमपुरुष	छिनदानि	छिनदाव	छिनदाम

लङ्।

प्रथमपुरुष	अच्छिनत्	अच्छिन्ताम्	अच्छिन्दन्
मध्यमपुरुष	अच्छिनत्, अच्छिनः	अच्छिन्तम्	अच्छिन्त
उत्तमपुरुष	अच्छिनदम्	अच्छिन्द्व	अच्छिन्द्म

विधिलिङ्—छिन्द्यात्, छिन्द्याताम्, छिन्द्युः।

लृट्—छेत्स्यति, छेत्स्यतः, छेत्स्यन्ति।

(आत्मनेपद)

लट्।

प्रथमपुरुष	छिन्ते	छिन्दाते	छिन्दते
मध्यमपुरुष	छिन्त्से	छिन्दाथे	छिन्ध्वे
उत्तमपुरुष	छिन्दे	छिन्द्वहे	छिन्द्महे

लोट् ।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	छिन्ताम्	छिन्दाताम्	छिन्दताम्
मध्यमपुरुष	छिन्त्स्व	छिन्दाथाम्	छिन्ध्वम्
उत्तमपुरुष	छिनदै	छिनदावहै	छिनदामहै

लङ् ।

प्रथमपुरुष	अच्छिन्त	अच्छिन्दाताम्	अच्छिन्दत
मध्यमपुरुष	अच्छिन्थाः	अच्छिन्दाथाम्	अच्छिन्ध्वम्
उत्तमपुरुष	अच्छिन्दि	अच्छिन्द्वहि	अच्छिन्द्महि

विधिलिङ् ।

प्रथमपुरुष	छिन्दीत	छिन्दीयाताम्	छिन्दीरन्
मध्यमपुरुष	छिन्दीथाः	छिन्दीयाथाम्	छिन्दीध्वम्
उत्तमपुरुष	छिन्दीय	छिन्दीवहि	छिन्दीमहि

लृट्—छेत्स्यते, छेत्स्येते, छेत्स्यन्ते ।

❀ आ+छिद्—आक्रम्य ग्रहणे (छीन लेना); छेदने च । उत्+छिद्—उन्मूलने । परि+छिद्—इयत्तया अवधारणे, निर्णये । वि+छिद्—छेदे, विभागे । ❀

* * * *

भिद् (भिदिर्) विदारणे (भङ्गे, विच्छेदे)—तोड़ना, भेद करना To break, pierce—भिनत्ति, भिन्ते; भेत्स्यति, भेत्स्यते । भिनत्ति भिन्ते कूलं नदी; "तेषां कथं नु हृदयं न भिनत्ति लज्जा?" मुद्रा० २. ३३. ।

❀ कर्मकर्त्तरि—भिन्न होना ; भिद्यते ; "पैशुन्याद्भिद्यते स्नेहः" पञ्च० १. १११. (नश्यति इत्यर्थः) ; "षट्कर्णो भिद्यते मन्त्रः" (प्रकाशते इत्यर्थः) पञ्च० १. १०८.। उत्+भिद्—कर्मकर्त्तरि—उद्गमे, प्रकाशे ; "अद्यापि पक्षावपि नोद्भिद्येते" काद०। निर्+भिद्—भेदने ; प्रकाशने च। प्रति+भिद्—भर्त्सने। सम्+भिद्—मिश्रणे, संश्लेषे। ❀

युज् (युजिर्) योगे (मज्ञतौ)—संयुक्त करना, मिलाना, जोड़ना To join, unite—युनक्ति, युङ्क्ते ; योक्ष्यति, योक्ष्यते। युनक्ति युङ्क्ते घृतेनान्नं लोकः। "यम युनज्मि कालेन" भ० ६. ३७।

❀ 'उत्' और स्वरान्त उपसर्गके योगसे आत्मनेपदी होता है। अनु+युज्—प्रश्ने ; अनुयुङ्क्ते। अभि+युज्—उद्योगे ; आक्रमणे ; अपराधयोजने च ; अभियुङ्क्ते। आ+युज्—संयमने ; आयुङ्क्ते। उत्+युज्—उद्योगे ; उद्युङ्क्ते। उप+युज्—प्रयोगे ; सेवने ; उपभोगे च ; उपयुङ्क्ते। नि+युज्—नियोगे, प्रेरणे, आदेशे ; नियुङ्क्ते। नि+युज्+णिच्—नियोगे ; नियोजयति। प्र+युज्—प्रयोगे ; निर्देशे च ; प्रयुङ्क्ते। वि+युज्—त्यागे ; वियोजने च ; वियुङ्क्ते। सम्+युज्—संयोजने। ❀

रिच् (रिचिर्) विरेचने (शून्यीकरणे)—सूना करना, खाली करना To empty, evacuate, clear—रिणक्ति, रिङ्क्ते ; रेक्ष्यति, रेक्ष्यते। "रिणच्मि जलधेस्तोयम्" भ० ६. ३६ ; "तिमिररिच्यमानं पूर्वदिङ्मुखमालोकयमग्रं दृश्यते" विक्रमो० ३.।

❀ अति+रिच्, वि+अति+रिच्, उत्+रिच्—कर्मकर्त्तरि—

अतिशये ; पञ्चमीके साथ ; "अश्वमेधसहस्रेभ्यः सत्यमेवातिरिच्यते" हितो० ४. १३९ ; "स्तुतिभ्यो व्यतिरिच्यन्ते दूराणि चरितानि ते" र० १०. ३० ; "ममैवोद्रिच्यते जन्म—तव जन्मनः" महाभा० । ❦

विच् (विचिर्) पृथक्करणे—अलग करना To separate, discriminate—विनक्ति, विङ्क्ते ; वेक्ष्यति, वेक्ष्यते । वोपदेवमते—ह्वादिगणीयभी होता है ; वेवेक्ति, वेविक्ते ।

❦ वि + विच्—पृथक्करणे ; विचारणे, निर्णये च । ❦

अनुवाद करो—राजा विद्रोहियोंको रुद्ध करता है । अशोकवनमे सीताको अवरुद्ध किया था । राम और लक्ष्मण दोनो भाइयोंने तीन बाणोसे खर-दूषणका मस्तक छेदन किया था । यदि फल चाहो, तो पुष्प मत तोड़ो । नौकरलोग कुठारसे लकड़ी फाड़ते हैं । आदमी आलस्यके कारण दुःख भोगता है । बार-बार भोजन करना नहीं चाहिये । तुम्हारे पुत्रको असत्-सङ्गसे वियुक्त करो । वहां तीन आदमी भेजो । उस कार्य्यमे निरर्थक आदमी नियुक्त मत करो ।

अदादि ।

क्रियाघटन-सूत्र ।

[इस प्रकरणमे तुदादि और रुधादिके ष्टार (*)-चिह्नित सूत्रोंका कार्य्य यथासम्भव होगा ।]

३१५ । 'अद्'-धातु लङ्के 'द्' और 'स्' मे मिलकर यथाक्रम 'आदत्' और 'आदः' होता है ; यथा—अद् + द् = आदत् ; अद् + स् = आदः ।

३१६ । * शकार, छ और च्छ—परस्थित 'त' और थकारमे मिल-

का यथाक्रम 'ष्ट' और 'ष्ट' होता है ; यथा—वश् + ति = वष्टि ।

३१७। * अगुण विभक्ति वा प्रत्यय परे रहनेसे, 'वश्'के स्थानमें 'उश्' होता है; यथा—वश् + थः = उष्टः ।

३१८। * य, व और म भिन्न अगुण व्यञ्जनवर्ण परे रहनेसे, 'हन्' धातुके नकारका लोप होता है ; और अन्ति, अन्तु तथा अन् परे रहनेसे, 'हन्'के स्थानमें 'घ्न' होता है ; यथा—हन् + तः = हतः ; हन् + अन्ति = घ्नन्ति । हन् + यात् = हन्यात् ; हन् + वः = हन्वः ; हन् + मः = हन्मः ।

३१९। * 'हि'के साथ मिलकर हन्—जहि, अस्—एधि, और शास्—शाधि होता है ; यथा—हन् + हि = जहि ; अस् + हि = एधि ; शास् + हि = शाधि ।

३२०। विधिलिङ्, और लट् लोट्की अगुण विभक्ति परे रहनेसे, 'अस्' धातुके अकारका लोप होता है ; और लट्का 'सि' परे रहनेसे, 'अस्' धातुके सकारका लोप होता है ; यथा—अस् + यात् = स्यात् ; अस् + तः = स्तः ; अस् + ताम् = स्ताम् ; अस् + सि = असि ।

३२१। लङ्के 'द्' और 'स्' परे रहनेसे, 'अस्' धातुके उत्तर 'ई' होता है ; यथा—अस् + द् = आसीत् ; अस् + स् = आसीः ।

३२२। * सगुण लट् आदि चार विभक्ति परे रहनेसे, अदादि और ह्वादिगणीय धातुके अन्त्यस्वर और उपधा लघुस्वरका गुण होता है ; यथा—द्विष् + ति = द्वेष्टि (३११ सूत्रानुसार 'त'के स्थानमें 'ट') ।

३२३। * द्विष्, विद् और आकारान्त धातुके परस्थित 'अन्' विकल्पसे 'उस्' होता है ; यथा—द्विष् + अन् = अद्विषुः, अद्विषन् ।

३२४ । * अगुण व्यञ्जनवर्ण परे रहनेसे, 'शास्'के स्थानमे 'शिष्' होता है ; यथा—शास्+तः=शिष्+तः=शिष्टः ।

३२५ । * अभ्यस्त धातुके† परस्थित 'अन्'—'उस्' होता है ; 'उस्' परे अन्त्यस्वरका गुण होता है, और 'अन्ति' तथा 'अन्तु'के नकारका लोप होता है ; यथा—शास्+अन्=अशासुः ; शास्+अन्ति=शासति ।

३२६ । * लङ्का 'द्' परे रहनेसे, धातुके अन्त्य 'स्'के स्थानमे 'त्', और 'स्' परे रहनेसे, विकल्पसे 'त्' होता है ; यथा—चकास्+द्=अचकात् ।

३२७ । * सगुण विभक्ति परे रहनेसे, 'मृज्'के स्थानमे 'मार्ज्' होता है ; और विभक्तिका अगुण स्वर परे, विकल्पसे 'मार्ज्' होता है ; यथा—मृज्+ति=मार्ज्+ति—

३२८ । * त, थ, ध परे रहनेसे, मृज्, सृज्, यज् और असृज् धातुके 'ज्'के स्थानमे मूर्द्धन्य 'ष्' होता है ; यथा—मार्ज्+ति=मार्ष्टि ; मृज्+तः=मृष्टः ; मृज्+हि=मृज्+धि (३०१ सू०)=मृष्+धि=मृड्+धि (३१३ सू०)=मृड्ढि (३११ सू०)।

३२९ । अन्तस्थित 'मृज्' धातुके 'ज्'के स्थानमे 'ट्' अथवा 'ड्' होता है ; यथा—मृज्+द्=अमार्ज्=अमार्ट् अमार्ड् ।

३३० । लट्, लोट्, लङ् विभक्तिका व्यञ्जनवर्ण परे रहनेसे, रुद्, स्वप्, श्वस्, अन् और जक्ष् धातुके उत्तर 'इ' होता है ; और 'द्' 'स्'

---

† द्विरुक्त धातु, और जक्ष्, जागृ, दरिद्रा, चकास्, शास् धातुकी 'अभ्यस्त'-संज्ञा होती है ।

परे 'ई' अथवा 'अ' होता है ; यथा—रुद् + ति = रोदिति (३२२सू०) रुद् + द् = अरोदीत्, अरोदत् ।

३३१ । ति, सि, मि, तु, द्, स् परे रहनेसे, 'ब्रू' धातुके उत्तर 'ई' होता है ; और वह 'ई' परे रहनेसे, गुण होता है ; यथा—ब्रू + ति = ब्रवीति ।

३३२ । * अगुण स्वर परे रहनसे, धातुके इवर्णके स्थानमे 'इय्', और उवर्णके स्थानमे 'उव्' होता है : यथा—अधि + इ + आते = अधि + इय् + आते = अधीयाते ; ब्रू + अन्ति = ब्रुवन्ति ।

३३३ । ऐ, आवहै, आमहै परे रहनेसे, 'सू' धातुके 'ऊ'के स्थानमे 'उव्' होता है ; यथा—सू + ऐ = सुवै ।

३३४ । * दुहादि धातुका 'ह' परस्थित 'त', 'थ' और धकारमे मिलकर 'ग्ध' होता है ; और 'स' 'ध्व' परे रहनेसे, अथवा कोई वर्ण परे न रहनेसे, आदिस्थित 'द'के स्थानमे 'ध', और अन्तस्थित 'ह'के स्थानमे 'क' होता है ; यथा—दुह् + ति = दोग्धि ; दुह् + सि = धोक्षि ; दुह् + द् = अदोह् = अधोक् ।

३३५ । चतुर्लकारमे 'शी' धातुका गुण होता है ; और 'अन्ते,' 'अन्ताम्', 'अन्त' विभक्ति परे रहनेसे, 'शी' धातुके उत्तर 'र' होता है ; यथा—शी + ते = शेते ; शी + अन्ते = शेरते (२८० सू०) ।

३३६ । त, थ, ध, स परे रहनेसे, 'चक्ष्'के स्थानमे 'चष्' होता है ; यथा—चक्ष् + ते = चष्टे ।

३३७ । लट्, लोट्, लङ्के 'स' 'ध' परे रहनेमे, 'ईश्' और 'ईड्' धातुके उत्तर 'इ' होता है ; यथा—ईश् + से = ईशिषे ; ईड् +

से=ईडिषे।

३३८। * अगुण व्यञ्जनवर्ण परे, 'दरिद्रा' धातुके 'आ' के स्थानमे 'इ' होता है; और 'अम्' भिन्न विभक्तिका स्वर परे रहनेसे, 'दरिद्रा' धातुके आकारका लोप होता है; यथा—दरिद्रा+तः=दरिद्रितः; दरिद्रा+अन्ति=दरिद्रति।

३३९। अगुण स्वर परे रहनेसे, 'इण्' धातुके 'इ'के स्थानमे 'य्' होता है; यथा—इ+अन्ति=यन्ति।

३४०। ति, सि, मि, तु, द्, स् परे रहनेसे, 'रु' और 'स्तु' धातुके उत्तर विकल्पसे 'ई' होता है, और 'ई' परे गुण होता है; पक्षे वृद्धि होती है; यथा—रु+ति=रवीति, रौति।

अदादि।

सकर्मक परस्मैपदी धातु।

अद् भक्षणे—खाना To eat

(फलगत्ति विहङ्गमः।)

लट्।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	अत्ति	अत्तः	अदन्ति
मध्यमपुरुष	अत्सि	अत्थः	अत्थ
उत्तमपुरुष	अद्मि	अद्वः	अद्मः

लोट्।

प्रथमपुरुष	अत्तु	अत्ताम्	अदन्तु

	एकवचन	द्विवचन	बहुवचन
मध्यमपुरुष	अद्धि	अत्तम्	अत्त
उत्तमपुरुष	अदानि	अदाव	अदाम

लङ् ।

प्रथमपुरुष	आदत्	आत्ताम्	आदन्
मध्यमपुरुष	आदः	आत्तम्	आत्त
उत्तमपुरुष	आदम्	आद्व	आद्म

विधिलिङ् ।

प्रथमपुरुष	अद्यात्	अद्याताम्	अद्युः
मध्यमपुरुष	अद्याः	अद्यातम्	अद्यात
उत्तमपुरुष	अद्याम्	अद्याव	अद्याम

लृट्--अत्स्यति, अत्स्यतः, अत्स्यन्ति ।

हन् हिंसायाम् (प्रहारे, ताडने ; त्यागे च)—(१) वध करना, विनष्ट करना ; (२) मारना, पीटना ; (३) छोड़ना To kill, destroy ; to strike, beat ; to abandon.

((१) मृगं घ्नन्ति मृगाविधः ; (२) "निशितेन कुम्भे जघान" र० ९. ६० ; (३) "मा धर्मं जहि" महाभा० ।)

लट् ।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	हन्ति	हतः	घ्नन्ति
मध्यमपुरुष	हसि	हथः	हथ
उत्तमपुरुष	हन्मि	हन्वः	हन्मः

लोट्।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	हन्तु	हताम्	घ्नन्तु
मध्यमपुरुष	जहि	हतम्	हत
उत्तमपुरुष	हनानि	हनाव	हनाम

लङ्।

प्रथमपुरुष	अहन्	अहताम्	अघ्नन्
मध्यमपुरुष	अहन्	अहतम्	अहत
उत्तमपुरुष	अहनम्	अहन्व	अहन्म

विधिलिङ्।

प्रथमपुरुष	हन्यात्	हन्याताम्	हन्युः
मध्यमपुरुष	हन्याः	हन्यातम्	हन्यात
उत्तमपुरुष	हन्याम्	हन्याव	हन्याम

लृट् —हनिष्यति, हनिष्यतः, हनिष्यन्ति।

❀ अप + हन्—ध्वंसने, दूरीकरणे। अभि + हन्—आघाते, प्रहारे; वादने च। अव + हन्—कण्डने। आ + हन्—आघाते, प्रहारे; वादने च;—अपना कोई अङ्ग-प्रत्यङ्ग कर्म होनेसे 'आ + हन्' आत्मनेपदी होता है; "आहते स्वं वक्षः"। वि + आ + हन्—व्याघाते, प्रतिबन्धे। उप + हन्—प्रहारे; नाशने च। नि + हन्—विनाशे; आघाते; वादने च। वि + हन्—विनाशे; प्रतिबन्धे च। सम् + हन्—सङ्घाते, योगे। ❀

द्विष् अप्रीतौ (द्वेषे, निन्दायाम्, विरोधे)—द्वेष करना, वैर करना, नफ़रत करना To hate,

, dislike, be hostile towards.

(धातुपाठे—उभयपदी। "द्विषन्ति मन्दाश्चरितं महात्मनाम्" कु० ५. ७५.।)

लट्।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	द्वेष्टि	द्विष्टः	द्विषन्ति
मध्यमपुरुष	द्वेक्षि	द्विष्ठः	द्विष्ठ
उत्तमपुरुष	द्वेष्मि	द्विष्वः	द्विष्मः

लोट्।

प्रथमपुरुष	द्वेष्टु	द्विष्टाम्	द्विषन्तु
मध्यमपुरुष	द्विड्ढि	द्विष्टम्	द्विष्ट
उत्तमपुरुष	द्वेषाणि	द्वेषाव	द्वेषाम

लङ्।

प्रथमपुरुष	अद्वेट्	अद्विष्टाम्	अद्विषुः, अद्विषन्
मध्यमपुरुष	अद्वेट्	अद्विष्टम्	अद्विष्ट
उत्तमपुरुष	अद्वेषम्	अद्विष्व	अद्विष्म

विधिलिङ्।

प्रथमपुरुष	द्विष्यात्	द्विष्याताम्	द्विष्युः
मध्यमपुरुष	द्विष्याः	द्विष्यातम्	द्विष्यात
उत्तमपुरुष	द्विष्याम्	द्विष्याव	द्विष्याम

लृट्—द्वेक्ष्यति, द्वेक्ष्यतः, द्वेक्ष्यन्ति।

शास् (शासु) अनुशासने (उपदेशे; शासने; आज्ञायाम्)—

(१) शिक्षा देना; (२) पालन करना, हुकूमत करना; (३) आदेश करना To teach; to rule, govern; to order.

((१) द्विकर्मक—"माणवकं धर्मं शास्ति"; "स किंसखा साधु न शास्ति योऽधिपम्" भा० १. ५; (२) "राज्यं रजोरिक्तमनाः शशास" र० १४. ८५; (३) "शाधि नः करवाम किम्" कु० ६. २४.।)

लट्।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	शास्ति	शिष्टः	शासति
मध्यमपुरुष	शास्सि	शिष्ठः	शिष्ठ
उत्तमपुरुष	शास्मि	शिष्वः	शिष्मः

लोट्।

प्रथमपुरुष	शास्तु	शिष्टाम्	शासतु
मध्यमपुरुष	शाधि	शिष्टम्	शिष्ट
उत्तमपुरुष	शासानि	शासाव	शासाम

लङ्।

प्रथमपुरुष	अशात्	अशिष्टाम्	अशासुः
मध्यमपुरुष	अशात्, अशाः	अशिष्टम्	अशिष्ट
उत्तमपुरुष	अशासम्	अशिष्व	अशिष्म

विधिलिङ्।

प्रथमपुरुष	शिष्यात्	शिष्याताम्	शिष्युः

	एकवचन	द्विवचन	बहुवचन
मध्यमपुरुष	शिष्या	शिष्यातम्	शिष्यात
उत्तमपुरुष	शिष्याम्	शिष्याव	शिष्याम

लृट्—शासिष्यति, शासिष्यत , शासिष्यन्ति।

❀ अनु+शास्—उपदेशे, आदेश दण्डने च। प्र+शास्—'शास' वत्। ❀

मृज् (मृजू) शुद्धीकरणे (मार्जने)—साफ करना, पोंछना To wipe or wash off, cleanse.

("त्वदलवान् ममार्ज" माघ० ३ ७९, "दोषप्रवा दममृजन्" माघ० ५, २८,।)

लट्।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	मार्ष्टि	मृष्ट	मृजन्ति, मार्जन्ति
मध्यमपुरुष	मार्क्षि	मृष्ट	मृष्ट
उत्तमपुरुष	मार्ज्मि	मृज्व	मृज्म

लोट्।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	मार्ष्टु	मृष्टाम्	मृजन्तु, मार्जन्तु
मध्यमपुरुष	मृड्ढि	मृष्टम्	मृष्ट
उत्तमपुरुष	मार्जानि	मार्जाव	मार्जाम

लङ्।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	अमार्ट्	अमृष्टाम्	अमृजन, अमार्जन्
मध्यमपुरुष	अमार्ट्	अमृष्टम्	अमृष्ट

	एकवचन	द्विवचन	बहुवचन
उत्तमपुरुष	अमार्जम्	अमृज्व	अमृज्म

विधिलिङ्।

प्रथमपुरुष	मृज्यात्	मृज्याताम्	मृज्युः
मध्यमपुरुष	मृज्याः	मृज्यातम्	मृज्यात
उत्तमपुरुष	मृज्याम्	मृज्याव	मृज्याम

लृट्—मार्जिष्यति मार्क्ष्यति, मार्जिष्यतः
मार्क्ष्यतः, मार्जिष्यन्ति मार्क्ष्यन्ति।

वश् इच्छायाम्—कामना करना To desire, long for.

("निःस्वो वष्टि शतं, शती दशशतम्" शान्तिशतकम्;
"अमी हि वीर्य्यप्रभवं भवस्य जयाय सेनान्य-
मुशन्ति देवाः" कु० ३. १९. ।)

लट्।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	वष्टि	उष्टः	उशन्ति
मध्यमपुरुष	वक्षि	उष्ठः	उष्ठ
उत्तमपुरुष	वश्मि	उश्वः	उश्मः

लोट्।

प्रथमपुरुष	वष्टु	उष्टाम्	उशन्तु
मध्यमपुरुष	उड्ढि	उष्टम्	उष्ट
उत्तमपुरुष	वशानि	वशाव	वशाम

लङ्।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	अवट्	औष्टाम्	औशन्
मध्यमपुरुष	अवट्	औष्टम्	औष्ट
उत्तमपुरुष	अवशम्	औश्व	औश्म

विधिलिङ्।

प्रथमपुरुष	उश्यात्	उश्याताम्	उश्युः
मध्यमपुरुष	उश्याः	उश्यातम्	उश्यात
उत्तमपुरुष	उश्याम्	उश्याव	उश्याम

लृट्—वशिष्यति।

वच् परिभाषणे (कथने)—कहना To say, speak.

("हितं मितञ्च यो वक्ति"।)

लट्।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	वक्ति	वक्तः	* * †
मध्यमपुरुष	वक्षि	वक्थः	वक्थ
उत्तमपुरुष	वच्मि	वच्वः	वच्मः

लोट्।

प्रथमपुरुष	वक्तु	वक्ताम्	वचन्तु
मध्यमपुरुष	वग्धि	वक्तम्	वक्त
उत्तमपुरुष	वचानि	वचाव	वचाम

† अयम् 'अन्ति'-परो न प्रयुज्यते ; बहुवचनपर इत्यन्ये।

लङ्।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	अवक्	अवक्ताम्	अवचन्
मध्यमपुरुष	अवक्	अवक्तम्	अवक्त
उत्तमपुरुष	अवचम्	अवच्व	अवच्म

विधिलिङ्।

प्रथमपुरुष	वच्यात्	वच्याताम्	वच्युः
मध्यमपुरुष	वच्याः	वच्यातम्	वच्यात
उत्तमपुरुष	वच्याम्	वच्याव	वच्याम

लृट्—वक्ष्यति, वक्ष्यतः, वक्ष्यन्ति।

❀ निर्+वच्—निरुक्तौ, व्याख्यायाम्। प्र+वच्—कथने, वर्णने। प्रति+वच्—प्रतिवचने। ❀

विद् ज्ञाने—जानना To know.*

("विद्धि व्याधिव्यालग्रस्तम्

लोकं शोकहतञ्च समस्तम्।" मोहमुद्गरः।)

लट्।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	वेत्ति	वित्तः	विदन्ति

* "सत्तायां विद्यते, ज्ञाने वेत्ति, विन्ते विचारणे।
विन्दते विन्दति प्राप्तौ, श्यन्-लुक्-श्नम्-शेष्विदं क्रमात्॥"
"वेत्ति सर्वाणि शास्त्राणि, गर्वस्तस्य न विद्यते।
विन्ते धर्मं सदा सद्भिः, तेषु पूजाञ्च विन्दति॥"

	एकवचन	द्विवचन	बहुवचन
मध्यमपुरुष	वेत्सि	वित्थः	वित्थ
उत्तमपुरुष	वेद्मि	विद्वः	विद्मः

लोट्।

प्रथमपुरुष	वेत्तु	वित्ताम्	विदन्तु
मध्यमपुरुष	विद्धि	वित्तम्	वित्त
उत्तमपुरुष	वेदानि	वेदाव	वेदाम

लङ्।

प्रथमपुरुष	अवेत्	अवित्ताम्	अविदुः,अविदन्
मध्यमपुरुष	अवेत्, अवेः	अवित्तम्	अवित्त
उत्तमपुरुष	अवेदम्	अविद्व	अविद्म

विधिलिङ्।

प्रथमपुरुष	विद्यात्	विद्याताम्	विद्युः
मध्यमपुरुष	विद्याः	विद्यातम्	विद्यात
उत्तमपुरुष	विद्याम्	विद्याव	विद्याम

लृट्—वेदिष्यति, वेदिष्यतः, वेदिष्यन्ति।

विद् धातुके लट् और लोट्में और एकप्रकार रूप होते हैं; यथा—

लट्।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	वेद	विदतुः	विदुः
मध्यमपुरुष	वेत्थ	विदथुः	विद
उत्तमपुरुष	वेद	विद्व	विद्म

लोट् ।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	विदाङ्करोतु	विदाङ्कुरुताम्	विदाङ्कुर्वन्तु
मध्यमपुरुष	विदाङ्कुरु	विदाङ्कुरुतम्	विदाङ्कुरुत
उत्तमपुरुष	विदाङ्करवाणि	विदाङ्करवाव	विदाङ्करवाम

❀ आ + विद् + णिच्—आवेदने, ज्ञापने ; आवेदयति । नि + विद् + णिच्—निवेदने, ज्ञापने ; उत्सर्गे च । ❀

इ (इण्) गतौ (प्राप्तौ च)—(१) जाना ; (२) पाना To go to, come to or near ; to obtain, attain to.

((१) "शशिनं पुनरेति शर्वरी" र० ८. ५६ ; (२) "निर्बुद्धिः क्षयमेति" मृच्छ० १. १४. ।)

लट् ।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	एति	इतः	यन्ति
मध्यमपुरुष	एषि	इथः	इथ
उत्तमपुरुष	एमि	इवः	इमः

लोट् ।

प्रथमपुरुष	एतु	इताम्	यन्तु
मध्यमपुरुष	इहि	इतम्	इत
उत्तमपुरुष	अयानि	अयाव	अयाम

लङ् ।

प्रथमपुरुष	ऐत्	ऐताम्	आयन्

	एकवचन	द्विवचन	बहुवचन
मध्यमपुरुष	ऐः	ऐतम्	ऐत
उत्तमपुरुष	आयम्	ऐव	ऐम

विधिलिङ्।

प्रथमपुरुष	इयात्	इयाताम्	इयुः
मध्यमपुरुष	इयाः	इयातम्	इयात
उत्तमपुरुष	इयाम्	इयाव	इयाम

लृट्—एष्यति, एष्यतः, एष्यन्ति।

❀ अति + इ, वि + अति + इ—अतिक्रमे। अनु + इ—अनुगमने; अन्वये च। अप + इ—अपगमे, क्षये। वि + अप + इ—व्यपगमे, निवृत्तौ। अभि + इ—अभिमुखगतौ; प्राप्तौ च। अव + इ—ज्ञाने। सम् + अव + इ—समवाये, मिलने (मेलने वा), संयोगे। आ + इ—आगमने, प्राप्तौ; ऐति। उत् + इ—उदये, उद्गमने, उद्गमे। अभि + उत् + इ—उदये; उन्नतौ च। उप + इ—समीपगमने; प्राप्तौ च। अभि + उप + इ—उपस्थितौ; स्वीकारे च। परा + इ—पलायने; प्राप्तौ च। परि + इ—प्रदक्षिणीकरणे; वेष्टने च। वि + परि + इ—विपर्य्यये, वैपरीत्ये, अन्यथाभावे। प्र + इ—परलोकगतौ, मरणे। अभि + प्र + इ—अभिप्राये, आशये (इच्छा करना, इरादा करना, मक़सद रखना)। प्रति + इ—प्रतीतौ, ज्ञाने, विश्वासे; प्रतिगमने च। ❀

अनुवाद करो—देखो, एक हरिण निविष्टचित्तसे घास खा रहा है। निरपराध जन्तुओंका (द्वितीया) हनन करना नहीं चाहिये। व्यर्थ मुझे मत मारो। असुर स्वभावसेही देवताओंके प्रति द्वेष करते हैं। दुष्टका

(द्वितीया) शासन करो। विडाल भोजनके पश्चात् मुख मार्जन करता है। जो आत्माका तत्त्व अच्छे प्रकारसे जानता है, वह अनायास मुक्त होता है। आत्मज्ञानकोही सब धर्मोंसे श्रेष्ठ जानना। आओ, चलें।

अदादि अकर्मक परस्मैपदी धातु।

अस् सत्तायाम् (विद्यमानतायाम्, स्थितौ)—रहना

To be, exist.

("नास्त्यगतिर्मनोरथानाम्" विक्रमो०।)

लट्।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	अस्ति	स्तः	सन्ति
मध्यमपुरुष	असि	स्थः	स्थ
उत्तमपुरुष	अस्मि	स्वः	स्मः

लोट्।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	अस्तु	स्ताम्	सन्तु
मध्यमपुरुष	एधि	स्तम्	स्त
उत्तमपुरुष	असानि	असाव	असाम

लङ्।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	आसीत्	आस्ताम्	आसन्
मध्यमपुरुष	आसीः	आस्तम्	आस्त
उत्तमपुरुष	आसम्	आस्व	आस्म

विधिलिङ्।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	स्यात्	स्याताम्	स्युः
मध्यमपुरुष	स्याः	स्यातम्	स्यात
उत्तमपुरुष	स्याम्	स्याव	स्याम

लृट्—भविष्यति।

रुदादि* ।

रुद् (रुदिर्) अश्रुविमोचने (रोदने)—रोना

To cry, weep, lament.

(अश्रुविमोचनमात्रेऽकर्मकः—रोदिति लोकः शोकात्। आह्वानविशिष्ट-रोदने तु सकर्मक.—"नामग्राहमरोदीत् सा भ्रातरौ" भ० ५. ९.।)

लट्।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	रोदिति	रुदितः	रुदन्ति
मध्यमपुरुष	रोदिषि	रुदिथः	रुदिथ
उत्तमपुरुष	रोदिमि	रुदिवः	रुदिमः

लोट्।

प्रथमपुरुष	रोदितु	रुदिताम्	रुदन्तु

* रोदितिः स्वपितिश्चैव श्वसितिः प्राणितिस्तथा।
जक्षितिश्चैव विज्ञेयो रुदादि पञ्चको गण ॥

	एकवचन	द्विवचन	बहुवचन
मध्यमपुरुष	रुदिहि	रुदितम्	रुदित
उत्तमपुरुष	रोदानि	रोदाव	रोदाम

लङ् ।

प्रथमपुरुष	अरोदीत् अरोदत्	अरुदिताम्	अरुदन्
मध्यमपुरुष	अरोदीः अरोदः	अरुदितत्	अरुदित
उत्तमपुरुष	अरोदम्	अरुदिव	अरुदिम

विधिलिङ् ।

प्रथमपुरुष	रुद्यात्	रुद्याताम्	रुद्युः
मध्यमपुरुष	रुद्याः	रुद्यातम्	रुद्यात
उत्तमपुरुष	रुद्याम्	रुद्याव	रुद्याम

लृट्—रोदिष्यति, रोदिष्यतः, रोदिष्यन्ति ।

स्वप् (ञिष्वप्) शयने (निद्रायाम्)—सोना To sleep.

("गुणानामेव दौरात्म्याद्धुरि धुर्यो नियुज्यते । असञ्जातकिणस्कन्धः सुखं स्वपिति गौर्गडिः ॥" काव्यप्रकाशः १०. ।)

लट् ।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	स्वपिति	स्वपितः	स्वपन्ति
मध्यमपुरुष	स्वपिषि	स्वपिथः	स्वपिथ

	एकवचन	द्विवचन	बहुवचन
उत्तमपुरुष	स्वपिमि	स्वपिवः	स्वपिमः

लोट्।

प्रथमपुरुष	स्वपितु	स्वपिताम्	स्वपन्तु
मध्यमपुरुष	स्वपिहि	स्वपितम्	स्वपित
उत्तमपुरुष	स्वपानि	स्वपाव	स्वपाम

लङ्।

प्रथमपुरुष	अस्वपीत् / अस्वपत्	अस्वपिताम्	अस्वपन्
मध्यमपुरुष	अस्वपीः / अस्वपः	अस्वपितम्	अस्वपित
उत्तमपुरुष	अस्वपम्	अस्वपिव	अस्वपिम

विधिलिङ्।

प्रथमपुरुष	स्वप्यात्	स्वप्याताम्	स्वप्युः
मध्यमपुरुष	स्वप्याः	स्वप्यातम्	स्वप्यात
उत्तमपुरुष	स्वप्याम्	स्वप्याव	स्वप्याम

लृट्—स्वप्स्यति, स्वप्स्यतः, स्वप्स्यन्ति।

श्वस् प्राणने (श्वासे ; जीवने)—दम लेना ; जीना To breathe, respire, draw breath ; to live.

("क्षणमप्यवतिष्ठते श्वसन् यदि जन्तुर्ननु लाभवानसौ।" र० ८. ८७.।)

लट् ।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	श्वसिति	श्वसितः	श्वसन्ति
मध्यमपुरुष	श्वसिषि	श्वसिथः	श्वसिथ
उत्तमपुरुष	श्वसिमि	श्वसिवः	श्वसिमः

लोट् ।

प्रथमपुरुष	श्वसितु	श्वसिताम्	श्वसन्तु
मध्यमपुरुष	श्वसिहि	श्वसितम्	श्वसित
उत्तमपुरुष	श्वसानि	श्वसाव	श्वसाम

लङ् ।

प्रथमपुरुष	अश्वसीत्, अश्वसत्	अश्वसिताम्	अश्वसन्
मध्यमपुरुष	अश्वसीः, अश्वसः	अश्वसितम्	अश्वसित
उत्तमपुरुष	अश्वसम्	अश्वसिव	अश्वसिम

विधिलिङ् ।

प्रथमपुरुष	श्वस्यात्	श्वस्याताम्	श्वस्युः
मध्यमपुरुष	श्वस्याः	श्वस्यातम्	श्वस्यात
उत्तमपुरुष	श्वस्याम्	श्वस्याव	श्वस्याम

लृट्—श्वसिष्यति, श्वसिष्यतः, श्वसिष्यन्ति ।

❀ आ + श्वस्, सम् + आ + श्वस्—आश्वासे, सान्त्वनायाम् ।

उद्+श्वस्—उच्छ्वासे (बहिर्मुखश्वासे ; अन्तर्मुखश्वासे इत्यन्ये)। नि+श्वस्, निर्+श्वस्—निश्वासे (अन्तर्मुखश्वासे ; बहिर्मुखश्वासे इत्यन्ये)। वि+श्वस्—विश्वासे ; प्रायः सप्तमीके साथ ; "पुंसि विश्वसिति कुत्र कुमारी ?" नै० ५. ११०.। ❀

प्र+अन्—प्राणने (श्वासत्यागे ; जीवने)—साँस छोड़ना ; जीता रहना To respire ; to live, be alive.

("कथमसौ क्षीणा क्षणं प्राणिति ?" गीतगो० ४. २१.।)

लट्।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	प्राणिति	प्राणतः	प्राणन्ति
मध्यमपुरुष	प्राणिषि	प्राणिथः	प्राणिथ
उत्तमपुरुष	प्राणिमि	प्राणिवः	प्राणिमः

लोट्।

प्रथमपुरुष	प्राणितु	प्राणिताम्	प्राणन्तु
मध्यमपुरुष	प्राणिहि	प्राणितम्	प्राणित
उत्तमपुरुष	प्राणानि	प्राणाव	प्राणाम

लङ्।

प्रथमपुरुष	प्राणीत्, प्राणत्	प्राणिताम्	प्राणन्
मध्यमपुरुष	प्राणीः, प्राणः	प्राणितम्	प्राणित
उत्तमपुरुष	प्राणम्	प्राणिव	प्राणिम

विधिलिङ् ।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	प्राण्यात्	प्राण्याताम्	प्राण्युः
मध्यमपुरुष	प्राण्याः	प्राण्यातम्	प्राण्यात
उत्तमपुरुष	प्राण्याम्	प्राण्याव	प्राण्याम

लृट्—प्राणिष्यति, प्राणिष्यतः, प्राणिष्यन्ति ।

जक्षादि ।*

जक्ष् भक्षणे—खाना To eat.

(सकर्मक—"जक्षिमोऽनपराधेऽपि नरान्" भ० ४. ३९. ।)

लट् ।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	जक्षिति	जक्षितः	जक्षति
मध्यमपुरुष	जक्षिषि	जक्षिथः	जक्षिथ
उत्तमपुरुष	जक्षिमि	जक्षिवः	जक्षिमः

लोट् ।

प्रथमपुरुष	जक्षितु	जक्षिताम्	जक्षतु
मध्यमपुरुष	जक्षिहि	जक्षितम्	जक्षित
उत्तमपुरुष	जक्षाणि	जक्षाव	जक्षाम

---

* जक्ष्, जागृ, दरिद्रा, चकास्, शास् ।

जक्ष जागृ दरिद्रा च चकास्तिः शास्तिरेव च ।

दीधी वेवी च विज्ञेयो जक्षादिः सप्तको गणः ॥

लङ्।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	अजक्षीत् अजक्षत्	अजक्षिताम्	अजक्षुः
मध्यमपुरुष	अजक्षीः अजक्षः	अजक्षितम्	अजक्षित
उत्तमपुरुष	अजक्षम्	अजक्षिव	अजक्षिम

विधिलिङ्।

प्रथमपुरुष	जक्ष्यात्	जक्ष्याताम्	जक्ष्युः
मध्यमपुरुष	जक्ष्याः	जक्ष्यातम्	जक्ष्यात
उत्तमपुरुष	जक्ष्याम्	जक्ष्याव	जक्ष्याम

लृट्—जक्षिष्यति।

जागृ निद्राक्षये (जागरणे)—जागना To be awake.

("दण्डः सुप्तेषु जागर्त्ति, दण्डं धर्मं विदुर्बुधाः" मनु० ७. १८. ।)

लट्।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	जागर्त्ति	जागृतः	जाग्रति
मध्यमपुरुष	जागर्षि	जागृथः	जागृथ
उत्तमपुरुष	जागर्मि	जागृवः	जागृमः

लोट्।

प्रथमपुरुष	जागर्त्तु	जागृताम्	जाग्रतु
मध्यमपुरुष	जागृहि	जागृतम्	जागृत

	एकवचन	द्विवचन	बहुवचन
उत्तमपुरुष	जागराणि	जागराव	जागराम

लङ् ।

प्रथमपुरुष	अजागः	अजागृताम्	अजागरुः
मध्यमपुरुष	अजागः	अजागृतम्	अजागृत
उत्तमपुरुष	अजागरम्	अजागृव	अजागृम

विधिलिङ् ।

प्रथमपुरुष	जागृयात्	जागृयाताम्	जागृयुः
मध्यमपुरुष	जागृयाः	जागृयातम्	जागृयात
उत्तमपुरुष	जागृयाम्	जागृयाव	जागृयाम

लृट्—जागरिष्यति ।

चकास् (चकासृ) दीप्तौ (शोभायाम्)—चमकना

To shine, be bright.

("गण्डश्चण्डि ! चकास्ति नीलनलिनीश्रीमोचनं लोचनम्"
गीतगो० १०. १४ ; "चकास्ति योग्येन हि
योग्यसङ्गमः" नै० ६. ९६. ।)

लट् ।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	चकास्ति	चकास्तः	चकासति
मध्यमपुरुष	चकास्सि	चकास्थः	चकास्थ
उत्तमपुरुष	चकास्मि	चकास्वः	चकास्मः

लोट्।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	चकास्तु	चकास्ताम्	चकासतु
मध्यमपुरुष	चकाधि, चकाद्धि	चकास्तम्	चकास्त
उत्तमपुरुष	चकासानि	चकासाव	चकासाम

लङ्।

प्रथमपुरुष	अचकात्	अचकास्ताम्	अचकासुः
मध्यमपुरुष	अचकात्, अचकाः	अचकास्तम्	अचकास्त
उत्तमपुरुष	अचकासम्	अचकास्व	अचकास्म

विधिलिङ्।

प्रथमपुरुष	चकास्यात्	चकास्याताम्	चकास्युः
मध्यमपुरुष	चकास्याः	चकास्यातम्	चकास्यात
उत्तमपुरुष	चकास्याम्	चकास्याव	चकास्याम

लृट्—चकासिष्यति।

अदादि आकारान्त सकर्मक परस्मैपदी धातु।

पा रक्षणे (पालने)—रक्षा करना To protect.

("अधर्मान्मां पाहि" महाभा०।)

लट्।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	पाति	पातः	पान्ति
मध्यमपुरुष	पासि	पाथः	पाथ
उत्तमपुरुष	पामि	पावः	पामः

लोट् ।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	पातु	पाताम्	पान्तु
मध्यमपुरुष	पाहि	पातम्	पात
उत्तमपुरुष	पानि	पाव	पाम

लङ् ।

प्रथमपुरुष	अपात्	अपाताम्	अपुः, अपान्
मध्यमपुरुष	अपाः	अपातम्	अपात
उत्तमपुरुष	अपाम्	अपाव	अपाम

विधिलिङ् ।

प्रथमपुरुष	पायात्	पायाताम्	पायुः
मध्यमपुरुष	पायाः	पायातम्	पायात
उत्तमपुरुष	पायाम्	पायाव	पायाम

लृट्—पास्यति ।

⚜ प्रति + पा + णिच्—(१) प्रतिपालने, रक्षणे ; (२) प्रतीक्षायाञ्च ; प्रतिपालयति ; "अन्यासक्तो देवः, तदवसरं प्रतिपालयामि" शकु० ५ ; "प्रतिपालय माम्, यावदुपसर्पामि" वेणी० ६. । ⚜

* * * *

ख्या कथने—कहना To tell, declare—ख्याति ; ख्यास्यति ।

"ख्याति साधुः कथां हरेः" ।

⚜ ख्या + णिच्, अभि + ख्या + णिच्—ख्यापने, विज्ञापने, प्रकाशने ; ख्यापयति । आ + ख्या—कथने, वर्णने । उप + आ + ख्या—

वर्णने । प्रति + आ + ख्या—निराकरणे ; अस्वीकारे । वि + आ + ख्या—व्याख्यायाम्, विवरणे । सम् + ख्या—गणनायाम् । ❀

मा माने (परिमाणे)—नापना To measure—माति ; मास्यति । माति भूमिं नरेन्द्र राजा । "न माति मानिनो यस्य यशस्त्रिभुवनोदरे" ; "तनौ ममुस्तत्र न कैटभद्विषस्तपोधनाभ्यागमसम्भवा मुदः" माघ० १. २३.—इत्यादिषु अन्तर्भावार्थं अकर्मकः ; न माति—न परिमाण गच्छति, अतिरिच्यते इत्यर्थः (नहीं समाता Is not contained or comprised in, does not find room or space in) ।

❀ अनु + मा—अनुमाने । उप + मा—उपमाने । निर् + मा—निर्माणे ; "निर्माति यः पर्वणि पूर्णमिन्दुम्" नै० ३. ३२. । परि + मा—परिमाणे ; "उदरं परिमाति मुष्टिना" नै० २. ३९. । प्र + मा—प्रमायाम्, निश्चयज्ञाने । ❀

या गतौ (प्राप्तौ च)—(१) जाना ; (२) पाना To go; to attain to—याति ; यास्यति । (१) "ययौ तदीयामवलम्ब्य चाङ्गुलिम्" र० ३ २५ ; (२) "सुखात् तु यो याति नरो दरिद्रतां धृतः शरीरेण मृत स जीवति" मृच्छ० १. १०. ।

❀ या + णिच्—अतिवाहने, क्षपणे ; यापयति । अति + या—अतिक्रमे । अनु + या—अनुवर्त्तने ; अनुकरणे, सादृश्ये ; सहगमने च । अप + या—पलायने । अभि + या—समीपगमने ; आक्रमणे च । आ + या—आगमने ; प्राप्तौ च । उत् + या—उत्थाने, उन्नतौ ; उत्पत्तौ च । प्रति + उत् + या—प्रत्युद्गमने, सम्मानार्थं पुरोगमने ।

प्र + या—प्रयाणे, गमने, प्रस्थाने । ⚜

रा दाने—देना To bestow—राति ; रास्यति । "न राति रोगिणेऽपथ्यं वाञ्छतेऽपि भिषक्तमः" ।

ला आदाने (ग्रहणे)—लेना To take, receive—लाति ; लास्यति । "लुलुः खड्गान्" भ० १४. ९२. ।

अदादि आकारान्त अकर्मक परस्मैपदी धातु ।

द्रा पलायने—भागना To run away—द्राति ; द्रास्यति ।

⚜ नि + द्रा—निद्रायाम् । ⚜

भा दीप्तौ (शोभायाम् ; प्रकाशे)—चमकना ; ज़ाहिर होना To shine; to seem, appear—भाति ; भास्यति । "तावद्भा भारवेर्भाति यावन्माघस्य नोदयः" उद्भटः ; "बुभुक्षितं न प्रति भाति किञ्चित्" महाभा० ।

⚜ आ + भा, प्रति + भा—शोभायाम् ; स्फुरणे, प्रकाशे, अवभासे च । ⚜

वा गतौ (वायोर्गतौ)—हवा चलना To blow—वाति ; वास्यति । वाति वायुः ।

⚜ निर् + वा—निर्वाणे (शीतलतायाम्, शान्तौ, निर्वृतौ) ; "निरवात् कृशानुः" राघवपाण्डवीयम् ८. ४२ ; "तस्य वपुर्जलार्द्रापवनैर्न निर्ववौ" माघ० १. ६५. । निर् + वा + णिच्—निर्वापणे (ठण्डा करना, बुझाना) ; निर्वापयति । ⚜

स्ना शौचे (स्नाने)—नहाना To bathe—स्नाति ; स्नास्यति । "स्नाति गङ्गाजलैर्नित्यम्" ; "मृगतृष्णाम्भसि स्नातः" ।

दरिद्रा दुर्गतौ (क्लेशेनावस्थाने, अकिञ्चनीभावे)—दरिद्र होना To be poor or needy—(लट्) दरिद्राति, दरिद्रितः, दरिद्रति; (लोट्) दरिद्रातु, दरिद्रिताम्, दरिद्रतु; (लङ्) अदरिद्रात्, अदरिद्रिताम्, अदरिद्रुः; (लृट्) दरिद्रिष्यति। "उपर्य्युपरि पश्यन्तः सर्वं एव दरिद्रति" हितो० २. २.।

अदादि उकारान्त सकर्मक परस्मैपदी धातु।

णु (णु) स्तुतौ—स्तव करना, प्रशंसा करना
To praise, extol.
("सास्वती तन्मिथुनं नुनाव" कु० ७. ९०.।)

लट्।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	नौति	नुतः	नुवन्ति
मध्यमपुरुष	नौषि	नुथः	नुथ
उत्तमपुरुष	नौमि	नुवः	नुमः

लोट्।

प्रथमपुरुष	नौतु	नुताम्	नुवन्तु
मध्यमपुरुष	नुहि	नुतम्	नुत
उत्तमपुरुष	नवानि	नवाव	नवाम

लङ्।

प्रथमपुरुष	अनौत्	अनुताम्	अनुवन्
मध्यमपुरुष	अनौः	अनुतम्	अनुत
उत्तमपुरुष	अनवम्	अनुव	अनुम

विधिलिङ् ।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	नुयात्	नुयाताम्	नुयुः
मध्यमपुरुष	नुयाः	नुयातम्	नुयात
उत्तमपुरुष	नुयाम्	नुयाव	नुयाम

लृट्—नविष्यति, नोष्यति ।

अदादि उकारान्त अकर्मक परस्मैपदी धातु ।

क्षु (टुक्षु) शब्दे (क्षुते)—छींकना To sneeze—क्षौति ; क्षविष्यति । क्षौति कफी ।

रु शब्दे (रवे)—आवाज़ करना To sound; to hum (as bees)—रौति रवीति, रुतः रुवीतः, रुवन्ति ; रविष्यति रोष्यति । "कर्णे कलं किमपि रौति शनैर्विचित्रम्" हितो० १. ८२. ।

अदादि सकर्मक आत्मनेपदी ।

'अधि'-पूर्वक इ (अधीङ्) अध्ययने—पढ़ना

To read, study.

(अध्यापकाद्व्याकरणमधीते ।)

लट् ।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	अधीते	अधीयाते	अधीयते
मध्यमपुरुष	अधीषे	अधीयाथे	अधीध्वे
उत्तमपुरुष	अधीये	अधीवहे	अधीमहे

लोट्।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	अधीताम्	अधीयाताम्	अधीयताम्
मध्यमपुरुष	अधीष्व	अधीयाथाम्	अधीध्वम्
उत्तमपुरुष	अध्ययै	अध्ययावहै	अध्ययामहै

लङ्।

प्रथमपुरुष	अध्यैत	अध्यैयाताम्	अध्यैयत
मध्यमपुरुष	अध्यैथाः	अध्यैयाथाम्	अध्यैध्वम्
उत्तमपुरुष	अध्ययि	अध्यैवहि	अध्यैमहि

विधिलिङ्।

प्रथमपुरुष	अधीयीत	अधीयीयाताम्	अधीयीरन्
मध्यमपुरुष	अधीयीथाः	अधीयीयाथाम्	अधीयीध्वम्
उत्तमपुरुष	अधीयीय	अधीयीवहि	अधीयीमहि

लृट्।

प्रथमपुरुष	अध्येष्यते	अध्येष्येते	अध्येष्यन्ते
मध्यमपुरुष	अध्येष्यसे	अध्येष्येथे	अध्येष्यध्वे
उत्तमपुरुष	अध्येष्ये	अध्येष्यावहे	अध्येष्यामहे

सू (षूङ्) प्रसवे (जनने, उत्पादने)—जनना, पैदा करना To bring forth, produce.

(विहलता पल्लवं सूते ; "कीर्त्तिं सूते सूनृता वाक्"।)

लट् ।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	सूते	सुवाते	सुवते
मध्यमपुरुष	सूषे	सुवाथे	सूध्वे
उत्तमपुरुष	सुवे	सूवहे	सूमहे

लोट् ।

प्रथमपुरुष	सूताम्	सुवाताम्	सुवताम्
मध्यमपुरुष	सूष्व	सुवाथाम्	सूध्वम्
उत्तमपुरुष	सुवै	सुवावहै	सुवामहै

लङ् ।

प्रथमपुरुष	असूत	असुवाताम्	असुवत
मध्यमपुरुष	असूथाः	असुवाथाम्	असूध्वम्
उत्तमपुरुष	असुवि	असूवहि	असूमहि

विधिलिङ् ।

प्रथमपुरुष	सुवीत	सुवीयाताम्	सुवीरन्
मध्यमपुरुष	सुवीथाः	सुवीयाथाम्	सुवीध्वम्
उत्तमपुरुष	सुवीय	सुवीवहि	सुवीमहि

लृट्—सविष्यते, सोष्यते ।

अनुवाद करो—सुख दुःख निरन्तर जाता आता है । नदीके तटमे वृक्षावली शोभा पाती है । मै तुझे विपदूसे रक्षा करूंगा । उस दिन मैने गङ्गामे स्नान किया था । जो सबके मङ्गलकी (द्वितीया) कामना करते हैं, सर्वान्तःकरणसे उनकी (द्वितीया) प्रशंसा करनी चाहिये । भक्तगण

भक्तिभरसे महामायाकी स्तुति करते हैं। गङ्गादेवीने महात्मा भीष्मको (द्वितीया) प्रसन्न किया था। उनके अनुग्रहसे हम जीते हैं। दूतके मुखसे सीताका जनापवाद सुनकर (श्रुत्वा) रामने दीर्घ निश्वास छोड़ा। लड़के! तुमलोग कलह मत करो।

चक्ष् (चक्षिङ्) कथने—कहना To speak, tell.

(प्रायेणायम् 'आङ्'-पूर्वः—आचष्टे धर्मं धीरः।)

लट्।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	चष्टे	चक्षाते	चक्षते
मध्यमपुरुष	चक्षे	चक्षाथे	चड्ढ्वे
उत्तमपुरुष	चक्षे	चक्ष्वहे	चक्ष्महे

लोट्।

प्रथमपुरुष	चष्टाम्	चक्षाताम्	चक्षताम्
मध्यमपुरुष	चक्ष्व	चक्षाथाम्	चड्ढ्वम्
उत्तमपुरुष	चक्षै	चक्षावहै	चक्षामहै

लङ्।

प्रथमपुरुष	अचष्ट	अचक्षाताम्	अचक्षत
मध्यमपुरुष	अचष्ठाः	अचक्षाथाम्	अचड्ढ्वम्
उत्तमपुरुष	अचक्षि	अचक्ष्वहि	अचक्ष्महि

विधिलिङ्।

प्रथमपुरुष	चक्षीत	चक्षीयाताम्	चक्षीरन्
मध्यमपुरुष	चक्षीथाः	चक्षीयाथाम्	चक्षीध्वम्

	एकवचन	द्विवचन	बहुवचन
उत्तमपुरुष	चक्षीय	चक्षीवहि	चक्षीमहि

लृट्—ख्यास्यति, ख्यास्यते ; क्शास्यति, क्शास्यते ।

प्रति + आ + चक्ष्—प्रत्याख्याने, अस्वीकारे । वि + आ + चक्ष्—व्याख्याने, विवरणे । प्र, परि + चक्ष्—कीर्त्तने, कथने ।

*　　*　　*　　*

ईड् स्तुतौ—स्तव करना To praise—(लट्) ईट्टे, ईडाते, ईडते ; ईडिषे, ईडाथे, ईडिध्वे ; ईडे, ईडिवहे, ईडिमहे । (लृट्) ईडिष्यते । "तं संसारध्वान्तविनाशं हरिमीडे" शङ्करः ।

ईश् ऐश्वर्य्ये (प्रभुतायाम्)—प्रभु होना, प्रभुत्व करना, हुकूमत करना To rule, be master of, govern, command—(लट्) ईष्टे, ईशाते, ईशते ; ईशिषे, ईशाथे, ईशिध्वे ; ईशे, ईश्वहे, ईश्महे । (लङ्) ऐष्ट, ऐशाताम्, ऐशत ; ऐष्ठाः, ऐशाथाम्, ऐशिध्वम् ; ऐशि, ऐश्वहि, ऐश्महि । (विधि) ईशीत । (लृट्) ईशिष्यते । प्रायः षष्ठीके साथ प्रयुक्त होता है ; "नायं गात्राणामीष्टे" काद० ; "अर्थानामीशिषे त्वं, वयमपि च गिरामीश्महे यावदर्थम्" भर्त्तृ० ।—(२) सामर्थ्ये (सकना) ; "माधुर्य्यमीष्टे हरिणान् ग्रहीतुम्" र० १८. १३ ; "न तव सोढुमीशे" र० १४. ३८ ; "कमिवेशते रमयितुं न गुणाः ?" भा० ६. २४. ।

वस् आच्छादने (परिधाने)—पहरना To put on—वस्ते, वसाते, वसते ; वस्से, वसाथे, वध्वे ; वसे, वस्वहे, वस्महे । वसिष्यते । "वसने परिधूसरे वसाना" शकु० ७. २१. ।

आङ्+शास् (शाङ) इच्छायाम्; आशिषि (इष्टार्थाशंसने) च—(१) चाहना; (२) आशीर्वाद करना To desire; to bless, pronounce or give a blessing—(लट्) आशास्ते, आशासाते, आशासते; आशास्से, आशासाथे, आशाध्वे; आशासे, आशास्वहे, आशास्महे। (लृट्) आशासिष्यते। (१) कुतस्तस्य विजयादन्यत्, यस्य भगवान् पुराणपुरुषो नारायणः स्वयं मङ्गलान्याशास्ते ?" वेणी० ६; (२) "किमन्यदाशास्महे ? केवलं वीरप्रसवा भूयाः" उत्तर० १.।

(ह्नुङ्) अपनयने (अपह्नवे, गोपने;—चौर्य्यं इति बोपदेवः)—(१) दूर करना; अपहरण करना; (२) छिपाना To take away, deprive (one) of; to conceal, hide—ह्नुते, ह्नुवाते, ह्नुवते; ह्नोष्यते। प्रायेण 'अप'-पूर्वकः, 'नि'-पूर्वकश्चायं प्रयुज्यते।

अप+ह्नु—अपलापे, अस्वीकारे, गोपने। नि+ह्नु—गोपने।

अदादि अकर्मक आत्मनेपदी।

आस् उपवेशने (वासे; स्थितौ; सत्तायाम्)—
(१) बैठना; (२) रहना To sit; to dwell; to remain; to exist.
((१) आस्ते सिंहासने नृपः; (२) "यत्रास्मै रोचते, तत्रायमास्ताम्" काद०; "जगन्ति यस्यां सविकाशमासत" माघ० १. २३; आकाशमास्ते।)

लट् ।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	आस्ते	आसाते	आसते
मध्यमपुरुष	आस्से	आसाथे	आद्ध्वे, आध्वे
उत्तमपुरुष	आसे	आस्वहे	आस्महे

लोट् ।

प्रथमपुरुष	आस्ताम्	आसाताम्	आसताम्
मध्यमपुरुष	आस्स्व	आसाथाम्	आद्ध्वम्, आध्वम्
उत्तमपुरुष	आसै	आसावहै	आसामहै

लङ् ।

प्रथमपुरुष	आस्त	आसाताम्	आसत
मध्यमपुरुष	आस्थाः	आसाथाम्	आद्ध्वम्, आध्वम्
उत्तमपुरुष	आसि	आस्वहि	आस्महि

विधिलिङ् ।

प्रथमपुरुष	आसीत	आसीयाताम्	आसीरन्
मध्यमपुरुष	आसीथाः	आसीयाथाम्	आसीध्वम्
उत्तमपुरुष	आसीय	आसीवहि	आसीमहि

लृट्—आसिष्यते, आसिष्येते, आसिष्यन्ते ।

❀ अधि + आस्—उपवेशने ; अधिवासे, अधिष्ठाने च ; सकर्मक । अनु + आस्—पश्चादुपवेशने ; उपासनायाञ्च ; सकर्मक । उत् + आस्—उदासीनतायाम्, उपेक्षायाम् । उप + आस्—समीपोपवेशने ; उपासनायाम् ; अनुष्ठाने च—"अग्निहोत्रमुपासते" मनु० ११. ४२. । परि +

दय+आम्–सेवायाम्।

शी (शीङ्) स्वप्ने (शयने)—सोना

To lie down, sleep.

("किं निःशङ्कं शेषे ?
शेषे वयसः समागतो मृत्युः।
अथवा सुखं शयीथा
निकटे जागर्त्ति जाह्नवी जननी ॥"
भामिनी० ४. ३०।)

लट्।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	शेते	शयाते	शेरते
मध्यमपुरुष	शेषे	शयाथे	शेध्वे
उत्तमपुरुष	शये	शेवहे	शेमहे

लोट्।

प्रथमपुरुष	शेताम्	शयाताम्	शेरताम्
मध्यमपुरुष	शेष्व	शयाथाम्	शेध्वम्
उत्तमपुरुष	शयै	शयावहै	शयामहै

लङ्।

प्रथमपुरुष	अशेत	अशयाताम्	अशेरत
मध्यमपुरुष	अशेथाः	अशयाथाम्	अशेध्वम्
उत्तमपुरुष	अशयि	अशेवहि	अशेमहि

विधिलिङ् ।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	शयीत	शयीयाताम्	शयीरन्
मध्यमपुरुष	शयीथाः	शयीयाथाम्	शयीध्वम्
उत्तमपुरुष	शयीय	शयीवहि	शयीमहि

लृट्—शयिष्यते, शयिष्येते, शयिष्यन्ते ।

❀ अति + शी—अतिक्रमे, अतिवर्त्तने ; सकर्मक । अधि + शी—अधिष्ठाने (सक०) । अनु + शी—अनुशये, अनुतापे (सक०) । सम् + शी—संशये । ❀

अदादि सकर्मक उभयपदी ।

स्तु (ष्टुञ्) स्तुतौ (प्रशंसायाम्)—स्तव करना

To praise, extol, glorify.

("किं निन्दाम्यथवा स्तवानि कथय क्षीरार्णव !
त्वामहम्" भामिनी० १. ४०. ।)

(परस्मैपद)

लट् ।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	स्तौति, स्तवीति	स्तुतः	स्तुवन्ति
मध्यमपुरुष	स्तौषि, स्तवीषि	स्तुथः	स्तुथ
उत्तमपुरुष	स्तौमि, स्तवीमि	स्तुवः	स्तुमः

लोट् ।

प्रथमपुरुष	स्तौतु, स्तवीतु	स्तुताम्	स्तुवन्तु

	एकवचन	द्विवचन	बहुवचन
मध्यमपुरुष	स्तुहि	स्तुतम्	स्तुत
उत्तमपुरुष	स्तवानि	स्तवाव	स्तवाम

लङ् ।

प्रथमपुरुष	अस्तौत्, अस्तवीत्	अस्तुताम्	अस्तुवन्
मध्यमपुरुष	अस्तौः, अस्तवीः	अस्तुतम्	अस्तुत
उत्तमपुरुष	अस्तवम्	अस्तुव	अस्तुम

विधिलिङ् ।

प्रथमपुरुष	स्तुयात्	स्तुयाताम्	स्तुयुः
मध्यमपुरुष	स्तुयाः	स्तुयातम्	स्तुयात
उत्तमपुरुष	स्तुयाम्	स्तुयाव	स्तुयाम

लृट्—स्तोष्यति ।

(आत्मनेपद)

लट् ।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	स्तुते	स्तुवाते	स्तुवते
मध्यमपुरुष	स्तुषे	स्तुवाथे	स्तुध्वे
उत्तमपुरुष	स्तुवे	स्तुवहे	स्तुमहे

लोट् ।

प्रथमपुरुष	स्तुताम्	स्तुवाताम्	स्तुवताम्
मध्यमपुरुष	स्तुष्व	स्तुवाथाम्	स्तुध्वम्
उत्तमपुरुष	स्तवै	स्तवावहै	स्तवामहै

लङ् ।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	अस्तुत	अस्तुवाताम्	अस्तुवत
मध्यमपुरुष	अस्तुथाः	अस्तुवाथाम्	अस्तुध्वम्
उत्तमपुरुष	अस्तुवि	अस्तुवहि	अस्तुमहि

विधिलिङ् ।

प्रथमपुरुष	स्तुवीत	स्तुवीयाताम्	स्तुवीरन्
मध्यमपुरुष	स्तुवीथाः	स्तुवीयाथाम्	स्तुवीध्वम्
उत्तमपुरुष	स्तुवीय	स्तुवीवहि	स्तुवीमहि

लृट्—स्तोस्यते, स्तोष्येते, स्तोष्यन्ते ।

❀ प्र+स्तु—प्रस्तावे, प्रारम्भे । ❀

ब्रू (ब्रूञ्) कथने—बोलना To tell ; to declare.

("ब्रुवते हि फलेन साधवो न तु कण्ठेन निजो-

पयोगिताम् ।" नै० २. ४८. ।)

(परस्मैपद)

लट् ।

प्रथमपुरुष	ब्रवीति, आह*	ब्रूतः, आहतुः	ब्रुवन्ति, आहुः
मध्यमपुरुष	ब्रवीषि, आत्थ	ब्रूथः, आहथुः	ब्रूथ
उत्तमपुरुष	ब्रवीमि	ब्रूवः	ब्रूमः

* शिष्टप्रयोगमे 'आह'-पद अतीतकालमे प्रयुक्त होता है ; यथा—"अथाह वर्णी" (आह—उवाच इत्यर्थः) कु० ५. ६५.—अत्र टीकायाम् "आहेति भूतार्थे 'लट्'-प्रयोगो भ्रान्तिमूल इत्याह वामनः" इति मल्लिनाथः ।

लोट्।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	ब्रवीतु	ब्रूताम्	ब्रुवन्तु
मध्यमपुरुष	ब्रूहि	ब्रूतम्	ब्रूत
उत्तमपुरुष	ब्रवाणि	ब्रवाव	ब्रवाम

लङ्।

प्रथमपुरुष	अब्रवीत्	अब्रूताम्	अब्रुवन्
मध्यमपुरुष	अब्रवीः	अब्रूतम्	अब्रूत
उत्तमपुरुष	अब्रवम्	अब्रूव	अब्रूम

विधिलिङ्।

प्रथमपुरुष	ब्रूयात्	ब्रूयाताम्	ब्रूयुः
मध्यमपुरुष	ब्रूयाः	ब्रूयातम्	ब्रूयात
उत्तमपुरुष	ब्रूयाम्	ब्रूयाव	ब्रूयाम

लृट्—वक्ष्यति।

(आत्मनेपद)

लट्।

प्रथमपुरुष	ब्रूते	ब्रुवाते	ब्रुवते
मध्यमपुरुष	ब्रूषे	ब्रुवाथे	ब्रूध्वे
उत्तमपुरुष	ब्रुवे	ब्रूवहे	ब्रूमहे

लोट्।

प्रथमपुरुष	ब्रूताम्	ब्रुवाताम्	ब्रुवताम्
मध्यमपुरुष	ब्रूष्व	ब्रुवाथाम्	ब्रूध्वम्

	एकवचन	द्विवचन	बहुवचन
उत्तमपुरुष	ब्रवै	ब्रवावहै	ब्रवामहै

लङ् ।

प्रथमपुरुष	अब्रूत	अब्रुवाताम्	अब्रुवत
मध्यमपुरुष	अब्रूथाः	अब्रुवाथाम्	अब्रूध्वम्
उत्तमपुरुष	अब्रवि	अब्रूवहि	अब्रूमहि

विधिलिङ् ।

प्रथमपुरुष	ब्रुवीत	ब्रुवीयाताम्	ब्रुवीरन्
मध्यमपुरुष	ब्रुवीथाः	ब्रुवीयाथाम्	ब्रुवीध्वम्
उत्तमपुरुष	ब्रुवीय	ब्रुवीवहि	ब्रुवीमहि

लृट्—वक्ष्यते ।

दुह् प्रपूरणे (दोहने, निष्कासने)—(१) दोहना, निकालना ; (२) पूर्ण करना To milk or squeeze out, extract ; to yield or grant (any desired object).

((१) द्विकर्मक—"पयो घटोध्नीरपि गा दुहन्ति" भ० १२. ७३ ; "रत्नानि धरित्रीं दुदुहुः" कु० १. २ ; (२) "कामान् दुग्धे सूनृता वाक्" ।)

(परस्मैपद)

लट् ।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	दोग्धि	दुग्धः	दुहन्ति

	एकवचन	द्विवचन	बहुवचन
मध्यमपुरुष	धोक्षि	दुग्धः	दुग्ध
उत्तमपुरुष	दोह्मि	दुह्वः	दुह्मः

लोट्।

प्रथमपुरुष	दोग्धु	दुग्धाम्	दुहन्तु
मध्यमपुरुष	दुग्धि	दुग्धम्	दुग्ध
उत्तमपुरुष	दोहानि	दोहाव	दोहाम

लङ्।

प्रथमपुरुष	अधोक्	अदुग्धाम्	अदुहन्
मध्यमपुरुष	अधोक्	अदुग्धम्	अदुग्ध
उत्तमपुरुष	अदोहम्	अदुह्व	अदुह्म

विधिलिङ्—दुह्यात्। लृट्—धोक्ष्यति।

(आत्मनेपद)

लट्।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	दुग्धे	दुहाते	दुहते
मध्यमपुरुष	धुक्षे	दुहाथे	धुग्ध्वे
उत्तमपुरुष	दुहे	दुह्वहे	दुह्महे

लोट्।

प्रथमपुरुष	दुग्धाम्	दुहाताम्	दुहताम्
मध्यमपुरुष	धुक्ष्व	दुहाथाम्	धुग्ध्वम्
उत्तमपुरुष	दोहै	दोहावहै	दोहामहै

लङ् ।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	अदुग्ध	अदुहाताम्	अदुहत
मध्यमपुरुष	अदुग्धाः	अदुहाथाम्	अधुग्ध्वम्
उत्तमपुरुष	अदुहि	अदुह्वहि	अदुह्महि

विधिलिङ् ।

प्रथमपुरुष	दुहीत	दुहीयाताम्	दुहीरन्
मध्यमपुरुष	दुहीथाः	दुहीयाथाम्	दुहीध्वम्
उत्तमपुरुष	दुहीय	दुहीवहि	दुहीमहि

लृट्—धोक्ष्यते ।

दिह् लेपने ; उपचये (वृद्धौ ; वृद्धिकरणे) च—(१) लीपना ; (२) बढ़ना (अक०) ; बढ़ाना To anoint, smear ; to increase—देग्धि, दिग्धे ; धेक्ष्यति, धेक्ष्यते । (१) देग्धि सौधं सुधया लेपकः ; (२) देग्धि दिग्धे देहः (प्रतिदिनमुपचितः स्यात्) ।

सम्+दिह्—सन्देहे, संशये ।

लिह् आस्वादने (लेहने)—चाटना To taste, to lick.

("पिण्डमुत्सृज्य करं लेढि" इति न्यायः ।)

(परस्मैपद)

लट् ।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	लेढि	लीढः	लिहन्ति
मध्यमपुरुष	लेक्षि	लीढः	लीढ

	एकवचन	द्विवचन	बहुवचन
उत्तमपुरुष	लेह्मि	लिह्वः	लिह्मः

लोट्।

प्रथमपुरुष	लेढु	लीढाम्	लिहन्तु
मध्यमपुरुष	लीढि	लीढम्	लीढ
उत्तमपुरुष	लेहानि	लेहाव	लेहाम

लङ्।

प्रथमपुरुष	अलेट्	अलीढाम्	अलिहन्
मध्यमपुरुष	अलेट्	अलीढम्	अलीढ
उत्तमपुरुष	अलेहम्	अलिह्व	अलिह्म

विधिलिङ्—लिह्यात्। लृट्—लेक्ष्यति।

(आत्मनेपद)

लट्।

प्रथमपुरुष	लीढे	लिहाते	लिहते
मध्यमपुरुष	लिक्षे	लिहाथे	लीढ्वे
उत्तमपुरुष	लिहे	लिह्वहे	लिह्महे

लोट्।

प्रथमपुरुष	लीढाम्	लिहाताम्	लिहताम्
मध्यमपुरुष	लिक्ष्व	लिहाथाम्	लीढ्वम्
उत्तमपुरुष	लेहै	लेहावहै	लेहामहै

लङ्।

प्रथमपुरुष	अलीढ	अलिहाताम्	अलिहत

	एकवचन	द्विवचन	बहुवचन
मध्यमपुरुष	अलीढाः	अलिह्वाथाम्	अलीढ्वम्
उत्तमपुरुष	अलिहि	अलिह्वहि	अलिह्महि

विधिलिङ् ।

प्रथमपुरुष	लिहीत	लिहीयाताम्	लिहीरन्
मध्यमपुरुष	लिहीथाः	लिहीयाथाम्	लिहीध्वम्
उत्तमपुरुष	लिहीय	लिहीवहि	लिहीमहि

लृट्—लेक्ष्यते ।

अनुवाद करो—विपद् सम्पद्मे ईश्वर सर्वदा रक्षा करता है, और वह सबके पाप-पुण्यकी (द्वितीया) संख्या करता है । दक्षिणसे मलय-पवन आता है । मेरे शरीरमे आनन्द नहीं समाता । वृक्षकी शाखामे चिड़ियां रव करती थीं । आओ, हमलोग ईश्वरकी (द्वितीया) स्तुति करें ।

ह्वादि ।

क्रियाघटन-सूत्र ।

[इस प्रकरणमे यथासम्भव पूर्व पूर्व प्रकरणोंके स्टार (*)-चिह्नित सूत्रोंका कार्य्य होगा ।]

३४१ । चतुर्लकार परे रहनेसे, कर्त्तृवाच्यमे ह्वादिगणीय धातु अभ्यस्त (द्विरुक्त) होता है ; और अभ्यस्त होकर, हु—जुहु, भी—बिभी, भृ—बिभृ, हा—जहा, ह्री—जिह्री, दा—ददा, धा—दधा, निज्—नेनिज् और विज्—वेविज् होता है; यथा—हु + ति = जुहु + ति = जुहोति (३२२सू०) ।

३४२। अगुण स्वर परे रहनेसे, 'हु' धातुके उकारके स्थानमे 'व्' होता है; और 'हु' धातुके परस्थित 'हि' के स्थानमे 'धि' होता है; यथा—जुहु + अन्ति = जुह्वति (३२९ सू०); जुहु + हि = जुहुधि।

३४३। लट् आदिका अगुण व्यञ्जनवर्ण परे रहनेसे, परस्मैपदी अभ्यस्त 'हा' और 'भी' धातुके अन्तमे विकल्पसे 'इ' होता है; यथा—बिभी + तः = बिभितः, (पक्षे) बिभीतः; जहा + तः = जहितः, (पक्षे)—

३४४। अगुण स्वर परे रहनेसे, अभ्यस्त आकारान्त धातुके आकारका लोप होता है; और व्यञ्जनवर्ण परे रहनेसे, आकारके स्थानमे 'ई' होता है; परन्तु 'दा' और 'धा' धातुका आ—ई नहीं होता; यथा—जहीतः; (अगुण स्वर) जहा + अन्ति = जहति।

३४५। * अगुण स्वर परे रहनेसे, अनेकस्वरविशिष्ट धातुके 'इ' 'ई' के स्थानमे 'य्' होता है; यथा—बिभी + अन्ति = बिभ्यति; जिह्री + अन्ति = जिह्रियति (३३२ सूत्रानुसार 'इय्')।

३४६। विधिलिङ्का 'य' परे रहनेसे, परस्मैपदी 'हा' धातुके अन्त्य आकारका लोप होता है; और 'हि' परे हा—जहा, जहि तथा जही होता है।

३४७। स, ध, त और थ परे रहनेसे, दधा—धद्, और ददा—दद् होता है; और 'हि' परे रहनेसे, ददा—दे, और दधा—धे होता है; यथा—दधा + ते = धत्ते; ददा + ते = दत्ते; दधा + हि = धेहि; ददा + हि = देहि।

३४८। लट्-आदिका सगुण स्वर परे रहनेसे, अभ्यस्त (द्विरुक्त) धातुकी उपधाका गुण नहीं होता; यथा—नेनिज् + आनि = नेनिजानि।

२४९। चतुर्लकार परे रहनेसे, कर्त्तृवाच्यमे मा—मिमा, और आत्मनेपदी हा—जिहा होता है।

ह्वादि सकर्मक परस्मैपदी धातु।

हु दाने (प्रक्षेपे, वैधे आधारे देवतोद्देश्यकहविस्त्यागे, होमे)—हवन करना To offer or present (as an oblation to fire), sacrifice.

(जुहोति घृतमग्नौ कृष्णाय होता ; "जटाधरः सन् जुहुधीह पावकम्" भा० १. ४४.।)

लट्।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	जुहोति	जुहुतः	जुह्वति
मध्यमपुरुष	जुहोषि	जुहुथः	जुहुथ
उत्तमपुरुष	जुहोमि	जुहुवः	जुहुमः

लोट्।

प्रथमपुरुष	जुहोतु	जुहुताम्	जुह्वतु
मध्यमपुरुष	जुहुधि	जुहुतम्	जुहुत
उत्तमपुरुष	जुहवानि	जुहवाव	जुहवाम

लङ्।

प्रथमपुरुष	अजुहोत्	अजुहुताम्	अजुहवुः
मध्यमपुरुष	अजुहोः	अजुहुतम्	अजुहुत
उत्तमपुरुष	अजुहवम्	अजुहुव	अजुहुम

विधिलिङ्।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	जुहुयात्	जुहुयाताम्	जुहुयुः
मध्यमपुरुष	जुहुयाः	जुहुयातम्	जुहुयात
उत्तमपुरुष	जुहुयाम्	जुहुयाव	जुहुयाम

लृट्—होष्यति।

हा (ओहाक्) त्यागे—छोड़ना To leave, abandon.

("मूढ़ ! जहीहि धनागमतृष्णाम्" मोहमुद्गरः ।)

लट्।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	जहाति	जहितः, जहीतः	जहति
मध्यमपुरुष	जहासि	जहिथः	जहिथ
उत्तमपुरुष	जहामि	जहिवः	जहिमः

लोट्।

प्रथमपुरुष	जहातु	जहिताम्	जहतु
मध्यमपुरुष	जहिहि जहीहि जहाहि	जहितम्	जहित
उत्तमपुरुष	जहानि	जहाव	जहाम

लङ्।

प्रथमपुरुष	अजहात्	अजहिताम्	अजहुः
मध्यमपुरुष	अजहाः	अजहितम्	अजहित

	एकवचन	द्विवचन	बहुवचन
उत्तमपुरुष	अजहाम्	अजहिव	अजहिम

विधिलिङ्—जह्यात् । लृट्—हास्यति ।

❦ कर्मकर्त्तरि—न्यूनीभावे ; हीयते ; "हीयते हि मतिस्तात ! हीनैः सह समागमात्" हितो० ४२. । ❦

ह्वादि अकर्मक परस्मैपदी धातु ।

भी (ञिभी) भये—डरना To fear, to be afraid of.

("मृत्योर्बिभेषि किं बाल ! न स भीतं विमुञ्चति" ।)

लट् ।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	बिभेति	बिभीतः*	बिभ्यति
मध्यमपुरुष	बिभेषि	बिभीथः	बिभीथ
उत्तमपुरुष	बिभेमि	बिभीवः	बिभीमः

लोट् ।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	बिभेतु	बिभीताम्	बिभ्यतु
मध्यमपुरुष	बिभीहि	बिभीतम्	बिभीत
उत्तमपुरुष	बिभयानि	बिभयाव	बिभयाम

लङ् ।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	अबिभेत्	अबिभीताम्	अबिभयुः
मध्यमपुरुष	अबिभेः	अबिभीतम्	अबिभीत

* अगुण व्यञ्जनवर्ण परे रहनेसे, 'भी'-धातुके इकारके स्थानमें विकल्पसे ह्रस्व इकार होता है ; यथा—बिभीतः, बिभितः ।

	एकवचन	द्विवचन	बहुवचन
उत्तमपुरुष	अविभयम्	अविभीव	अविभीम

विधिलिङ्।

प्रथमपुरुष	बिभीयात्	बिभीयाताम्	बिभीयुः
मध्यमपुरुष	बिभीयाः	बिभीयातम्	बिभीयात
उत्तमपुरुष	बिभीयाम्	बिभीयाव	बिभीयाम

लृट्—भेष्यति।

ह्री लज्जायाम्—शर्मिन्दा होना To blush, to be ashamed.

(स्वयम् अथवा पञ्चमी षष्ठीके साथ प्रयुक्त होता है ; "जिह्रेम्यार्य्यपुत्रेण सह गुरुसमीपं गन्तुम्" शकु० ७ ; 'जिह्रेति नीचसङ्गेभ्यः'; "अन्योन्यस्यापि जिह्रीमः, किं पुनः सहवासिनाम्" मा० ११. ८८.।)

लट्।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	जिह्रेति	जिह्रीतः	जिह्रियति
मध्यमपुरुष	जिह्रेषि	जिह्रीथः	जिह्रीथ
उत्तमपुरुष	जिह्रेमि	जिह्रीवः	जिह्रीमः

लोट्।

प्रथमपुरुष	जिह्रेतु	जिह्रीताम्	जिह्रियतु
मध्यमपुरुष	जिह्रीहि	जिह्रीतम्	जिह्रीत
उत्तमपुरुष	जिह्रयाणि	जिह्रयाव	जिह्रयाम

लङ्।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	अजिहेत्	अजिहीताम्	अजिहयुः
मध्यमपुरुष	अजिहेः	अजिहीतम्	अजिहीत
उत्तमपुरुष	अजिहयम्	अजिहीव	अजिहीम

विधिलिङ्—जिहीयात्। लृट्—हेष्यति।

ह्रादि सकर्मक आत्मनेपदी धातु।

मा माने—मापना, नापना To measure.

("न्यधित मिमान इवावनि पदानि" माघ० ७. १२ ;

"पुरः सखीनाममिमीत लोचने" कु० ५.५१. ।)

लट्।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	मिमीते	मिमाते	मिमते
मध्यमपुरुष	मिमीषे	मिमाथे	मिमीध्वे
उत्तमपुरुष	मिमे	मिमीवहे	मिमीमहे

लोट्।

प्रथमपुरुष	मिमीताम्	मिमाताम्	मिमताम्
मध्यमपुरुष	मिमीष्व	मिमाथाम्	मिमीध्वम्
उत्तमपुरुष	मिमै	मिमावहै	मिमामहै

लङ्।

प्रथमपुरुष	अमिमीत	अमिमाताम्	अमिमत
मध्यमपुरुष	अमिमीथाः	अमिमाथाम्	अमिमीध्वम्

	एकवचन	द्विवचन	बहुवचन
उत्तमपुरुष	अमिमि	अमिमीवहि	अमिमीमहि

विधिलिङ्।

प्रथमपुरुष	मिमीत	मिमीयाताम्	मिमीरन्
मध्यमपुरुष	मिमीथाः	मिमीयाथाम्	मिमीध्वम्
उत्तमपुरुष	मिमीय	मिमीवहि	मिमीमहि

लृट्—मास्यते।

❁ अनु+मा—अनुमाने ; "अलिङ्गां प्रकृतिं त्वाहुर्लिङ्गैरनुमिमीमहे" महाभा०। उप+मा—उपमाने। निर्+मा—निर्माणे ; "सृष्टिस्थिति-विलयमजः स्वेच्छया निर्मिमीते" महाना० १. १.। परि+मा—परि-माणे। प्र+मा—निश्चयज्ञाने ; "न परोपहितं न च स्वतः प्रमिमीतेऽनुभवादृतेऽल्पधी." माघ० १६. ४०.। ❁

हा (ओहाङ्) गतौ—जाना To go, move.

("जिहीते सज्जनाश्रयम्"।)

लट्।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	जिहीते	जिहाते	जिहते
मध्यमपुरुष	जिहीषे	जिहाथे	जिहीध्वे
उत्तमपुरुष	जिहे	जिहीवहे	जिहीमहे

लोट्।

प्रथमपुरुष	जिहीताम्	जिहाताम्	जिहताम्
मध्यमपुरुष	जिहीष्व	जिहाथाम्	जिहीध्वम्

	एकवचन	द्विवचन	बहुवचन
उत्तमपुरुष	जिहै	जिहावहै	जिहामहै

लङ्।

प्रथमपुरुष	अजिहीत	अजिहाताम्	अजिहत
मध्यमपुरुष	अजिहीथाः	अजिहाथाम्	अजिहीध्वम्
उत्तमपुरुष	अजिहि	अजिहीवहि	अजिहीमहि

विधिलिङ—जिहीत, जिहीयाताम्, जिहीरन्।

लृट्—हास्यते।

⚜ उप+हा—आगमने; उपाजिहीथा न महीतलं यदि" माघ० १.३७.। उत्+हा—उदये; "उज्जिहीते हिमांशुः" महाना० ४.३९; अपगमे च; "उज्जिहानजीविताम्" मालती० १०.। ⚜

ह्वादि सकर्मक उभयपदी धातु।

भृ (डुभृञ्) धारणे; पोषणे च—(१) धारण करना; (२) पोषण करना To bear; to maintain.

((१) "कूर्मो बिभर्त्ति धरणीं खलु पृष्ठकेन" चौरपञ्चाशिका. ५०;. (२) साध्वीं भार्य्यां बिभृयात्" मनु० ९. ९९.।)

(परस्मैपद)

लट्।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	बिभर्त्ति	बिभृतः	बिभ्रति
मध्यमपुरुष	बिभर्षि	बिभृथः	बिभृथ
उत्तमपुरुष	बिभर्मि	बिभृवः	बिभृमः

लोट्।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	बिभर्त्तु	बिभृताम्	बिभ्रतु
मध्यमपुरुष	बिभृहि	बिभृतम्	बिभृत
उत्तमपुरुष	बिभराणि	बिभराव	बिभराम

लङ्।

प्रथमपुरुष	अबिभः	अबिभृताम्	अबिभरुः
मध्यमपुरुष	अबिभः	अबिभृतम्	अबिभृत
उत्तमपुरुष	अबिभरम्	अबिभृव	अबिभृम

विधिलिङ्—बिभृयात्, बिभृयाताम्, बिभृयुः।

लृट्—भरिष्यति।

(आत्मनेपद)

लट्।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	बिभृते	बिभ्राते	बिभ्रते
मध्यमपुरुष	बिभृषे	बिभ्राथे	बिभृध्वे
उत्तमपुरुष	बिभ्रे	बिभृवहे	बिभृमहे

लोट्।

प्रथमपुरुष	बिभृताम्	बिभ्राताम्	बिभ्रताम्
मध्यमपुरुष	बिभृष्व	बिभ्राथाम्	बिभृध्वम्
उत्तमपुरुष	बिभरै	बिभरावहै	बिभरामहै

लङ्।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	अबिभृत	अबिभ्राताम्	अबिभ्रत
मध्यमपुरुष	अबिभृथाः	अबिभ्राथाम्	अबिभृध्वम्
उत्तमपुरुष	अबिभ्रि	अबिभृवहि	अबिभृमहि

विधिलिङ्—बिभ्रीत, बिभ्रीयाताम्, बिभ्रीरन्।

लृट्—भरिष्यते।

समृ+भृ—सञ्चये, संग्रहे ; निष्पादने ; उत्पादने च।

दा (डुदाञ्) दाने—देना To give.

("अवकाशं किलोदन्वान् रामायाभ्यर्थितो ददौ" र० ४. ५८ ;

"कथमस्य स्तनं दास्ये ?" हरिवंशम्।)

(परस्मैपद)

लट्।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	ददाति	दत्तः	ददति
मध्यमपुरुष	ददासि	दत्थः	दत्थ
उत्तमपुरुष	ददामि	दद्वः	दद्मः

लोट्।

प्रथमपुरुष	ददातु	दत्ताम्	ददतु
मध्यमपुरुष	देहि	दत्तम्	दत्त
उत्तमपुरुष	ददानि	ददाव	ददाम

लङ्।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	अददात्	अदत्ताम्	अददुः
मध्यमपुरुष	अददाः	अदत्तम्	अदत्त
उत्तमपुरुष	अददाम्	अदद्व	अदद्म

विधिलिङ्—दद्यात्, दद्याताम्, दद्युः।

लृट्—दास्यति।

(आत्मनेपद)

लट्।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	दत्ते	ददाते	ददते
मध्यमपुरुष	दत्से	ददाथे	दद्ध्वे
उत्तमपुरुष	ददे	दद्वहे	दद्महे

लोट्।

प्रथमपुरुष	दत्ताम्	ददाताम्	ददताम्
मध्यमपुरुष	दत्स्व	ददाथाम्	दद्ध्वम्
उत्तमपुरुष	ददै	ददावहै	ददामहै

लङ्।

प्रथमपुरुष	अदत्त	अददाताम्	अददत
मध्यमपुरुष	अदत्थाः	अददाथाम्	अदद्ध्वम्
उत्तमपुरुष	अददि	अदद्वहि	अदद्महि

विधिलिङ्—ददीत, ददीयाताम्, ददीरन्।

लृट्—दास्यते।

❀ आ+दा, उप+आ+दा—ग्रहणे, स्वीकरणे ; आत्मनेपदी। वि+आ+दा—व्यादाने, प्रसारणे। प्र+दा—प्रदाने। सम्+प्र+दा—सम्प्रदाने, समन्त्रकत्यागे। ❀

धा (डुधाञ्) (१) धारणे ; (२) पोषणे च To hold up, sustain ; to maintain.

((१) "शिरसि मसीपटलं दधाति दीपः" भामिनी० १. ७४ ; (२) "सम्पद्विनिमयेनोभौ दधतुर्भुवनद्वयम्" र० १. २६. ।—(३) स्थापने To put, place ; "विज्ञातदोषेषु दधाति दण्डम्" महाभा० ; "धत्ते चक्षुर्मुकुलिनि रणत्कोकिले बालचूते" मालती० ३. १२ ; "धर्मे दध्यान्मनः" मनु० १२. २३ ;—(४) दाने To bestow anything upon one ; "धुर्य्यां लक्ष्मीमथ मयि भृशं धेहि देव ! प्रसीद" मालती० १.९. ।)

(परस्मैपद)

लट्।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	दधाति	धत्तः	दधति
मध्यमपुरुष	दधासि	धत्थः	धत्थ
उत्तमपुरुष	दधामि	दध्वः	दध्मः

लोट्।

प्रथमपुरुष	दधातु	धत्ताम्	दधतु
मध्यमपुरुष	धेहि	धत्तम्	धत्त

	एकवचन	द्विवचन	बहुवचन
उत्तमपुरुष	दधानि	दधाव	दधाम

लङ्।

प्रथमपुरुष	अदधात्	अधत्ताम्	अदधुः
मध्यमपुरुष	अदधाः	अधत्तम्	अधत्त
उत्तमपुरुष	अदधाम्	अदध्व	अदध्म

विधिलिङ्—दध्यात्, दध्याताम्, दध्युः।

लृट्—धास्यति।

(आत्मनेपद)

लट्।

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	धत्ते	दधाते	दधते
मध्यमपुरुष	धत्से	दधाथे	धद्ध्वे
उत्तमपुरुष	दधे	दध्वहे	दध्महे

लोट्।

प्रथमपुरुष	धत्ताम्	दधाताम्	दधताम्
मध्यमपुरुष	धत्स्व	दधाथाम्	धद्ध्वम्
उत्तमपुरुष	दधै	दधावहै	दधामहै

लङ्।

प्रथमपुरुष	अधत्त	अदधाताम्	अदधत
मध्यमपुरुष	अधत्थाः	अदधाथाम्	अधद्ध्वम्
उत्तमपुरुष	अदधि	अदध्वहि	अदध्महि

विधिलिङ्—दधीत, दधीयाताम्, दधीरन् ।

लृट्—धास्यते ।

☞ अन्तर्+धा—अभ्यन्तरीकरणे, स्वीकरणे; "विश्वम्भरे देवि! मामन्तर्धातुमर्हसि" र० १९. ८१; आवरणे, आच्छादने; "पितुरन्तर्दधे कीर्त्तिं शीलवृत्तिसमाधिभिः" महाभा०; अन्तर्धाने च (छिप जाना, गायब होना, पोशीदा होना—अक०)—आत्मनेपदी (पञ्चमीके साथ); —कर्मकर्त्तरि; अन्तर्धीयते; "इषुभिर्व्यतिसर्पद्भिरादित्योऽन्तरधीयत" महाभा०; "रात्रिरादित्योदयेऽन्तर्धीयते" निरुक्तम्। तिरस्+धा—अन्तर्धाने। पुरस्+धा—पुरस्करणे, अग्रतः स्थापने। श्रत्+धा—श्रद्धायाम्, विश्वासे (द्वितीयान्त वस्तुके साथ); "कः श्रद्धास्यति भूतार्थम्?" मृच्छ० ३. २४.। अपि+धा—आच्छादने। अभि+धा—आख्याने, कथने। अव+धा—स्थापने; प्रणिधाने, मनःसंयोगे च; आत्मनेपदी। वि+अव+धा—व्यवधाने, अन्तरे। आ+धा—स्थापने; धारणे; अर्पणे; उत्पादने च। सम्+आ+धा—एकाग्रीकरणे; सिद्धान्ते, विरोधभञ्जने; प्रतिकारे च। उप+धा—स्थापने; उपधानीकरणे; प्रयोगे; अर्पणे च। नि+धा—स्थापने, न्यासे। प्र+नि+धा—स्थापने, अर्पणे; प्रसारणे च। सम्+नि+धा—स्थापने;—कर्मकर्त्तरि—उपस्थितौ; सन्निधीयते। परि+धा—परिधाने। वि+धा—करणे, अनुष्ठाने। अनु+वि+धा—अनुवर्त्तने। प्रति+वि+धा—प्रतिकारे। सम्+धा—संयोजने; मिलने, सौहार्दस्थापने; आरोपणे (वाणादीनां धनुषि); उत्पादने च। अति+सम्+धा—वञ्चने, प्रतारणे। अनु+सम्+धा—अन्वेषणे; चिन्तने, विचारणे; अनुसरणे च। अभि+सम्+धा—उद्देशे, अभिप्राये; वञ्चना-

याम्; वशीकरणे च। ✿

* * * *

निज् (णिजिर्) शौचे (निर्मलीकरणे)—धोना To wash, cleanse, purify—(लट्) नेनेक्ति, निनिक्तः, नेनिजति; नेनिक्ते, नेनिजाते, नेनिजते। (लोट्) नेनेक्तु; हि—नेनिग्धि; आनि—नेनिजानि। (लङ्) अनेनेक्, अनेनिक्ताम्, अनेनिजुः; अम्—अनेनिजम्; अनेनिक्त। (विधिलिङ्) नेनिज्यात्; नेनिजीत। (लृट्) नेक्ष्यति, नेक्ष्यते।

✿ अव+निज्—अवनेजने, प्रक्षालने। निर्+निज्—निर्णेजने, शोधने। ✿

विज् (विजिर्) पृथक्करणे—अलग करना To separate—इसके रूप 'निज्'-धातुवत्।

विष् (विष्लृ) व्याप्तौ—व्याप्त होना, फैलना To pervade—(लट्) वेवेष्टि, वेविष्टः, वेविषति; वेविष्टे। (हि) वेविड्ढि। (लङ्) अवेवेट्, अवेविष्टाम्, अवेविषुः; अम्—अवेविषम्; अवेविष्ट। (विधिलिङ्) वेविष्यात्; वेविषीत। (लृट्) वेक्ष्यति, वेक्ष्यते।

✿ परि+विष्+णिच्—परिवेषणे, अन्नाद्युपसमर्पणे (परोसना); वेष्टने च; परिवेषयति। ✿

अनुवाद करो—देवतालोग घृत भक्षण करते हैं। घृतसे अग्निमें हवन करो। ब्राह्मणोंको प्रतिदिन होम करना चाहिये। छोटे बड़े सब कोई दुष्टसे डरते हैं। देवतालोग असुरोंसे बड़े डरते थे। असत् कर्मका (द्वितीया) त्याग करो। मुझे दो वस्त्र दीजिये। उन्होंने मुझे ऐसा कहा है। अब कपड़े पहनो।

शत्रुके साथ सन्धि नहीं करना। अनन्तर वे अन्तर्हित हो गये। गुरु और शास्त्रके वाक्यमे श्रद्धा करनी चाहिये।

※ एक कालकी क्रिया समझानेसे, प्रथम, मध्यम, उत्तम— इन तीन पुरुषोंके बीचमे इसी क्रमसे परवर्त्ती पुरुषके अनुसार क्रियाका पुरुष, और समष्टि-सङ्ख्याके अनुसार क्रियाका वचन होगा; अर्थात् कर्त्ता—प्रथम और मध्यम पुरुष होनेसे मध्यम पुरुषके अनुसार, कर्त्ता—प्रथम और उत्तम पुरुष होनेसे उत्तम पुरुषके अनुसार, और कर्त्ता—प्रथम, मध्यम तथा उत्तम पुरुष होनेसे उत्तम पुरुषके अनुसार क्रिया होगी; यथा—(वह और तू जाओ) स त्वञ्च यातम्; (वह और मै जायें) स च अहञ्च यावः; (वह, तू और मै जायें) स त्वम् अहञ्च यामः।

कर्त्ता व्यस्तरूपसे अर्थात् अनियमसे विन्यस्त होनेपरभी इसी नियमानुसार क्रिया होगी; यथा—(तू और वह जाओ) त्वं स च यातम्; (मै और तू जायें) अहञ्च त्वञ्च यावः; (मै, तू और वह जायें) अहं त्वं स च यामः।*

---

* पुंलिङ्ग और स्त्रीलिङ्ग पदका एकही विशेषण होनेसे, वह पुंलिङ्ग होता है; और उनमे एकके अथवा दोनोंके साथ क्लीवलिङ्ग पद रहनेसे, उनका विशेषण क्लीवलिङ्ग होता है। यथा—महान्तौ वृक्षः शाखा च; महान्तो वृक्षः शाखा प्रशाखाश्च; महती वृक्षः पत्रञ्च; महान्ति वृक्षः शाखा पत्रञ्च। वृक्षः शाखा च पतितौ; वृक्षः फलञ्च पतिते; वृक्षः शाखा फलञ्च पतितानि।

क्लीवलिङ्गके स्थलमे विकल्पसे एकवचनान्त होता है। यथा—महत् वृक्षः पत्रञ्च; महत् वृक्षः शाखा पत्रञ्च।

अनुवाद करो—तू और मैं चन्द्र देखते हैं। राम, श्याम और मैं जायेंगे। तुम और वे क्यों नहीं आये? मैं, तू और वह कभी झूठ नहीं कहेंगे। तुम और वे काम क्यों नहीं करते? वे और हम खा चुके हैं।

☞ एक क्रिया और काल समझानेमे, हिन्दीमे व्यवहृत 'वा', 'अथवा', 'या' (or, either—or, neither—nor)—इन अव्ययोंके योगसे क्रियाके पास जो कर्त्ता रहता है, उसीके अनुसार क्रियाके पुरुष और वचन होते हैं, यथा—(तू या मैं जाऊंगा) त्वम् अहं वा यास्यामि; (तुम अथवा वे जायँ) यूयं ते वा यान्तु; (वे अथवा तू गया था) ते त्वं वा अगच्छः।

अनुवाद करो—लड़के या शिक्षक जानता है। उस पुस्तकको मैं अथवा तू पढ़। मेरे पढ़नेका व्यय पिता या भ्राता देता था। उसने, नहीं तो तूने, मेरी हानि की है। इस वचको मैं अथवा तू पढ़ेगा। इस बात-से तू या वह हँसा है।

शिष्टप्रयोगमें अन्तिम पद वा निकटवर्त्ति पदके अनुसारभी विशेषण वा क्रियापदके लिङ्ग वचन होते हैं; यथा—'जननी जन्मभूमिश्च स्वर्गादपि गरीयसी"; "स्त्रियो धन मुनी याती"; "विषादप्यमृतं ग्राह्यम्, अमेध्यादपि काञ्चनम्। नीचादप्युत्तमा विद्या, स्त्रीरत्नं दुष्कुलादपि ॥" "यस्य वीर्य्येण कृतिनो वयञ्च भुवनानि च" उत्तर० १. ३२ (भुवनानि कृतीनि); "कामश्च ...गुणो नवयौवनञ्च" मालती० १. ३५.।

विषय-सूची ।

विषय-सूची ।

विषय-सूची ।

विषय-सूची ।

विषय-सूची ।

विषय सूची ।

पाठ-परिशुद्धि ।

पृष्ठ २८ पंक्ति ८ मे—'खिद्यंस्तटतरुः'के स्थानमे 'म्लायंस्तटतरुः' पढ़ना ।

पृ० ४३ पं० ७ के नीचे पढ़ना—'विश्लेप करो—राम उवाच, अत एव, देव ऋपिः ।'

पृ० १०२ पं० १७ (च) मे पढ़ना—'कोटि'-शब्दभी स्त्रीलिङ्ग ।

पृ० १८२ पं० ९ मे पढ़ना—'(पूज्य अध्यापक कहां ?) क तत्रभवान् अध्यापकः ? ।'

पृ० २०३ पं० १ के नीचे पढ़ना—'यहांसे Hence—इतः ।'

पृ० २०७ पं० ८ मे—'अच्छे तौरसे' पढ़ना ।

पृ० २१६ पं० ९ मे—'बुद्धि'-शब्दके पश्चात् 'देवी'-शब्द पढ़ना ।

पृ० २२४ पं० ३ मे पढ़ना—'क्रियामे प्रथमपुरुषकी विभक्ति होती है ।'

पृ० २२६ पं० १ मे पढ़ना—'सकर्मक धातु कर्त्तृवाच्य तथा कर्मवाच्यमे ।'

पाठ परिशुद्धि ।

पृ० २७१ पं० ७ के पश्चात् ('गम् गतौ' के नीचे) पढ़ना—("सर्वे गत्यर्थाः प्राप्त्यर्था ज्ञानार्थाश्च"। "काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्" हितो० ।—प्राप्तौ, यथा—तृप्तिं गच्छति, विषादं गच्छति ।)

पृ० २७२ प० १२ में 'उप + आ + गम्' के पश्चात् निम्नलिखित अंश छूट गया ; सो ठीक करके पढ़ना—
'उप + आ + गम्—प्राप्तौ । प्रति + आ + गम्—प्रत्यावर्त्तने (लौटना) । सम् + आ + गम्—मिलने ।'

पृ० ३२३ पं० १९ में पढ़ना—'ह्वयति, ह्वयते ; ह्वास्यति, ह्वास्यते । (१) ह्वयति ह्वयते मल्लो मल्लम् ।'

पृ० ३४२ पं० १७ मे—'बुध्यते शास्त्रं सुधीः' पढ़ना ।

पृ० ३७२ पं० १३ मे—'सम्पत् सम्पदमनुबध्नाति' पढ़ना ।

पृ० ५५६ पं० २२ मे—'म० ८. १६.' पढ़ना ।

पृ० ५६४ पं० ३—'णिजन्त धातु' यह शीर्षक ५३९ सूत्रके ऊपर होना चाहिये ।

पृ० ५६७ पं० १७ मे—'अगुग थ' के स्थानमें 'अगुग य' पढ़ना ।

पृ० ६१३ पं० १२ मे—'जिससे' के स्थानमें 'जिसमें' पढ़ना ।

पृ० ६२६ प० १० मे—'एकेन ऊना गणिता दशग्रहाः' के स्थानमें 'ऊना' स्त्रीकेन मता दशग्रहा.' पढ़ना ।

पृ० ६४३ प० १२—'तृतीयाप्रतिषेधः' इत्यादि टिप्पनीस्थविषय टिप्पनी-विभाजक 'लाइन' के नीचे आना चाहिये ।

पृ० ७०६ पं० १९ मे—'र० १४.३३' पढ़ना ।

पृ० ११२ 'हेडिं'—'सर्वनाम स्त्रीलिङ्ग शब्द' पढ़ना ।

इट्-विधान।

३५०। लट्, लोट्, लङ् और य भिन्न व्यञ्जनवर्ण परे रहनेसे, धातुके उत्तर 'इट्' होता है; 'ट्' नहीं रहता। जिन धातुओंके उत्तर 'इट्' होता है, उनको 'सेट् धातु' कहते हैं।

३५१। दरिद्रादि (१)-भिन्न आकारान्त, इवर्णान्त, उकारान्त, ऋकारान्त धातु, और शकादि (२) व्यञ्जनान्त धातुके उत्तर 'इट्' नहीं होता। जिन धातुओंके उत्तर 'इट्' नहीं होता, उन्हें 'अनिट् धातु' कहते हैं।

३५२। स्वृ, चाय्, स्फाय्, प्याय्, सू (अदादि), सू (दिवादि), धू, रधादि (३) धातु, ऊकार-इत् (४) धातु, और रु, द्रु, स्नु, नु धातुके उत्तर विकल्पसे 'इट्' होता है। इनको 'वेट् धातु' कहते हैं। यथा—रध्+स्यति=रधिष्यति, रत्स्यति।

नीचे आकारान्त-आदि-क्रमसे अनिट्

धातु लिखे जाते हैं—

दरिद्रादि। (१)

आकारान्त—'दरिद्रा'-भिन्न सब।

आकारान्ता अदरिद्रा अनिटः परिकीर्त्तिताः।

इकारान्त—श्रि और श्वि भिन्न सब।

श्रि-श्वि-भिन्ना इकारान्ताश्चानिटः कथिता बुधैः।

ईकारान्त—डी शी दीधी वेवी भिन्न सब।

डी-शी-वेवी-दीधी-भिन्ना ईकारान्तास्तथाऽनिटः।

उकारान्त—यु रु नु-स्नु क्षु क्ष्णु ऊर्णु भिन्न सब।

वर्जयित्वा यु-रु नु स्नु क्षु-क्ष्णु ऊर्णुञ्च सप्तमम्।

अनिटः स्युरुकारान्ताः।

ऋकारान्त—वृ और जागृ भिन्न सब।

ऋकारान्ता वृ-जागृभ्यां विना सर्वेऽनिटो मताः।

शकादि। (२)

कान्त—केवल शक् धातु।

कान्तेषु शक एवानिट्।

चान्त—पच् मुच् रिच् वच् विच् सिच्।

चान्तेषु पच्-मुच-रिचो वच् विचौ सिच एव च।

अनिटः षट् परिज्ञेयाः।

छान्त—केवल प्रच्छ् धातु।

प्रच्छश्छान्तेष्वनिट् स्मृतः।

जान्त—त्यज् निज् भज् मस्ज् भुज् भ्रस्ज् मस्ज् मृज्

यज् युज् रञ्ज् रुज् विज् सञ्ज् सृज् स्वञ्ज्।

त्यजो निजो भजो मस्जो भुज-भ्रस्जौ मसज-मृज्-यजः।

युजो रञ्जो रुज विजौ सृज्-सञ्जौ स्वञ्ज एव च।

षोडशैतान् जकारान्तान् जानीयादिड्विवर्जितान्॥

दान्त—अद् क्षुद् खिद् छिद् तुद् नुद् पद् भिद् विद्*

विन्द्† शद् सद् स्कन्द् स्विद् हद्।

अद- क्षुदः खिदश्चैव छिद्-तुदौ नुद्-पदौ भिदः।

---

* दिवादि।

† व्याघ्रभूत्यादिमतेऽयं सेट्, चान्द्रादिमतेऽनिट्।

विदो विन्दः शद-सदौ स्कन्द-स्विद-हदास्तथा ।

दकारान्तेषु विज्ञेया इमे पञ्चदशानिटः ॥

धान्त—क्रुध् क्षुध् बुध् बन्ध् युध् राध् रुध् व्यध् शुध् साध् सिध् * ।

क्रुधः क्षुधो बुधो बन्धो युधो राधो रुधो व्यधः ।

शुधः साधः सिधश्चेति धान्तेष्वेकादशानिटः ॥

नान्त—मन् और हन् धातु ।

अनिटौ मन्-हनौ नान्ते ।

पान्त—आप् क्षिप् छुप् तप् तिप् तृप् त्रप् दृप् लिप् लुप् वप् शप् सृप् स्वप् ।

आपः क्षिपश्छुपश्चैव तप्-तिप्-तृप्-त्रप्-दृपो लिपः ।

लुप्-वप्-शप्-सृप्-स्वपः पान्तेष्वनिटः स्युश्चतुर्दश ॥

भान्त—यभ् रभ् लभ् ।

यभ्-रभ्-लभो भकारान्तेष्वनिटो गदितास्त्रयः ॥

मान्त—गम् नम् यम् रम् ।

गम्-नमौ यम्-रमौ चेति मकारान्तेष्विमेऽनिटः ।

शान्त—क्रुश् दन्श् दिश् दृश् मृश् रिश् रुश् लिश् विश् स्पृश् ।

क्रुश्-दन्श-दिश्-दृशश्चैव मृश्-रिश्-रुश्-लिश्-विशस्तथा ।

स्पृशश्चेति शकारान्तेष्वनिटः कीर्त्तिता दश ॥

षान्त—कृष् तुष् त्विष् दुष् द्विष् पिष् पुष् † मृष् विष् शिष् शुष् श्लिष् ।

कृष्-तुष्-त्विष्-दुष्-द्विषश्चैव पिष्-पुष्-मृष्-विष्-शिषस्तथा ।

---

* दिवादि ।

† दिवादि पुष् । क्रयादि पुष् सेट् ।

शुप्-दिपौ चेति कथ्यन्ते पान्तेषु द्वादशानिटः ॥

सान्त—घस् और वस् धातु ।

अनिटौ घस् वसौ सान्ते ।

हान्त—दह् दिह् दुह् नह् मिह् रह् लिह् वह् ।

दहो दिहो दुहश्चैव नहो मिह-रहौ लिहः ।

वहश्चेति हकारान्तेष्वनिटोऽष्टौ प्रकीर्त्तिताः ॥

रधादि । (३)

रध् तृप् दृप् द्रुह् नश् मुह् स्निह् स्नुह् ।

रध्यतिस्तृप्य-दृप्यौ च द्रुह्यतिर्नश्यतिस्तथा ।

मुह्यतिः स्निह्यतिः स्नुह्यो रधादावष्ट धातवः ॥

ऊकार-इत् (ऊदित्) धातु । (४)

मृज्, सिध्, तृप्, दृप्, क्षम्, गुह्, मुह्, अश् (स्वादि), गाह्, तृह्, क्लिश्, क्लृप् (कृप्), स्निह्, नश्, द्रुह् इत्यादि ।

लट् ।

[यथासम्भव पूर्व पूर्व प्रकरणोंके स्टार (*)-चिह्नित सूत्रोंका कार्य्य होगा ।]

३९३ । * लृट्, लृङ् और लुट् विभक्ति परे रहनेसे, धातुके अन्त्य-स्वर और उपधा लघुस्वरका गुण होता है ; यथा—भू + स्यति = भवि-ष्यति ; (ज्ञानार्थ) विद् + लृट् = वेदिष्यति ; कथि—कथयिष्यति ।

३९४ । * 'स्य' परे रहनेसे, ऋकारान्त धातु और हन् धातुके उत्तर 'इट्' होता है ; और वृत्, क्लृप् (कृप्)-प्रभृति धातुके उत्तर

परस्मैपदके 'स्य' परे 'इट्' नहीं होता, किन्तु आत्मनेपदमे नित्य, अन्यत्र विकल्पसे होता है ; यथा—(कृ) करिष्यति ; (हन्) हनिष्यति ; (वृत्) वर्त्स्यति, वर्त्तिष्यते ।

३९५ । * लृट्, लृङ् परे रहनेसे, नृत्, छृद्, चृत्, कृत् और तृद् धातुके उत्तर, और आशीर्लिङ्के आत्मनेपदमे नृत्-आदि, वृ तथा ऋकारान्त धातुके उत्तर विकल्पसे 'इट्' होता है ; यथा—(नृत्) नर्त्तिष्यति, नर्त्स्यति ।

३९६ । * 'स' परे रहनेसे, परस्मैपदमे गम् धातुके उत्तर 'इट्' होता है ; आत्मनेपदके योग्य होनेसे विकल्पसे होता है ; यथा—गमिष्यति ।

३९७ । * चतुर्लकार परे रहनेसे अकर्त्तृवाच्यमे, और लृट्-आदि विभक्ति वा प्रत्यय परे रहनेसे समस्त वाच्यमे, एकारान्त, ऐकारान्त तथा ओकारान्त धातु आकारान्त होता है ; यथा—(धे) धास्यति ; (गै) गास्यति ; (शो) शास्यति ।

३९८ । * उक्त विषयमे ब्रू—वच्, अस्—भू, चक्ष्—क्शा अथवा ख्या† होता है ; यथा—ब्रू + स्यति = वक्ष्यति (३०९ सू०) ; (अस्) भविष्यति ; (चक्ष्) क्शास्यति, क्शास्यते ; ख्यास्यति, ख्यास्यते ।

३९९ । * स्वरवर्ण परे गुह्—गूह् होता है ; यथा—गुह् + स्यति = गूहिष्यति (३९२ सू०) । सर्वत्र क्लृप् (कृप्)—कल्प् होता है ; केवल 'कृपण'-प्रभृति स्थानमे नहीं होता ; यथा—कल्प्स्यते ।

३६० । * 'स' परे रहनेसे, 'भ' के स्थानमे 'प', और वध्, वन्ध्, बुध् धातुके 'ब' के स्थानमे 'भ' होता है ; गुह् और गाह् धातुके 'ग' के

---

† अन, उस्, अस् परे नहीं होता। क्शा और ख्या उभयपदी ।

स्थानमें 'घ' होता है ; यथा—(लभ्) लप्स्यते ; (बुध्) भोत्स्यते ; (गुह्) घोक्ष्यति ।

३६१ । * कुटादि† धातुके उत्तर गुण नहीं होता ; परन्तु लिट्का सगुण 'अ' और ण-इत् (णित्) प्रत्यय परे रहनेसे होता है ; यथा—(कुट्) कुटिष्यति ।

३६२ । * चतुर्लकार-भिन्न सगुण विभक्तिमें भ्रस्ज् के स्थानमें—भर्ज् और भ्रज् होते हैं ; यथा—भ्रस्ज् + स्यति = भर्क्ष्यति, भ्रक्ष्यति (३०९ सू०) ।

३६३ । * लुट्-आदि विभक्ति वा प्रत्यय परे रहनेसे, दरिद्रा धातुका 'आ' लुप्त होता है ; परन्तु सन्, अक, अन परे रहनेमें नहीं होता ; लुङ् परे विकल्पसे लोप होता है ; यथा—दरिद्रा + स्यति = दरिद्रिष्यति ।

३६४ । ग्रह् धातुके उत्तर विहित 'इट्' दीर्घ होता है ; और वृ तथा ॠकारान्त धातुके उत्तर विहित 'इट्' विकल्पसे दीर्घ होता है ; किन्तु लिट् और आशीर्लिङ्में नहीं होता ; यथा—(ग्रह्) ग्रहीष्यति ; (तॄ) तरीष्यति, तरिष्यति ।

३६५ । * सगुण झुट्-वर्ग परे रहनेसे, तृप्, मृश्, स्पृश्, तृप्, दृप् और सृप् धातुके 'ऋ' के स्थानमें विकल्पसे 'र' होता है ; दृश् और सृज् धातुके 'ऋ' के स्थानमें नित्य 'र' होता है ; यथा—(तृप्) त्रप्स्यति, तर्प्स्यति ; (दृश्) द्रक्ष्यति ।

३६६ । * 'स' परे रहनेसे, 'स्' के स्थानमें 'त्' होता है ; यथा—

---

† कुटादि—कुट्, पुट्, लुठ्, स्फुट्, स्फुर्, स्फुल्, त्रुट्, विज् इत्यादि । मिल् और लिख् धातु विकल्पसे कुटादि ।

(वस्) वत्स्यति।

३६७। ※ 'स' और 'त' परे रहनेसे, नश् और मस्ज् धातुके अकारके पश्चात् अनुस्वार होता है; यथा—(नश्) नङ्क्ष्यति; (मस्ज्) मङ्क्ष्यति।

लृङ्।

[लृट्-विभक्तिमे धातुके जिसप्रकार रूप होते हैं, लृङ्-विभक्तिमेभी उसीप्रकार रूप होंगे; केवल अधिक २६१ और २६३ सूत्रोंका कार्य्य होगा; यथा—(भू) अभविष्यत्; (विद्—अदादि) अवेदिष्यत्।]

कृ धातु।

(परस्मैपद)

	एकवचन	द्विवचन	बहुवचन
प्रथमपुरुष	अकरिष्यत्	अकरिष्यताम्	अकरिष्यन्
मध्यमपुरुष	अकरिष्यः	अकरिष्यतम्	अकरिष्यत
उत्तमपुरुष	अकरिष्यम्	अकरिष्याव	अकरिष्याम

(आत्मनेपद)

प्रथमपुरुष	अकरिष्यत	अकरिष्येताम्	अकरिष्यन्त
मध्यमपुरुष	अकरिष्यथाः	अकरिष्येथाम्	अकरिष्यध्वम्
उत्तमपुरुष	अकरिष्ये	अकरिष्यावहि	अकरिष्यामहि

३६८। लृङ्-विभक्ति परे रहनेसे, 'अधि'-पूर्वक 'इ' धातुके स्थानमे विकल्पसे 'गी' होता है; यथा—अधि+इ+स्यत=अध्यगीष्यत†;

---

† 'गी' का गुण नहीं होता।

(पक्षे) अध्यैष्यत ।

अनुवाद करो—उसका धन होता, तो मुझे देता । विद्या रहती, तो श्यामका (द्वितीया) सब कोई आदर करते । ज्ञान होता, तो सुख होता । मैं भक्त होता, तो ईश्वरकी कृपा पाता । सामर्थ्य रहता, तो अभी इस कामको करता ।

लुट् ।

[इस प्रकरणमें यथासम्भव पूर्व पूर्व स्टार (*)-चिह्नित सूत्रोंका कार्य्य होगा ।]

